ISSN :- 0974 - 8946

अनुसन्धान-प्रकाशन-विभागीया

त्रैमासिकी शोध-पत्रिका

शोध-प्रभा

(A REFEREED QUARTERLY RESEARCH JOURNAL)

४१ वर्षे तृतीयोऽङ्कः (जुलाईमासाङ्कः) २०१६ ई०

प्रकाशन-स्थलम्

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

नवदेहली-११००१६

प्रकाशकः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानित–विश्वविद्यालयः)
कुतुब इन्स्टीट्यूशनल एरिया, नवदेहली–११००१६

ISSN :- 0974 - 8946

४१ वर्षे तृतीयोऽङ्कः (जुलाईमासाङ्कः) २०१६ ई०

मुद्रकः – **अमरप्रिंटिंगप्रैसः,** दिल्ली

प्रधानसम्पादकः

प्रो० रमेशकुमारपाण्डेयः

कुलपतिः

सम्पादकः

प्रो० हरेरामत्रिपाठी

सम्पादकमण्डलम्

प्रो० जयकान्तसिंहशर्मा

प्रो० हरेरामत्रिपाठी

प्रो० भागीरथिनन्दः

सहसम्पादकः

डॉ० ज्ञानधरपाठकः

शोध-प्रभा

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य
अनुसन्धान-प्रकाशन-विभागीया पत्रिका

१. एषा त्रैमासिकी शोध-पत्रिका।

२. अस्याः प्रकाशनं प्रतिवर्षं जनवरी-अप्रैल-जुलाई-अक्टूबरमासेषु भवति।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धान-प्रवृत्तेरुद्बोधनं प्रोत्साहनं विविधदृष्ट्याऽनुसन्धेयविषयाणां प्रकाशनं च विद्यते।

४. अस्यां श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठस्थानामन्येषां च विदुषां स्वोपज्ञविचारपूर्णा अनुसन्धानप्रधाननिबन्धाः प्रकाश्यन्ते।

५. अप्रकाशितानां दुर्लभानां प्राचीनाचार्यरचितानां लघुग्रन्थानां सम्पादनभावानुवादटीकाटिप्पण्यादिपुरस्सरं प्रकाशनमप्यस्यां क्रियते।

६. प्रकाशित-निबन्धः पत्रिकायाः एक प्रतिः लेखकाय निःशुल्कं दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति।

७. अस्यां पत्रिकायां विशिष्टानां संस्कृत-हिन्द्याङ्ग्ल-ग्रन्थानां समालोचना अपि प्रकाश्यन्ते। आलोच्यग्रन्थस्यालोचना यस्मिन्नङ्के प्रकाशिता भवति सोऽङ्को ग्रन्थकर्त्रे निःशुल्कं दीयते किञ्च समालोचनापत्राण्यपि यथासौविध्यं दीयन्ते।

८. अस्याः वार्षिकसदस्यताराशिः १५०.०० रु० (पञ्चाशदुत्तरैकशतं रूप्यकाणि) सदस्यताराशिः **कुलसचिव, श्रीलालबहादुरशास्त्री-राष्ट्रिय-संस्कृत-विद्यापीठ,** नई दिल्ली-१६, इति सङ्केतेन (बैंकड्राफ्ट अथवा मनीआर्डर) द्वारा प्रेषणीयः।

९. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः 'सम्पादकः' 'शोध-प्रभा', श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविद्यापीठ, कटवारिया सराय, नई दिल्ली-११००१६ इति सङ्केतेन विधेयः।

सम्पादकः

नैवेद्यम्

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य शोधप्रभाख्या शोधपत्रिका विविधविषयगवेषणपूर्णानां निबन्धानां संग्रहं क्रोडीकृत्य विद्योततेतराम्। अनुसन्धानसरणिसम्पन्नानामाचार्याणां शोधार्थिनाञ्च शोधपूर्ण-निबन्धान् कलेवरीकृत्य संस्कृतवाङ्मयपरिपोषणे निमग्नेयम् आनन्दसागरे निमज्जयति विदुषो नितान्तम्।

महर्षिणा जैमिनिना 'अथातो धर्मजिज्ञासा' इत्यनेन धर्मविचारस्य कर्त्तव्यत्वं निरूपितमिति। ''स्वाध्यायोऽध्येतव्य'' इति अध्ययनविधिं निरूपयति वेदः। अध्ययनविध्यर्थविषये विप्रतिपत्तयः सन्ति। तत्र प्राभाकराः वदन्ति यत् दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इत्यत्र स्वर्गकामवतः नियोज्यस्य श्रवणम् स्वाध्यायोऽध्येतव्य इत्यत्र नियोज्यस्य श्रवणाभावो वर्तते। अतः अर्थज्ञानस्याध्ययनानन्तरभावित्वेऽपि अष्टवर्षोपनीतस्य माणवकस्याव्युत्पन्नत्वात् तमध्ययनजन्यमर्थज्ञानमेव न भविष्यति। ततः अर्थज्ञानकामनापि तस्य न भविष्यति। अतः व्युत्पन्नः ''अष्टवर्षं ब्राह्मणमुपनयीत'' तमध्यापयीतेति वाक्यार्थवेदी आचार्यत्वरूपप्रयोजनावबोधी च पुरुषः आचार्यस्स्वयं नियोज्योऽपि भवन् माणवकमध्यापयति। अध्यापनञ्च अध्ययनं विना न सिद्ध्यति इति अध्यापनविधिना एव अध्ययनं प्रयुज्यते न स्वविधिना इति। अथ कः अध्यापनविधिः उच्यते-

उपनीय तु यश्शिष्यं वेदमध्यापयेद् द्विजः।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते॥

इति स्मृत्यनुमितः ''उपनीयाध्यापनं कुर्यादित्याकारको विधिः तदध्यापयेदिति श्रुतिर्वा। अत्र प्रभाकरो वदति- आचार्यकरणविधिप्रयुक्तमेवाध्ययनम् तथापि कर्तृगामित्वेनान्तरङ्गत्वादर्थज्ञानमेव प्रयोजनत्वेन स्वीक्रियते, न तु आचार्यत्वसिद्धिरिति। अत्रोच्यते यद्यध्ययनमध्यापनविधिप्रयुक्तमभविष्यत्, तर्हि तस्य सिद्धिरेवास्य किं प्रयोजनमुत अर्थज्ञानमिति विचारः उपापत्स्यत, न तु तत्सम्भवतीति।

'स्वाध्यायोऽध्येतव्य' इत्यत्राध्ययनावच्छिन्ना भावना तव्यप्रत्ययेनाभिधीयते। तस्याः भाव्यापेक्षायां समानपदोपात्तत्वेऽपि अध्ययनस्यापुरुषार्थत्वादिति भाट्टमतेन पूर्वपक्षो वर्तते। सिद्धान्तरूपेण भाट्टाः वदन्ति यदर्थज्ञानरूपदृष्टं प्रयोजनं सम्भवत्यदृष्टकल्पनमन्याय्यमतोऽर्थज्ञानमेव दृष्टं प्रयोजनं भवति। अत एवोक्तम् प्रमाणान्तरेणापि प्राप्तिसम्भवात् क्रत्वर्थत्वाभावेन नियमस्याप्यविधेयत्वाच्चादृष्टार्थतैव वाच्येति, तदपि न अप्राप्तविधिरेवायं यावद्धि फलवत्कर्मानुष्ठानोपयोगिज्ञानोपयोगितयाऽध्ययनाद्यनुष्ठानं नोत्प्रेक्षितं तावद् द्विजातीनामुपनीतानां तत्प्रक्रमाधीतया स्वाध्यायोऽध्येतव्य इति प्रत्यक्षश्रुत्याऽध्ययनं विधीयते।

शास्त्रदीपिकाकारो वदति- अग्निहोत्रादिषु अधीतवेदानां त्रैवर्णिकानामेवाधिकारो नानधीतवेदानामत्रै-वर्णिकानामित्यधिकारनियमरूपं प्रयोजनमप्यध्ययनविधेः भवति। अत एव ''वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यम्, शरदि वैश्यमिति द्वितीयानिर्देशादुपनयसंस्कृताः त्रैवर्णिकाः किमस्माभिः कर्त्तव्यमित्यपेक्षन्ते। तत्सन्निधौ अध्ययनञ्चानिर्दिष्टकर्तृकं विधीयमानं कर्तारमपेक्षते। अध्ययनस्य अध्यापनविधिप्रयुक्तत्वं पूर्वोत्तरपक्षयोः समानमिति प्रभाकरानुयायिनः वदन्ति। अध्ययनं स्वविधिप्रयुक्तमेव नाध्यापनविधिप्रयुक्तम् इत्यपि केचिद् वदन्ति। तथाच अध्ययनमध्यापनविधिप्रयुक्तमिति प्राभाकराः वदन्ति। स्वविधिप्रयुक्तमिति भाट्टाः वदन्ति इति। उभयत्र शोधप्रविधेः स्वरूपमस्माभिः द्रष्टुं शक्यत इति।

शोधप्रभायाः अस्मिन्नङ्के विविधविषयविश्लेषणपरा सप्तदश लेखाः प्रकाश्यन्ते। एवं प्रतिभा-विशेषोद्भासितशोधपूर्णा संस्कृतसौरभं वितन्वतीयं विदुषां सन्तोषाय भविष्यतीति कामयमानोऽहं प्रमादादज्ञानाद्वा सञ्जातस्य दोषजातस्य प्रशमनार्थं निर्देशादिप्रदानैश्च उत्साहश्रियः संवर्धनार्थमभ्यर्थये सुमनसः विदुषः।

प्रो. रमेशकुमारपाण्डेयः
कुलपतिः

सम्पादकीयम्

आचारसत्कर्मणां प्रवर्तकत्वेन मूलत्वं वेदानां स्वीक्रियते। प्रवर्तकज्ञानस्य जनकत्वात् वेदानां माहात्म्यं प्रसिद्धमस्ति। प्रवर्तकज्ञानस्य विषये मीमांसकानां विप्रतिपत्तयः सन्ति। ''स्वर्गकामो यजेत'' इत्यत्र लिङर्थ अभिधा सैव प्रवृत्तिहेतुः इति भट्टाः वदन्ति। यजेत इत्यत्र यज् धातुः त प्रत्ययश्च विद्यते। तत्र तप्रत्ययेऽस्ति अंशद्वयमाख्यातत्वं लिङ्त्वञ्च। आख्याततत्वस्यार्थः कालः कृतिश्च। लिङ्त्वस्यार्थो भावना अभिधापरपर्याया सा च शब्दनिष्ठैव विद्यते। अतः शाब्दीभावना इत्यनेनोच्यते। भवितुः भवनानुकूलो व्यापारविशेषः भावना। शाब्दीभावना तु पुरुषप्रवृत्तिं जनयति। स्वर्गकामः पुरुषः अर्थवादवाक्येन लब्धं प्राशस्त्यज्ञानेन शाब्दीभावनया यागानुष्ठाने प्रवृत्तो भवतु इति बोधः। तदनन्तरं स्वर्गसाध्य-कयागकरणकप्रयाजादि इति कर्त्तव्यताकभावनात्वेन प्रवृत्तो भवति पुरुषः इति। तथाच स्वर्गेच्छुः पुरुषः प्रवृत्तिरूपभावनासाध्यिकालिङर्थसम्बन्धज्ञानकरणिका प्राशस्त्यज्ञानेति कर्त्तव्यताकाभिधात्मिका भावना, तथा भावनया स्वर्गसाध्यकयागकरणकप्रयाजादि-इतिकर्त्तव्यताकप्रवृत्तिरूपायाः आर्थीभावनायाः आश्रयः इति। सङ्कल्पज्ञानं प्रवर्त्तकं भवतीति केचन मीमांसकाः वदन्ति। सङ्कल्पो नाम इच्छा तस्याः अन्वयः प्रकृत्यर्थयागे भवति। यागस्य जनकत्वसम्बन्धेन तिङर्थकृतौ अन्वयो भवति, कृतेः आश्रयतासम्बन्धेन स्वर्गकामेऽन्वयो भवति। तथा च इच्छाविषयकयागजनककृत्याश्रयः स्वर्गकामः इति बोधः।

केचन मीमांसाकाः वदन्ति स्वर्गकामो यजेत इत्यत्र विधिप्रत्ययार्थः कार्यत्वं तच्चापूर्वम् एव तस्य अनुकूलत्वसम्बन्धेन कृतावन्वयः, कृतेः आश्रयतासम्बन्धेन कर्तृपदार्थे स्वर्गकामेऽन्वयो भवति। तत्र अन्ये वदन्ति स्वर्गकामो यजेत इत्यत्र विधिप्रत्ययार्थः भावना प्रयत्नरूपा भवति। तत्र यज्धात्वर्थस्य यागस्य विषयतासम्बन्धेनान्वयो भवति। तथाच अभिधासङ्कल्पापूर्वभावनाज्ञानं प्रवर्तकं भवतीति मीमांसकाः वदन्ति तन्न सम्यक् काम्यकर्मणः भावना, काम्यकर्मण चिकीर्षां विना न भवति काम्यकर्मणः चिकीर्षा काम्यकमणि इष्टसाधनताज्ञानं कृतिसाध्यताज्ञानञ्च विना न सम्भवति। बलवदनिष्टाननुबन्धी-ष्टसाधनताज्ञानविशिष्टकार्यताज्ञानमेव प्रवृत्तिं प्रति प्रवर्तको भवति इति तत्त्वचिन्तामणिकारो वदति। तथा च विधिवाक्यगतलिङ्त्वस्य अर्थः प्रवर्तको भवतीति तात्पर्यमिति। शास्त्राणां विधिवाक्यमाश्रित्यैव नूतनतथ्यानामाविर्भावः अस्माभिः करणीय इत्यपि पक्षो भवितुमर्हति। शास्त्रेषु यानि विधिवाक्यानि भवन्ति तेषां किं प्रयोजनमथ च विधेः कं कमर्थं दार्शनिकाः स्वीकुर्वन्ति। तेषामर्थानां निरूपणे सति "तत्त्वबुभूत्सोः कथा वादः" इत्यस्य सिद्धिर्भविष्यति तदेवास्माकमुद्देश्यं विद्यत इति। एतदपेक्षया सप्तदश लेखा विविधशास्त्रविश्लेषणपराः निरूप्यन्त इति।

प्रो. हरेरामत्रिपाठी

शोधप्रकाशनविभागाध्यक्षः

विषयानुक्रमणिका

संस्कृतविभागः

हिन्दी विभाग

English Section

अद्वैतवेदान्ते भामतीप्रस्थानविमर्शः

डॉ. प्रभाकरप्रसादः

वेदान्तैकप्रवेद्याय कुतर्काणामभूमये।
सत्सुखाद्वैतबोधात्मस्वभावहरये नमः॥

अथ विदितमेव विदुषां ''को नु आत्मा किं ब्रह्म''[1] इत्यादिजिज्ञासामुखेन आत्मा कः? ब्रह्मतत्त्वं किम्? इति निर्धारणार्थं प्रवृत्ता उपनिषद एव वेदान्ता इति। वेदान्तानां ब्रह्मण्येव तात्पर्यमित्यत्र नास्ति विवादः ''सर्वे वेदा यत्पदमामनन्ति''[2] इति श्रुतेः। तद् ब्रह्म निर्विशेषमिति अद्वैतवेदान्तस्य तत्त्वम्। उक्तञ्च–

बहु निगद्य किमत्र वदाम्यहं शृणुत सङ्ग्रहमद्वयशासने।
सकलवाङ्मनसातिगता चितिः सकलवाङ्मनसव्यवहारभाक्॥[3]

श्रुतिरेवात्र मानम्। तथाहि– ''यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति।''[4] इति श्रुत्या जगज्जन्मस्थितिलयकारणं ब्रह्मेति ज्ञायते। एवं ''तदैक्षत बहु स्यां प्रजायेयेति''[5] ''यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेतद् ब्रह्म नामरूपमन्नं च जायते''[6] ''सोऽकामयत बहु स्यां प्रजायेय''[7] ''तन्मनोऽकुरुत'' इत्यादिवाक्यैः ब्रह्मणः स्पष्टं जगत्कर्तृत्वमवगम्यते। एवं जगत्कर्तृत्वेन श्रुतं ब्रह्म निर्विकारमिति ''साक्षी चेता केवलो निर्गुणश्च''[8] ''अविकार्योऽयमुच्यते''[9] इत्यादिवाक्यैर्गम्यते। तत्र कर्तृत्वनिर्विकारत्वयोः परस्परं विरोध,ः यत्र यत्र कर्तृत्वं तत्र तत्र विकारः इति व्याप्त्या ज्ञायते। अतः ब्रह्मणः जगत्कर्तृत्वे स्वीक्रियमाणे

---

1. छान्दोग्योपनिषत् 5.11.1
2. कठोपनिषत् 1.2.16
3. सङ्क्षेपशारीरकम्
4. तै.आ. 3.1
5. छा.उ. 6.2.3
6. मु.उ. 1.1.8
7. तै.उ. 2.6
8. श्वेताश्वतरोपनिषत् 6.11
9. श्रीमद्भगवद्गीता 2.25

निर्विकारत्वबोधकं वाक्यं विरुद्ध्येत, निर्विकारत्वे स्वीक्रियमाणे च जगत्कर्तृत्वबोधकं वाक्यं विरुद्ध्येत इति परस्परविरुद्धार्थबोधकत्वाद्वेदानामप्रामाण्ये प्राप्ते सर्वैरपि वैदिकदार्शनिकैरेतद्विरोधपरिहाराय वेदानां प्रामाण्यस्य संरक्षणाय बहवः प्रक्रियाभेदाः समाश्रिताः। तत्र प्राधान्येन प्रकारचतुष्टयमवगम्यते। प्रथमः प्रकार आरम्भवादिनां नैय्यायिकानाम् - जगतः निमित्तकारणमीश्वरः, नित्यज्ञानेच्छाकृतिमान्, अत एव विकाररहितः, परमाणवः कार्यप्रपञ्चस्य समवायकारणभूताः, परमाणुद्वयसंयोगेन द्व्यणुकादिक्रमेण कार्यप्रपञ्चजातमारभ्यते। यत्र यत्र कर्तृत्वं तत्र तत्र विकार इति व्याप्तिस्तु अनित्यज्ञानेच्छाकृतिमत्सु जीवेष्वेव युज्यते। अतः एतन्मते परमेश्वरे जगत्कर्तृत्वबोधकवाक्यानां निर्विकारत्वबोधकवाक्यानाञ्च समन्वयो भवति।

द्वितीयः प्रकारः साङ्ख्यानाम्, पुरुषः प्रकृतिश्चेति मुख्यं तत्त्वद्वयम्। तत्र प्रकृतितत्त्वमेव सृष्टेः कारणम्, तस्य च विकारयुक्तत्वं युक्तमेव, पुरुषश्च न कस्यापि कारणमिति, तस्य निर्विकारत्वमपि युज्यते। चित्सान्निध्यात् प्रधानस्य जगत्कर्तृत्वस्वीकारात् जगत्कर्तृत्वबोधकवाक्यानां चिद्रूपस्य पुरुषस्य निर्विकारत्वबोधकवाक्यानाञ्च मतेऽत्र समन्वयो भवति।

तृतीयः प्रकारः निम्बार्कादीनां वैष्णवाचार्याणां पक्षः, अस्मिन्मते सर्वज्ञत्वसर्वाचिन्त्यानन्तशक्त्या-दिनिलयः परब्रह्मभूतः श्रीपुरुषोत्तमः स्वात्मकस्वाधिष्ठितनिजशक्तिविक्षेपेण जगदाकारं स्वात्मानं परिणमयति, यथाऽप्रच्युतस्वरूपादिभ्य एवाकाशोर्णनाभ्यादिभ्यः शब्दवाय्वोस्तन्त्वादेश्च जन्मादिकं तथेति स्वीक्रियते। परिणामो द्विविधः स्वरूपपरिणामः शक्तिविक्षेपलक्षणपरिणामश्च। आद्यः घटशरावादिभेदेन मृदः परिणामः। द्वितीयश्च अचिन्त्याशक्तियुक्तस्य ब्रह्मणः परिणामः, अस्मिन् द्वितीये परिणामेऽचिन्त्यानन्त-स्वाभाविकशक्तियोगाद् ब्रह्मणः निर्विकारादप्रच्युतस्वरूपाज्जगज्जन्मादिकं भवतीति निर्विकारत्व-परवेदवाक्यानां कर्तृत्वबोधकवेदवाक्यानाञ्च समन्वयो निराबाधं सिद्ध्यति।

चतुर्थः प्रकारः अद्वैतिनाम् - अत्र अद्वितीयं ब्रह्मैव परमार्थम्, तद्भिन्नं सृष्ट्यादिकं मिथ्या, अतः सृष्टिकर्तृत्वादिकं मिथ्यैव ब्रह्मण्यारोप्यते। ब्रह्म निर्धर्मकं निर्विकारम्, अतः ब्रह्मणः निर्विकारत्व-बोधकवेदवाक्यानां समन्वयः स्फुटो भवति। सृष्टिवाक्यानाञ्च यदि सृष्टिमनुपन्यस्य निषेधो ब्रह्मणि प्रपञ्चस्य प्रत्यक्षादिप्रमाणैर्गम्यस्य प्रतिपाद्येत तदा ब्रह्मणि निषिद्धस्य प्रपञ्चस्य वायौ प्रतिषिद्धस्य रूपस्येव ब्रह्मणोऽन्यत्रावस्थानशङ्कायां निर्विचिकित्समद्वितीयत्वं प्रतिपादितं न स्यादतः सकलप्रपञ्चस्य ब्रह्मैव कारणमिति प्रतिपादनपूर्वकं वस्तुतः तत्रापि प्रपञ्चस्य स्थितिर्न सम्भवतीति प्रतिपादनेन निर्विकारं ब्रह्मैव परमार्थमिति बोधने तात्पर्यमिति जगतो मिथ्यात्वेऽपि समन्वयः सङ्गच्छते।

अद्वैतिनामस्मिन् समाधाने द्वैतिनामाक्षेप एवं भवति - श्रुतिषु जीवः, ईश्वरः, जगदिति तत्त्वत्रयं तत्र तत्र श्रूयते, प्रपञ्च आविद्यक इति हि अद्वैतिनां सिद्धान्तः, तत्रेयमविद्या किमाश्रितेति विचारे जडप्रपञ्चाश्रितेति वक्तुं न शक्यते कथमपि इति तु निश्चप्रचम्, यतः ज्ञानाज्ञानयोश्चे-तनाश्रितत्वनियमात्। अतः जीवेश्वरयोरन्यतर एवाविद्याश्रय इति वक्तव्यम्, ईश्वरश्च सर्वज्ञः

अपहतपाप्मत्वादिगुणक इति श्रूयते ''यः सर्वज्ञः सर्वविद्''[1] एवं ''आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः''[2] इत्यादिवाक्यैः। अत ईश्वरेऽविद्यास्तीति वक्तुं नैव शक्यते। जीवश्चाद्वैतिनां मते ईश्वरातिरिक्तो नास्त्येव। एवञ्चाविद्याया आश्रय एव निरूपयितुं न शक्यत इति प्रपञ्चस्याविद्यकत्वं न युज्यते। अयमाक्षेपः भगवत्पादैः ''ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेत्। अहं ब्रह्मास्मीति। तस्मात् तत्सर्वमभवत्''[3] इति श्रुत्यैव ब्रह्मणि विद्याविधानात् ब्रह्मणि अविद्या नानुपन्ना, किन्तु नैव अब्रह्म अविद्याकर्ता चेतनो भ्रान्तोऽन्यः इष्यते ''नान्यदतोऽस्ति विज्ञातृ'' ''तत्त्वमसि'' इत्यादिश्रुतिभ्यो निश्चीयत इति समाहितः। द्वैतवासनाक्रान्तानां जनानां सहसा समाधानमिदं तृप्तिकरं न स्यादिति श्रीवाचस्पतिमिश्रमहाभागा भामतीकाराः जीव एवाविद्याया आश्रयः, जीवेशयोर्भेदः अनादिरिति सरलं समाधानं निरूपयन्ति। अज्ञानस्य विषयीभूतं ब्रह्म, अज्ञानस्य आश्रयस्तु जीव एव, जीवाज्ञानयोः सम्बन्धः अनादिः। स्वीक्रियन्ते च षडनादिपदार्थाः।

जीव ईशो विशुद्धा चित् तथा जीवेशयोर्भिदा।
अविद्यातच्चितोर्योगः षडस्माकमनादयः॥ इति ते षडनादिपदार्थाः।

अत्र भामतीकारैः अवच्छेदवादाश्रयणेन जीवेश्वरयोर्भेद उपपाद्यते। अविद्यावच्छिन्नं चैतन्यं जीवः, अविद्यानवच्छिन्नं चैतन्यमीश्वरः इति जीवेशयोरविद्यामूलो भेदः।

एवमेव भामतीकाराः बहुषु स्थलेषु पञ्चपादिकाप्रस्थाने वार्त्तिकप्रस्थाने वा उक्तं विषयं तथैव न स्वीकुर्वन्ति किन्तु किञ्चिद् विशिष्टं प्रकारान्तरं दर्शयन्ति। तदत्र लेखेन यथामति प्रतिपाद्यते–

1. प्रथमं ब्रह्ममीमांसाशास्त्रारम्भः श्रवणविधिप्रयुक्तः इति पञ्चपादिकाप्रस्थाने श्रवणे विधिः ''श्रोतव्यः'' इत्यनेन बोध्यत इति स्वीक्रियते, भामतीकारैस्तु श्रवणे विधिर्न सम्भवतीति ब्रह्ममीमांसाशास्त्रारम्भः अध्ययनविधिप्रयुक्त एवेति प्रतिपाद्यते।
2. एतदर्थं भामतीकारैरर्थज्ञानार्थमेव वेदाध्ययनं ''स्वाध्यायोऽध्येतव्यः'' इत्यध्ययनविधिना विधीयते इति भाट्टानां पक्ष एव समर्थ्यते। विवरणे तु अक्षरग्रहणार्थमेव वेदाध्ययनमध्ययनविधिना विधीयते इति महता प्रयत्नेन प्रतिपादितम्।
3. विवरणे प्रतिबिम्बवादः स्वीकृतः, वार्त्तिके आभासवादः स्वीकृतः, भामतीकारैस्तु नीरूपस्य नीरूपे प्रतिबिम्बासम्भवात् ब्रह्मणः प्रतिबिम्बो न युक्तः अपितु अवच्छेदवाद एव युक्त इति प्रतिपाद्यते।

---

1. मुण्डकोपनिषत् 1.1.9
2. छान्दोग्योपनिषत् 8.1.5
3. बृहदारण्यकोपनिषत् 1.4.10

4. **आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला।**
पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः।। इति अज्ञानस्य आश्रयविषययोरैक्यमर्थात् शुद्धचैतन्यमेवाज्ञानस्य विषयभूतमज्ञानस्य आश्रयभूतमपि इति विवरणे स्वीक्रियते। भामतीकारैस्तु जीवाश्रितमज्ञानं ब्रह्म विषयकमिति वर्ण्यते।

5. एकैव मूलाविद्येति विवरणसम्प्रदाये स्वीक्रियते, भामतीकारैस्तु मूलाविद्यानानात्वं स्वीक्रियते। उक्तञ्च सिद्धान्तबिन्दौ भामतीसिद्धान्तस्य निष्कर्षविषये ''अज्ञानविषयीकृतं चैतन्यमीश्वरः, अज्ञानाश्रयीभूतञ्च जीवः इति वाचस्पतिमिश्राः, अस्मिन् पक्षे अज्ञाननानात्वात् जीवनानात्वम्। प्रतिजीवञ्च प्रपञ्चभेदः। जीवस्यैव स्वाज्ञानोपहिततया जगदुपादानत्वात्। प्रत्यभिज्ञा चापि सादृश्यात्। ईश्वरस्य सप्रपञ्चजीवाविद्याधिष्ठानत्वेन कारणत्वोपचारादिति। अयमेव चावच्छेदवादः'' इति[1]।

6. अत एव भामतीकाराणां मते ''अथातो ब्रह्मजिज्ञासा'' इति ब्रह्ममीमांसायां जिज्ञास्यत्वेनोपक्रान्तं ब्रह्मतत्त्वं जीवात्मतत्त्वमेव। अत एव ब्रह्ममीमांसायाः शारीरकमीमांसेति[2] भाष्योक्तं सङ्गच्छते। शरीरः जीवात्मा, ततः अज्ञातार्थे कन् प्रत्ययात् शारीरकपदं सन्दिग्धात्मतत्त्वपरमिति अर्थो युज्यते। अत एव भामत्याम्- ''अथ यदसन्दिग्धमप्रयोजनञ्च न तत्प्रेक्षावत्प्रतिपित्सागोचरः। यथा समनस्केन्द्रियसन्निकृष्टः स्फीतालोकमध्यवर्ती घटः करटदन्ता वा। तथा चेदं ब्रह्मेति व्यापकविरुद्धोपलब्धिः। तथाहि- बृहत्वाद् बृंहणत्वाद्वाऽऽत्मैव ब्रह्मेति गीयते। स चायमाकीटपतङ्गेभ्यः आ च देवर्षिभ्य प्राणभृन्मात्रस्येदंकारास्पदेभ्यो देहेन्द्रियमनोबुद्धिविषयेभ्यो विवेकेनाहमित्यसन्दिग्धाविपर्यस्तापरोक्षानुभवसिद्धः इति न जिज्ञासास्पदम्। नहि जातु कश्चिदत्र सन्दिग्धे- ''अहं वा नाहं वेति'' इति। न च विपर्यस्यतिनाहमेवेति। न चाहं कृशः, स्थूलः, गच्छामि, इत्यादिदेहधर्मसामानाधिकरण्यदर्शनाद्देहालम्बनोऽयमहङ्कार इति साम्प्रतम्'' इत्यादिना ''न'' चाहम् इति सर्वजनीनस्फुटान्तरानुभवसमर्थितात्मा देहेन्द्रियादिव्यतिरिक्तः शक्य उपनिषदां सहस्रैरप्यन्यथयितुम्, अनुभवविरोधात्। ''न ह्यागमाः सहस्रमपि घटं पटयितुमीशते। तस्मादनुभवविरोधादुपचरितार्था एवोपनिषदः'' इत्यन्तेन ग्रन्थसन्दर्भेणाहमध्यासमाक्षिप्य ''इदमत्राकूतमित्यादिना'' ''भवेदेतदेव यदि अहमित्यनुभव आत्मतत्त्वं प्रकाशेत, न त्वेतदस्ति। यथा हि समस्तोपाध्यनवच्छिन्नानन्तानन्दचैतन्यैकरसमुदासीनमेकमद्वितीयात्मतत्त्वं श्रुतिस्मृतीतिहासपुराणेषु गीयते। न चैतान्युपक्रमपरामर्शोपसंहारैः क्रियासमभिहारेणेदृगात्मतत्त्वमभिदधति तत्पराणि सन्ति शक्यानि शक्रेणाप्युपचरितार्थानि कर्तुम्'' इत्यादिना, ''स्थूलोऽहमन्धोऽहं गच्छामि'' इत्यादयोऽप्यध्यस्ततया व्याख्याताः। ''तदेवमुक्तेन क्रमेणाहं प्रत्यये पूतीकूष्माण्डीकृते,

---

1. वेदान्तसन्दर्भः पृ. सं. 121
2. यथाचायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शसिष्यामः। ब्र.सू.शां.भा. पृ. 4

भगवती श्रुतिरप्रत्यूहमकर्तृत्वभोक्तृत्वसुखदु:खशोकाद्यात्मत्वमहमनुभवप्रसञ्जितमात्मनो निषेधमर्हतीति'' ग्रन्थेन जीवात्मतत्त्वमेव ब्रह्मपदार्थ इति निरूपितम्। अत्र अहङ्कारादिविशिष्टं जीवमादाय पूर्वपक्ष उपस्थापित:, अनुपहितं संविन्मात्रमादाय सिद्धान्त: प्रतिष्ठापित:। अज्ञानोपहितं जीवात्मतत्त्वं कारणमभिप्रेत्य ''जन्माद्यस्य यत:'' इति सूत्रं प्रवृत्तम्। तदेवं भामतीमते विशिष्टो जीवोऽहंपदार्थो बद्ध:, अज्ञानोपहितं जीवात्मस्वरूपं कारणम्, तदनुपहितमात्मस्वरूपं शुद्धम् इति विशिष्टोपहितानुपहितभेदभिन्नमात्मतत्त्वं ब्रह्ममीमांसाशास्त्रस्य प्रमेयम्। विवरणमते तु यत्र मायाविशिष्टं ब्रह्म कारणम्, तत्प्रतिबिम्बो जीव इति स्वीक्रियते तत्र ''जन्माद्यस्य यत:'' इति सूत्रेण लक्षितं जिज्ञास्यं ब्रह्म जीवात्मतत्त्वातिरिक्तमेवेति भामतीविवरणप्रस्थानयोर्भेद:।

7. अत एव भामतीकाराणां मते जीवाश्रिताविद्याविषयीकृतं ब्रह्म स्वत एव प्रपञ्चाकारतया विवर्तमानतयोपादानम्, अज्ञानं सहकारिमात्रमिति स्वीक्रियते। उक्तञ्च–

ब्रह्मैव जीवाश्रितयाऽविद्यया विषयीकृतम्।
वाचस्पतिमते हेतुर्माया तु सहकारिणी॥[1]

विवरणाचार्यमते त मायाविशिष्टं सर्वज्ञेश्वरतत्त्वमेव प्रपञ्चस्योपादानम्। उक्तञ्च–

सार्वात्म्यस्येशलिङ्गत्वात् यः सर्वज्ञ इति श्रुतेः।
मायोपहितमीशं तदाहुर्विवरणानुगाः॥[2] इति प्रस्थानयोर्भेद:।

एतन्मतद्वयस्य ''तदधीनत्वादर्थवत्''[3] इति सूत्रभाष्यस्य ''अविद्यात्मिका हि बीजशक्ति: अव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुप्ति:, यस्यां स्वरूपप्रतिबोधरहिता: शेरते संसारिणो जीवा:। तदेतदव्यक्तं क्वचिदाकाशशब्दनिर्दिष्टम्''। एवं ''यदा तु जीवो महांस्तदाव्यक्ता-धीनत्वाज्जीवभावस्य महत: परमव्यक्तमित्युक्तम्। अविद्या ह्यव्यक्तम्। अविद्यावत्त्वेनैव जीवस्य सर्व: संव्यवहार: सन्ततो वर्तते'' इति पक्षद्वयमेव मूलम्। प्रथमं विवरणमतस्य, द्वितीयं भामतीमतस्य मूलमिति स्पष्टं प्रतीयते।

8. ''तरति शोकमात्मवित्'' ''विद्वान् नामरूपाद्विमुक्त:'' इत्यादिश्रुतिवाक्यै: ब्रह्मज्ञानादेव मोक्ष: श्रूयते, अत: ब्रह्मसाक्षात्कारादेव मोक्ष इति वेदान्तस्य सर्वेषु प्रस्थानेष्वैकमत्येन स्वीक्रियते। तत्र ब्रह्मविषयकमपरोक्षज्ञानं शब्दादेव भवति ''तन्त्वौपनिषदं पुरुषं पृच्छामि'' इति श्रुते: शब्दकरणक एव ब्रह्मसाक्षात्कार इति विवरणप्रस्थाने स्वीक्रियते। भामतीकारास्तु ब्रह्मसाक्षात्कार: मन:करणक एव, शब्दात् परोक्षज्ञानमेव जायत इति स्वीकुर्वन्ति। उक्तञ्च जिज्ञासाधिकरणे भामत्याम्– ''न चैष साक्षात्कारो मीमांसासहितस्यापि शब्दप्रमाणस्य फलम् अपि तु प्रत्यक्षस्य

1. वेदान्तसूत्रमुक्तावली. श्लो. 56
2. वेदान्तसूत्रमुक्तावली. श्लो. 18
3. ब्र.सू. 1.4.3

तस्यैव फलत्वनियमात्। अन्यथा कुटजबीजादपि वटाङ्कुरोत्पत्तिप्रसङ्गाद्'' [1]इति। अयमाशयः प्रमाकरणं प्रमाणमिति सर्वैरपि स्वीक्रियते। प्रमा च प्रत्यक्षानुमित्यादिभेदभिन्ना, तत्र प्रत्यक्ष-प्रमाणात् प्रत्यक्षात्मकं ज्ञानं तथानुमानादिना अनुमित्यात्मकं परोक्षाज्ञानमुत्पद्यते। अतः ''तत्त्वमस्या'' दिवाक्यैः परोक्षमेव ज्ञानमुत्पद्यते, तदर्थज्ञानाभ्याससंस्कारसहकृतमनसा हि अपरोक्षं तद्भवति। अतः ब्रह्मापरोक्षज्ञानं मनःकरणकमेव। यथा गान्धर्वशास्त्रश्रवणतदर्थज्ञानाभ्याससंस्कारसहित-श्रोत्रेन्द्रियेणैव षड्जादिस्वरग्राममूर्छनाभेदः साक्षात्क्रियते। एवञ्च भामतीमते वेदान्तार्थज्ञानाभ्या-ससहितसंस्कारो जीवः स्वस्य ब्रह्मभावमन्तःकरणेनैव जानाति।

9. शुद्धब्रह्मापरोक्षज्ञानादेव मोक्षः, अतः अखण्डाकारवृत्तेः शुद्धमेव ब्रह्म विषयः इति विवरणप्रस्थाने स्वीक्रियते। भामतीकारैस्तु अखण्डाकारवृत्तेः उपहितमेव विषयः, शद्धञ्च ब्रह्म स्वप्रकाशम्, न कस्या अपि वृत्तेः विषय इति स्वीक्रियते। एवञ्च भामतीमते उपहितरूपेण वृत्तिविषयत्वं स्वप्रकाशत्वञ्चानुपहितरूपेणेति ''मनसैवेदमाप्तव्यम्'' ''यन्मनसा न मनुते'' इत्युभयथापि श्रुतानां वाक्यानां विरोधः परिहृतो भवति। ''वृत्तिविषयत्वमपि तयैवोपहितस्य न निरुपाधेः''[2] इति भामत्यामुपहितस्यैव वृत्तिविषयत्वं स्पष्टम्। अत एव भामतीमते मूलाज्ञानमपि उपहित-विषयकमेवेति स्वीकार्यमन्यथा ज्ञानाज्ञानयोः भिन्नविषयकत्वे निवर्त्यनिवर्तकभावोऽनुपपन्नः स्यात्।

10. चित्तशुद्ध्यर्थं कर्मणामपेक्षा सर्वेषां वेदान्तप्रस्थानानां मतेऽस्त्येव। परन्तु ''विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनैतमेव विदित्वा मुनिर्भवति''[3] इति श्रुतेः कर्मणां विद्यार्थत्वं विवरणप्रस्थाने स्वीक्रियते भामतीकारैस्तु विविदिषार्थत्वमेव कर्मणां युक्तमिति प्रतिपाद्यते। विविदिषन्तीत्यत्र प्रत्ययार्थत्वेनेच्छायाः प्राधान्यात् तदर्थमेव यज्ञादीनां विधानम्, वेदनस्य तु इच्छाविषयत्वेनार्थतः प्राधान्येऽपि प्रकृत्यर्थत्वेन शब्दतः प्राधान्याभावात् ''राजपुरुषमानय'' इत्यादौ शब्दतः प्रधानस्यैव पुरुषस्य क्रियान्वयत्वदर्शनात् वेदनार्थत्वमर्थाद् विद्यार्थत्वं यज्ञादीनां न युक्तमिति भामतीकाराणामाशयः। उक्तञ्च- ''तमेतमात्मानं वेदानुवचनेन-नित्यस्वाध्यायेन ब्राह्मण विविदिषन्ति-वेदितुमिच्छन्ति, न तु विदन्ति, वस्तुतः प्रधानस्यापि वेदनस्य प्रकृत्यर्थतया शब्दतो गुणत्वात्। इच्छायाश्च प्रत्ययार्थतया प्राधान्यात् प्रधानेन च कार्यसम्प्रत्ययात्। न हि राजपुरुषमानय इत्युक्ते वस्तुतः प्रधानोऽपि राजा पुरुषविशेषणतया शब्दतः उपसर्जनः आनीयते, अपि तु पुरुष एव, शब्दतस्तस्य प्राधान्यात्।[4] एवञ्च भामतीकाराणां मते विविदिषार्थत्वमेव यज्ञादीनां विधानमिति विशेषः।

---

1. भामती 1.1.1
2. भामती 1.1.2
3. भामती 1.1.1
4. बृ.उ. 4.4.22

11. "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"[1] इति श्रुतेः ज्ञान साधनानि श्रवणमनननिदिध्यासनानीति सर्वेषु वेदान्तप्रस्थानेषु स्वीक्रियते। तत्र श्रवणं प्रधानम्, मनननिदिध्यासनयोस्तु श्रवणाङ्गत्वमेवेति विवरणाचार्यैः स्वीकृतम्, परन्तु भामतीकारैः निदिध्यासनमेव प्रधानमङ्गि "ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्"[2] इति श्रुतेः श्रवणमननयोस्तु तदङ्गत्वमेवेति स्वीक्रियते। तत्रापि निदिध्यासने मननं हेतुः, यतः अकृतमननस्य विषये दाढर्याभावेन निदिध्यासने प्रवृत्त्ययोगात् मननेन विषयदाढर्ये सति निदिध्यासने प्रवृत्त्युपपत्तेश्च। मननं प्रति च श्रवणं हेतुः, श्रवणमन्तरा विषयनिश्चयाभावे मननायोगात्। अतः भामतीमते प्रथमं श्रवणं ततः मननम्, तदनु निदिध्यासनम् तेन चापरोक्षज्ञानम्, अपरोक्षज्ञाने सति च मोक्षः इति क्रमः सङ्गच्छते। एवं भामतीकाराणां मतं बहुषु स्थलेषु विवरणप्रस्थानाद् भिद्यते इति दिङ्मात्रमिह दर्शितम्। यद्यपि भामतीप्रस्थाने विवरणप्रस्थाने च प्रक्रियानिरूपणे उपर्युक्तरीत्या केचन भेदा दृश्यन्ते तथापि यत् श्रीशङ्करभगवत्पादानां सम्मतं तत्त्वम्–

सच्चिदानन्दात्मकमेकमेव तत्त्वं पारमार्थिकम्, अन्यत् सर्वमनाद्यविद्याकल्पितमिति तत्र विषये सर्वेषामद्वैतवेदान्ताचार्याणामैकमत्यमेव। अत एव वार्त्तिके स्पष्टमुक्तम्–

यया यया भवेत् पुंसा व्युत्पत्तिः प्रत्यगात्मनि।
सा सैव प्रक्रियेह स्यात् साध्वी सा चानवस्थिता॥ इति।

तेदवमत्र श्रीवाचस्पतिमिश्रमहाभागाः श्रीशङ्करभगवत्पादानां भाष्यव्याख्याने प्रवृत्ताः कथं स्वकीयं विशिष्टं मतं श्रुतिस्मृतिपुराणोपबृहितं युक्तिसङ्गतं वर्णयन्तीति लेशमात्रं लेखेन प्रतिपादितम्।

सिद्धान्तरीतिषु मया भ्रमदूषितेन स्यादन्यथापि लिखितं यदि किञ्चिदत्र।
संशोधने सहृदया सदया भवन्तु सच्छास्त्रतत्त्वपरिशीलननिर्विशङ्काः॥

सन्दर्भग्रन्थाः–

1. भामती।
2. पञ्चपादिकाविवरणम्
3. शास्त्रसिद्धान्तलेशसङ्ग्रहः।
4. सङ्क्षेपशारीरकम्।
5. विवरणप्रमेयसङ्ग्रहः।
6. अद्वैतसिद्धिः।
7. ईशाद्यष्टोत्तरशतोपनिषदः।
8. सिद्धान्तबिन्दुः।
9. वेदान्तसूत्रमुक्तावली।

---

1. बृ.उ. 2.4.5
2. श्वे. उ. 1.3

सेम्युअल-टेलर-कॉलरिजप्रतिपादितानां काव्यशास्त्रीयसिद्धान्तानां विमर्शः

डॉ. सुमनकुमारझाः

Samuel Taylor Coleridge was Born on 21 October 1772 in England and Died 25 July 1834 , Aged-61 in England . He was a member of literary movement Known as Romanticism . His notable works are - The Rime of the Ancient Mariner, Kubla khan and Biographia Literaria. He was a great poet, a greatest literary critic, a thinker, and a philosopher .

Biographia literaria --- A great work on literary criticism. in addition to his poetry, Coleridge also wrote influential pieces of literary criticism including Biographia literaria -- A collection of his thoughts and opinions on literature which he published in 1817. The work delivered both biographical explanations of the author's life as well as his impressions on literature. The collection also contained an analysis of a broad range of philosophical principles of literature ranging from Aristotle to Kant and Schelling and applied them to the poetry or poets such as William Wordsworth .

पाश्चात्त्यसाहित्यिकसमालोचकेषु सेम्युअल-टेलर-कॉलरिजमहोदयस्याद्वितीयं स्थानं विद्यते। पाश्चात्त्यसाहित्यिकसमीक्षाक्षेत्रे कॉलरिजप्रतिपादिताः काव्यशास्त्रीयसिद्धान्ताः सर्वथा प्रथिता विश्रुताश्च सन्ति। तन्निरूपिताः साहित्यसमीक्षासम्बद्धविचाराः पाश्चात्त्यसाहित्यिकसमालोचनाया दशां दिशं च निधारयन्ति। स्वाभिनवचिन्तनेन कॉलरिजमहोदयः पाश्चात्त्यकाव्यशास्त्रस्येतिहासे प्रसिद्धिमवाप्तवान्। पाश्चात्त्यसमीक्षकैः चिन्तकैः कविभिश्च कॉलरिजमहोदयस्य विशिष्टमवदानमङ्गीक्रियते पाश्चात्त्यसाहित्यस्य साहित्यिकसमीक्षायाश्च विकासयात्रायाम्।

स्वच्छन्दतावाद 'Romanticism' इत्यस्या विचारधारायाः प्रवर्त्तकेष्वन्यतमोऽस्ति कॉलरिज-महोदयः। स्वच्छन्दतावादस्य पल्लवने विकासे च 'फिलिप-सिडनी' विरचितः 'एन एपोलोजी फॉर पोयट्री' An Apology for Poetry, शैलेमहोदयविरचितो 'डिफेंस ऑफ पोयट्री' Defence of Poetry, वर्ड्सवर्थमहोदयविरचितो 'लिरिकल-बैलेड्स' Lyrical Balleds, कॉलरिजविरचितो 'बायोग्राफिया-लिटरेरिया' Biographia Literaria, इत्यादयः पाश्चात्त्यसाहित्यिकसमीक्षाग्रन्था महत्त्वपूर्णा

वर्तन्ते। वस्तुतः एताभिः रचनाभिरेव पाश्चात्त्यजगति स्वच्छन्दतावादस्य विचाराः प्रसृताः। युगस्यास्य महान् कविः, बहुज्ञविद्वान् प्रख्यातचिन्तकः सुप्रसिद्धसमालोचकः श्रेष्ठसाहित्यमर्मज्ञः सूक्ष्मदर्शिततत्त्ववेत्ता साहित्य–दर्शन–मनोविज्ञानविषयाणां गहनाध्येता चासीत् कॉलरिजः।

'बायोग्राफिया लिटरेरिया' कॉलरिजमहोदयस्य सर्वाधिका प्रसिद्धा महत्त्वपूर्णा च रचना वर्तते। पाश्चात्त्यसाहित्यिकसमालोचनाया इयं महत्तमा कृतिरस्तीति आर्थर–साइमन्समहोदयस्य कथनम्– The greatest book of literary criticism in English. अरस्तू–लौन्जाइनसयोरनन्तरं कॉलरिज एव तृतीयो महनीयः पाश्चात्त्यसमीक्षक इति प्रसिद्धिर्वर्तते पाश्चात्त्यसाहित्यिकसमीक्षाजगति।

आलोचना– श्रेष्ठकवित्वेनोत्कृष्टसमालोचकत्वेन च कॉलरिजमहोदयस्य काव्यसिद्धान्तेषु साहित्यिकसमीक्षासम्बद्धविचारेषु च दर्शनकाव्ययोरद्भुतः समन्वय उपलभ्यते। आलोचनाया लक्ष्यसम्बन्धे यत्तेनोक्तं तेन तस्य स्वतन्त्रदृष्टिः परिलक्ष्यते। यथा–

The ultimate end of criticism is much more to establish the principles of writing than to furnish rules how to pass judgement on what has been written by others. Coleridge : Biographia Literaria.

अर्थात् आलोचनायाः चरमोद्देश्यं भवेत्– रचनासु सन्निहितानां सिद्धान्तानां लेखकविचाराणाञ्च प्रमुखरूपेण प्रतिपादनं प्रकाशनञ्च । अन्येषां साहित्यकृतीनां निर्णयार्थं नियमनिर्माणं सिद्धान्तप्रस्थापनञ्च आलोचनाया गोणोद्देश्यम्। आलोचनाया अन्तिमं लक्ष्यं भवेत् साहित्यसर्जनस्य सिद्धान्तप्रस्थापनम्। कॉलरिजमहोदयो लेखकेभ्यो नियमानुपालनं तावदावश्यकं न मनुते यावन्महत्त्वं रचनासु मौलिकतायै प्रतिभायै नवत्वाय च प्रददाति। तन्मते आलोचकस्य कर्त्तव्यं भवति रचनाप्रक्रियाया विवेचनं विश्लेषणं च, न तु श्रेष्ठरचनाया मूल्याङ्कनम्। कॉलरिजमहोदयस्य धारणाऽस्ति यत्– काव्यस्यावबोधाय काव्यसर्जनप्रक्रिया नूनमेव ज्ञातव्या । आलोचकेषु काव्यस्याभिव्यञ्जनाया ग्राह्यता भवेत्।

अत एव मौलिकतादृष्ट्या गाम्भीर्यदृष्ट्या च पाश्चात्त्यकाव्यशास्त्रस्येतिहासे कॉलरिजमहोदयस्य स्थानं मूर्धन्यमस्ति। यद्यपि कैश्चित् समीक्षकैः कॉलरिजमहोदयो जर्मनदेशस्थविदुषामनुकर्त्ता इति कथितः। यथा चोच्यते रैनेबैलकमहोदयेन – The general aesthetic position - The view of the relation between Art and Nature, the reconciliation of opposites, the whole dialectical scheme comes from Schelling . The distinction between symbol and allegory can be found in Schelling and Goethe . The distinction between genius and talent in Kant, the distinction between organic and mechanical, classical and modern, statuesqe and picturesque in A.W.Shlegal . तथाप्यनेकैः पाश्चात्त्यसमीक्षकै रचनाकारैश्च कॉलरिजमहोदयो मुक्तकण्ठेन प्रशंसितः सर्वतोभावेनाभिनन्दितश्च । यथा–

According to I.A.Richards -- Coleridge is the forerunner of the modern science of semantics.

While according to Sir Herbert Read -- He is head and shoulders above every other English critic .

According to Saintrbury - "so, then, there abide these three Aristotle, Longinus and Coleridge."

T.S. Eliot stated in his essay- Coleridge: Literary Criticism -- That he believed that Coleridge was perhaps the greatest of English Critics and in a sense the last.

काव्यस्वरूपम्– जर्मनदेशस्थविदुषां शिलर–श्लेगेल–शैलिंगमहोदयानां प्रभावेण कालरिजमहोदयेनापि **'काव्य'** शब्दस्य प्रयोगः सर्वाभ्यः कलाभ्यो मानवनिर्मितसमग्रकृतिभ्यश्च क्रियते। तन्मते दर्शनेतिहास–विज्ञानेष्वपि काव्यत्वं तिष्ठति, अर्थात् तत्रापि कवित्वं दृश्यते, यतः तेष्वपि विशिष्टकल्पनायाः प्रयोगो जायते। यद्यपि तेषु कवितालक्षणं न घटते, विशिष्ट–संघटना–कौशलाभावात्, यतो विशिष्टसंघटनाकौशलं काव्येभ्य आवश्यकमस्ति।

एकत्र तेन पोएजी (Poesy) पोयट्री (Poetry) इत्यनयोः पार्थक्यं प्रतिपादयता स्पष्टमुच्यते– पोएजी सर्वासां ललितकलानां प्रजातीयनाम (Generic Name) वर्तते, परं 'पोयट्री' शब्दस्य प्रयोगः ताभ्यः कृतिभ्यो भवेत्, यासां कृतीनां सर्जनं शब्दैर्भवति, अर्थात् यत्र सर्जने हेतुः शब्दो विद्यते। **कोलरिजमहोदयेन सङ्गीतं कर्णेन्द्रियकाव्यं, काव्यं चित्रकला च नेत्रेन्द्रियकाव्यं कथ्यते। असौ दर्शनेतिहासोपदेशविज्ञानानि च विशिष्टकल्पनायाः परिणामान् स्वीकरोति, अपि चैतेषु सर्वेषु साम्यं दर्शयति, भाषासर्जनहेतुत्वात्। परमुद्देश्यभेदात् तेषु पार्थक्यमपि स्थापयति।**

कॉलरिजमते रचनाया द्विधा लक्ष्यं भवति तात्कालिकं लक्ष्यम् (Immediate goal) अन्तिमं लक्ष्यं च (Ultimate goal)। विज्ञानेतिहास–दर्शनानां तात्कालिकं लक्ष्यमस्ति सत्यस्य प्रकटीकरणम्, परं काव्यस्य तात्कालिकं लक्ष्यमानन्दानुभूतिर्विद्यते। सत्यस्य बोधस्तु अन्तिमं लक्ष्यं भवति काव्यस्य।

कॉलरिजविरचितेषु काव्येषु स्वच्छन्दतावादस्य सर्वाः प्रवृत्तयः समुपलभ्यन्ते। तद्विरचितेषु काव्येषु रूपचित्रणस्य भव्याभिव्यक्तिर्जाताऽस्ति। कवितासु वर्णितस्य प्रत्येकस्य वस्तुन उपादानस्य च सफल–रूपचित्रणं तेन प्रस्तूयते। तद्विरचितेषु काव्येषु आनन्दोल्लासयोः दुःख–विषादयोर्भावानां सजीवं रूपं दृश्यते। तत्र कविपाठकयोर्भावानां तादात्म्यं स्वत एव स्थाप्यते। सन्दर्भेऽस्मिन् प्रो. बूचरमहोदयस्य कथनमस्ति यत्– चित्रवैचित्र्योत्पादनक्षमता–स्वाभाविकवाक्यविन्यास–शब्दसङ्गीतदृष्ट्या च कॉलरिजमहोदयो महाकविश्रेण्यां परिगण्यते। स्वच्छन्दतावादिनां काव्यधारा प्रकृतिमालम्बनत्वेन परिगृह्य प्रकृतिचित्रणस्य प्रामुख्यं निर्धारयति। अत एव कॉलरिजकृतिषु प्रकृतिचित्रणं प्रामुख्यं भजते। तत्र द्विधा प्रकृतिचित्रणपद्धतिर्दृश्यते। प्रथमपद्धत्या कविः प्रकृतेः तटस्थभावेन दर्शनं करोति, अनन्तरञ्च तां प्रकृतिं सूक्ष्मरूपेण चित्रयति। यदा कविः प्रकृतिप्रेरणया प्रकृतौ आत्मस्थो भूत्वा पूर्वं भावविह्वलया दृशा आत्मगतानां भावानां प्रतिकृतिं तत्र पश्यति, अनन्तरञ्च प्रकृतिं चित्रयति वर्णयति च, इयमस्ति द्वितीया

पद्धतिः। प्रकृतिचित्रणमिदं कवेः भावोद्रेकानुरूपं भवति। अनेन काव्येषु भव्यता रमणीयता चाऽऽगच्छति, फलतः काव्यं भव्यं रमणीयं मनोहरं हृद्यञ्च भवति।

कॉलरिजविरचितेषु काव्येष्वलौकिकतत्त्वानां भावपूर्णाभिव्यञ्जनायाः प्राचीनपरम्परायाश्च परिपालनं दृश्यते । तस्य प्रसिद्धा कविता– **'एन्शेंट मेरीनर'** अस्याः प्रवृत्तेः प्रबलमुदाहरणमस्ति। अत्र आत्मनः समुद्रयात्राया आकर्षकमद्भुतञ्च वर्णनमुपलभ्यते। अत्रत्यं काल्पनिकं चित्रणं पाठकेषु विस्मयमुत्पादयति। स्वभावोक्तिसंवलिता इयमपूर्वा कल्पना मनोवैज्ञानिकसम्प्रत्ययेनापि सम्पृक्ताऽस्ति। कॉलरिजमहोदयस्य कवितायाः सम्बन्धे आंग्लजगति इयं धारणा विद्यते यत् पाश्चात्त्यसाहित्येतिहसे– **'एन्शेंट मेरीनर'** सर्वाधिका महत्त्वपूर्णा कल्पनासंवलिता च काव्यकृतिरस्तीति।

श्रेष्ठकविगुणाः कविप्रतिभा च– कॉलरिजमहोदयः कवितां व्यक्तभाषायाः (Articulate) कलां कथयति। प्रायशः कवि–कवितयोः पार्थक्यं न मनुते, कदाचित्तु कविवर्णनेनैव कवितां परिभाषयितुमिच्छत्यसौ । तेन कविभ्यः प्रातिभज्ञानमनिवार्यं मन्यते, प्रतिभा–काव्यत्वयोर्मध्येऽभेदसम्बन्ध श्च स्वीक्रियते।

प्रतिभयैव काव्यसर्जनं भवति, प्रतिभां विना रचनासु नवत्वं नाऽऽगच्छति। कॉलरिजमते कविप्रतिभा एव काव्यरचनायाः हेतुः। प्रतिभाया अभावे कविचिन्तने मौलिकता न परिलक्ष्यते। अतः प्रतिभा एव कवेः सर्वप्रधानगुणः। प्रतिभावशादेव शैक्सपीयरमहोदय आदर्शकविरिति मन्यते तेन । प्रतिभा जन्मजातगुणोऽस्ति या कस्मिंश्चित् हृदये सौन्दर्यं दर्शयति सौन्दर्यबोधं कारयति सूक्ष्मानुभूतिक्षमतां चोत्पादयतीति प्रतिभायाः प्रथमं लक्षणम्। द्वितीयं लक्षणं भवति सार्वजनीनचिन्तनं निर्वैयक्तिकभावचित्रणं न त्वात्मनिवेदनम्। स्वपरिवेशसम्पृक्तो भावः काव्योत्कर्षे बाधको भवति। भावानां तीव्रता प्रतिभायाः तृतीयं लक्षणम्। अनेनैव बिम्बो जागर्ति, उद्बुद्धो भवति कल्पना च गतिशीला सक्रिया वा भवति। गम्भीरता ऊर्जस्विता च प्रतिभाया अन्यद् लक्षणं यत् गम्भीरज्ञानेन दर्शनेन च सम्भवति। अनेनैव महत्काव्यसर्जनं सम्भवति अपि चानेनैव काव्यं समग्र–मानवीयज्ञान–विचार–भाव–मनोवेग–भाषाणाञ्चोत्कर्षमुत्कृष्टरूपञ्च विभर्ति।

अन्ये ये गुणाः कविषु नूनमेव भवेयुः ते सन्ति– पद्यमाधुर्यं मूर्तिविधानं विचारगाम्भीर्यं सहृदयता भावावेगो विवेको निर्णयशक्तिः कल्पनाशक्तिः मानवता च। कॉलरिजमते कविः तत्त्ववेत्ता दार्शनिकश्च भवेत्। धार्मिकप्रवृत्तिरपि कवेर्महत्वपूर्णो गुणोऽस्ति यतः श्रद्धाविहीनकविः उन्मत्तो भवतीति तस्य विचारः। इतिहासज्ञानं प्रकृतिज्ञानञ्च कविभ्योऽभीप्सितो गुणो मन्यते तेन। तन्मते कविः निर्वैयक्तिकरूपेण (Impersonality) वस्तुपरकतया (Objectivity) च विश्वस्यावबोधं कुर्यात्, अपि च जगतो वर्णनमपि अनया रीत्यैव करणीयं स्व–निजत्वं तु सर्वदा सर्वथा च दूरे स्थापयेत्। यथा–
To have a genius is to live in the universal to know no self but that which is reflected not only from the flowers, the trees, the beasts yea from the very surface of the waters and Sands of the desert. Biographia Literaria.

इत्थमसौ कवितायां निर्वैयक्तिकभावानां प्रतिष्ठापनमिच्छति। कविभ्योऽपेक्ष्यते यत्ते स्वरचनासु निजभावादधिकं चतुर्दिक् व्याप्तस्य परिवेशस्य तटस्थभावेन वर्णनं कुर्युः। अनया रीत्या कवयो यथार्थस्याङ्कनेन सह एवंविधमेकं नवसर्जनं प्रस्तोष्यन्ति यत्र यथार्थवस्तुनिरूपणेन सह स्वकल्पनाशक्त्योद्भूतमेकं नवीनं तत्त्वमपि भविष्यति। परमेतत् सर्वं तेनैव कर्तुं शक्यते यो दार्शनिको निर्वैयक्तिकद्रष्टा सचेतनो विवेकपूर्णस्रष्टा च भवेत् यस्मिन् तीव्रानुभूतिरस्ति येन पाठकचित्तेषु स्वरचनया तीव्रभावावेग उत्पाद्येत। In another words the Poet is simply everything.

कवितायाः परिभाषा काव्यरचनाप्रक्रिया च–कॉलरिजमहोदयेन कविता इत्थं परिभाषिता– **It is the excitement of emotion for the purpose of Immediate pleasure, through the medium of beauty** अर्थात् **कविता सौन्दर्यबोधद्वारा सद्य आनन्दोद्रेकाय भावानुद्वेलयति। काव्यमेका विशिष्टा रचना मन्यते तेन यद्विज्ञानाद् भिन्नं भवति यतः काव्यस्योद्देश्यं साक्षादानन्दोद्रेको भवति न तु सत्यान्वेषणं यद्विज्ञानस्योद्देश्यं वर्तते।** तन्मते **सार्वजनीनत्वं सार्वकालिकत्वञ्चानिवार्यो गुणौ स्तः कवितायै।** अर्थात् **काव्यं सार्वकालिकं सार्वजनीनञ्च** भवेत्। अत एव आत्मनिवेदनादधिकं भावानां साधारणीकरणमनिवार्यम्। कवितायाः प्रभावसन्दर्भेऽसौ लिखति–

The poet brings the whole soul of man into activity with the Subordination of its faculties to each Other, according to their relative worth and dignity. Biographia literaria.

कॉलरिजमहोदयस्य विचारोऽस्ति यत्काव्येषु बुद्धि–हृदययोः सम्मिलनं भवेत्– **In Poetry should be union of heart and head.** कवितायां भावतत्त्वस्य प्राधान्यं भवेत्। **गहनभाव–गम्भीरविचारयोर्योगेनैव सोत्कर्षा भवति कविता। Union of Deep feeling with profound thoughts.** तन्मते कविताः पाठकचित्तेषु प्रभावोत्पादने समर्थाः स्युः। अर्थात् उत्तमोत्तमकाव्यसर्जनाय उद्यमसाध्यविचारावलेरभ्यासजन्यकाव्यशैल्याः बिम्बविधानस्यातिरेकवर्णनस्य च तादृशं महत्त्वं नास्ति यादृशं महत्त्वं भावस्य सततं प्रवहन्त्या अन्तर्धाराया भवति।

कविविचाराणां भावभूमिरेव साहित्यसर्जनस्य साहित्यरचनाप्रक्रियायाश्चाऽऽधारः। अनेनैव कविभिः साहित्यसर्जनं क्रियते। तन्मते अनुभूति–संवेदना–भावानां समन्वय एव काव्यरचनाया आधारो भवति। काव्यस्य सर्जनं भवेत् न तु पुनर्निर्माणमिति कॉलरिजमहोदयस्य विचारः–

Art can never be a mere slavish imitation or copying of Nature. In all art there is life, and not life, less than life and more than life. Art is imitation in Coleridge, but it is also symbolisation. imitation is, of course, not copying, not naturalism—is an infusion of the authors own knowledge and talent into external object. – Biographia Literaria.

The essence of poetry is universality. Good sense is the body of poetic genius, Fancy its drapery, motion its life and imagination the soul

that is everywhere and in each and forms all into one greaceful and intelligent whole—Biographia Literaria.

काव्यसर्जने कवीनां कृते सिद्धान्तानामनुपालनादधिकं महत्त्वमस्ति प्रतिभायाः कल्पनायाश्च। काव्यसर्जनप्रक्रिया प्रतिभया संचाल्यते। रचना-सर्जनकाले प्रतिभा सर्जनात्मक-कल्पनाऽधीना भवति न तु आत्मबोधस्था। अस्मात् कारणादेव योऽनुभवः सामान्यजनं न स्पृशति स एव प्रतिभाशालि-कविं सविशेषं न केवलं स्पृशति अपितु भावयत्यपि।

काव्यवस्तु कवि-व्यक्तित्वतः पूर्णनिरपेक्षं भवेदिति तन्मतम्। इदमेव प्रतिभायाः परिचायकम्। अनेन स्वात्मनिरपेक्षभावेनैव काव्यं सार्वजनीनं सार्वकालिकञ्च भवति। सार्वजनीनभावानामभिव्यक्त्यै साधनमुपकरणञ्चापेक्ष्यते। काव्येषु साधनं भवति-बिम्बप्रतिबिम्बविधानं प्रतीकयोजना व्यञ्जनावृत्तिश्च। तत्र बिम्ब-प्रतिबिम्बभावेन प्रतीक-योजनया व्यञ्जनावृत्त्या च भावा अभिव्यज्यन्ते। प्रतीकेन साध ारणमपि वस्तु विशिष्टं सञ्जायते। व्यञ्जनयैव उत्तमकाव्यस्य वारं वारं पठनेन दर्शनेनापि आह्लादो जायते। ततः प्रतिक्षणं प्रतिवारं नवीनसौन्दर्यं नवानन्दो नवीनाकर्षणञ्च प्राप्यते सामाजिकैः। **कविप्रतिभा एव कविहृदयस्थभावानां विचाराणां बिम्बानां प्रतीकानाञ्च संवर्द्धने परिपोषणे रूपपरिवर्तने च हेतुः।** सौन्दर्यतत्त्वं सत्य-भावयोर्मनोबुद्धयोर्मध्ये मध्यस्थत्वेन मन्यते तेन। तन्मते सौन्दर्यमेव प्रकृत्यात्मा-मानवात्मनोर्मध्ये मूक-संप्रेषणं स्थापयति।

The sense of beauty subsists in simultaneous intution of the relation of parts each to each, and of all to a whole Longuage, possion and character must act and react on each other—Biographia Literaria .

कल्पनातत्त्वम्-The essense of Poetry is imagination. कॉलरिजमते काव्यस्यात्माऽस्ति कल्पना। कविकल्पनयैव सर्जनं सम्भवति। कल्पना एका रचनात्मिका शक्तिः (A unifying creative faculty and beautymaking power) अस्ति यया कस्यापि विषयस्य विभिन्नपक्षाणां संश्लेषणमेकस्मिन् रूपे बिम्बे प्रतीके च क्रियते, अर्थात् संश्लिष्टान्वितिर्जायते।

कल्पनायाः स्वरूपनिर्धारणे वर्गीकरणे च विशिष्टमवदानमस्ति कॉलरिजमहोदयस्य। कॉलरिजमहोदयात्पूर्वं चिरकालात् **कल्पना (** Imagination **) रम्यकल्पना उत वा ललितकल्पना (** Fancy **) द्वेऽपि पर्यायत्वेन प्रयुज्येते स्म पाश्चात्त्यविचारकैः साहित्यसमीक्षकैश्च। सर्वप्रथमं कॉलरिजमहोदयेन तयोः पार्थक्यं प्रतिपादितम्। तन्मते कल्पना ललितकल्पना च सर्वथा भिन्ना शक्तिः। अनयोर्लक्षणव्यापारपरिणामाश्च सर्वथा पृथक् पृथक् भवन्ति। कॉलरिजमहोदयेन पुनः कल्पनाया द्वौ अवान्तरभेदौ मन्येते। मुख्यकल्पना प्राथमिककल्पना वा (** Primary imagination **) प्रतिनिधिकल्पना विशिष्टकल्पना वा (** Secondary Imagination **)।** द्वयोर्मध्ये पार्थक्यं मात्रात्मकमस्ति न तु गुणात्मकम्।

परं कल्पनाललितकल्पनयोर्मध्ये गुणात्मको भेदो दृश्यते। रम्यकल्पना बिम्बानां केवलं संयोजनं करोति, तस्मिन् समञ्जने सरसताया मार्मिकतायाश्चाभावो भवति। अर्थात् बिम्बानां

विचाराणां पदार्थानां वस्तूनाञ्च संग्रहो जायते ललितकल्पनया तया रूपनिर्माणं रूपपरिवर्तनञ्च न सम्भवति। तत्रैव कल्पनायाः कार्यमेकीकरणं समञ्जनं (Unifying and reconciling **) चास्ति। कल्पना बिम्बानां विचाराणां वस्तूनां च विघटनं कृत्वा तेषां रूपं परिवर्तयति। कल्पना बिम्बेषु भावोद्दीपनेन सह आभ्यन्तरिकं सामञ्जस्यं स्थापयति तत्र ऐक्यमेकरूपत्वञ्च आनयति स्थापयति वा, परं रम्यकल्पना केवलं निश्चित-वस्तूनां स्थिर-विचाराणां प्रयोगं करोति अपि च साहचर्यनियमानुसारेण तेषामेकत्रीकरणं करोति।**

रम्यकल्पनायाः स्रोतो निश्चितम्, सा केवलं स्मृतावााश्रिताऽस्ति, स्मृत्यैव स्वसामग्र्यः प्राप्यन्ते। परं कल्पना प्रेरणा (Inspiration) अवधारणाद्यनेकेभ्यः स्रोतोभ्यः (Perception) स्वसामग्रीसङ्ग्रहणं करोति। कल्पनायाः कार्यपद्धतिः सततप्रवहमाणा भवति। परं रम्यकल्पनायाः कार्यपद्धतिः निश्चेतना जडा च भवति यान्त्रिकत्वात् निर्जीवत्वाच्च। कॉलरिजमहोदयेन प्रतिभा प्रज्ञायाः (Talent) उन्नता श्रेष्ठा विशिष्टा च मन्यते, तथैव कल्पना (Imagination) ललितकल्पनायाः (Fancy) श्रेष्ठा विशिष्टा चावबुध्यते। यथा प्रतिभा प्रज्ञायाः साहाय्यमपेक्षते तथैव कल्पना ललितकल्पनायाः। तथापि द्वे भिन्ने शक्ती (Faculties) स्तः। कल्पनायाः सम्बन्ध आत्मना मनसा च साकमस्ति, ललितकल्पनायाः सम्बन्धः बुद्ध्या सह भवति। कल्पना आत्मिका भवति, रम्यकल्पना च यांत्रिकी। ललितकल्पना वस्तूनां संग्रहणं करोति- तत्रानुपातः क्रमोऽन्वितिश्च न दृश्यते। असंहतानां वस्तूनां केवलमेकत्रीकरणं करोति- The Materials lie ready formed for the mind and the fancy acts only by a sort of Juxtaposition. यथा स्वप्नावस्थायां जनाः नैकेषु विचारेषु विचरन्ति, विचरन्तश्च तेषां विचाराणामेकत्रीकरणं तु कुर्वन्ति, परं तेषु विचारेषु क्रमबद्धतामन्वितिञ्च स्थापयितुं न शक्नुवन्ति। एवमेव ललितकल्पना पदार्थानामेकत्रीकरणमात्रं कर्तुं शक्नोति। काव्योचितगुणस्याभावे सा जडा मन्यते। ललितकल्पना स्मरणस्येका रीतिर्विद्यते। स्पैन्सरमहोदयस्य कवितायां ललितकल्पनायाः प्राधान्यमस्ति किन्तु मिल्टन-शैक्सपीयरयोः काव्येषु कल्पनायाः प्राधान्यं परिलक्ष्यते। इत्थमसौ स्थापयति यत्कल्पना न केवलं काव्यसर्जनायैवापितु श्रेष्ठसमालोचनायापि अत्यधिकं महत्वपूर्णाऽस्ति

निष्कर्षः- कॉलरिजमहोदयस्य समीक्षासिद्धान्तो भावबोधयोः समवाये आधारितोऽस्ति। तन्मते भावानुभूतेरारभ्य बोधे परिशमनं काव्यस्य काव्यालोचनायाश्च परिणतिः। तेन सर्वप्रथमं साहित्यिकसमालोचनायां मनोविज्ञानशब्दस्य तत्सम्बद्धावधारणायाश्च प्रयोगः क्रियते। कॉलरिजप्रतिपादिताः कवि-कविता-काव्यशक्ति-काव्यप्रभावादिसम्बद्धसिद्धान्ताः महत्त्वपूर्णाः सन्ति। शेक्सपीयर-वर्ड्सवर्थयोः काव्यकृतीनां कॉलरिजकृता समालोचना आँग्लजगति व्यावहारिकसाहित्यिकसमीक्षाया आदर्शरूपत्वेन समादृताऽस्ति।

वस्तुतः साहित्यिकसमीक्षासम्बन्धे कारयित्री भावयित्री च प्रतिभे परस्परं पूरकत्वेन विद्येते इति कॉलरिजमहोदयस्य विचारः। कोलरिजमहोदयस्य साहित्यिकसमालोचनासम्बद्धविचाराणामध्ययनाय तद्विरचितानां काव्यकृतीनामनुशीलनमावश्यकम्, एवमेव तद्विरचितानां काव्यानामवबोधाय तन्निरूपितानां साहित्यिकसमीक्षासिद्धान्तानां परिशीलनमपेक्षितमस्ति।

1. Coleridges Litrary Criticism- By J.W.Mackail- London- 1921, University of north Corolina.
2. en. Wikipedia.org. Samual- Tayler- Coleridge.
3. Internat Archive.
4. Western litrary Criticism- From plato to present by A Habib.
5. The use of poetry and the use of criticism—By T.S. Eliot, Faber and Faber—3 Queen square, London.
6. Coleridge and Abhinavgupta – Dr Shrikrishna mishra.
7. पाश्चात्यकाव्यशास्त्र के सिद्धान्त– डॉ.शान्तिस्वरूपगुप्त, प्रकाशकः, अशोकप्रकाशन, दिल्ली–6 ।
8. पाश्चात्यकाव्यशास्त्र के सिद्धान्त–डॉ. मैथिलीप्रसादभारद्वाज, हरियाणा साहित्य अकादमी, चण्डीगढ़।
9. भारतीय एवं पाश्चात्यकाव्यशास्त्र– डॉ.बच्चन सिंह, हरियाणा साहित्य अकादमी, चण्डीगढ़।
10. पाश्चात्यकाव्यशास्त्र की परम्परा – डॉ. नगेन्द्र ।
11. पाश्चात्यकाव्यशास्त्र– डॉ. भगीरथ मिश्र ।
12. पाश्चात्यकाव्यशास्त्र –प्रो. देवेन्द्रनाथ शर्मा ।

श्रीमद्भागवते सृष्टिवर्णनम्

डॉ. शीतलाप्रसादशुक्लः

वैदिककालादेव क्रान्तदर्शिनाम् ऋषीणां मनसि सृष्टिविषयकजिज्ञासा समारब्धा। यतोहि ऋग्वेदस्य नासदीयसूक्ते–

को अद्धा वेद क इ प्रवोचत्।
कुत आजाता कुत इयं विसृष्टिः॥[1]

इयं सृष्टिः कुत आयाता? कथं समुत्पन्ना? मनीषिणां मनांसि विचिकित्सा भवति स्म। पूर्णप्रज्ञासम्पन्नजिज्ञासायाः ऋतम्भरया प्रज्ञया प्रशमनं कृतम्। यतोहि सर्वेषु पुराणेषु पञ्चलक्षणेषु प्रथमलक्षणत्वेन सर्गवर्णनमेव निरूपितम्। उक्तं हि–

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम्॥[2]

सर्गवर्णनक्रमे एव महापुराणेषु सृष्टिप्रक्रिया निरूप्यते। पुराणेषु लिखितमतमस्ति - सर्वस्रष्टा परमात्मा ब्रह्माण्डे स्वेच्छया स्वलीलां विस्तारयति संहरति च। यदा तस्येच्छा भवति बहु एकोऽहं भवेयं तदा स वदति–"एकोऽहं द्वितीयो नास्ति"।[3] यदा स एकस्मात् बहुत्वमिच्छति तदा ब्रवीति–"एकोऽहं बहुष्याम्"।[4] सृष्टिप्रक्रियायाः पुराकाले यदा न सदासीत् नासत्तदा[5] स एकात्मा पूर्णब्रह्म एव सर्वत्र सर्वथा च विराजते स्म।

सृष्टिविस्तारकाले वृत्तिभेदेभ्यो यदनेकत्वं दृश्यते तदपि परमात्मतत्वं तस्य मूलत्वेनासीत्। भगवानेक आसेदमग्र आत्माऽऽत्मनां विभुः। आत्मेच्छानुगतावात्मानामित्युपलक्षणः॥[6]

श्रीमद्भागवते सृष्टिसृष्ट्युत्पत्तिविषये उल्लिखितम्– त्रैगुण्यां प्रकृतौ यदा गुणाः क्षुब्धाः भवन्ति तदा महत्तत्वमुत्पद्यते। महतः त्रिविधाः अहंकाराः जायन्ते, ते सन्ति तामसः राजसः वैकारिकः (सत्त्विकः), अहंकारेभ्यः पञ्चतन्मात्राः इन्द्रियसमूहः विक्षेपाश्च समुत्पद्यन्ते। एष उत्पत्तिक्रम एव

1. ऋग्वेदनासदीयसूक्त–6–10/129
2. विष्णुपुराण –3/6/24
3. मार्कण्डेय पुराण श्रीदुर्गासप्तशती 10/5
4. छान्दोग्योपनिषद–6/2/1/3
5. नासदीय सूक्त ऋग्वेद–10/129
6. श्रीमद्भागवतमहापुराण–3/5/23

सर्गत्वेन प्रथितः। उक्तञ्च–

अव्याकृतगुणक्षोभान्महत स्त्रितयोऽहम्।
भूतमात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते।।[1]

श्रीमद्भागवतस्य तृतीयस्कन्धस्य षड्विंशेऽध्याये भगवान् कपिलः यः भगवतः अवतारेषु गण्यते स्वमात्रे देवहूत्यै सृष्टिप्रक्रियायाः व्याख्यानं करोति। ध्यातव्यमस्ति महर्षिः कपिल एव सांख्यदर्शनस्य आदिमः प्रणेता मन्यते। तेनोक्तम्– त्रिगुणात्मिका, अव्यक्ता, नित्या, कार्यकारणरूपिणी, निर्विशेषा प्रधानप्रकृतितत्त्वं यदन्यसम्पूर्णविशेषधार्माणामाश्रयः।

यत्तत्रिगुणमव्यक्तं नित्यं सदसदात्मकम्।
प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत्।।[2]

पञ्चमहाभूतानि, पञ्चतन्मात्राः, चत्वारि अन्तःकरणानि, दशेन्द्रियाणि एतानि चतुविंशतितत्वानां समूहः विद्वद्भिः प्रकृतेः कार्यं मन्यते।

पञ्चभिः पञ्चभिर्ब्रह्म चतुर्भिदर्शभिस्तथा।
एतच्चतुविंशतिकं गणं प्राधानिकं विदुः।।[3]

अस्मिन् विषये भागवते कथितम्–

मनोबुद्धिरहंकारश्चित्तमित्यन्तरात्मकम्।
चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया।।[4]

अत्र ध्यातव्यमस्ति करणानि द्विविधानि भवन्ति बाह्यकरणानि अन्तः करणञ्च। इन्द्रियाणि बाह्यकरणानि अन्तःकरणमेकमेव परं चतुर्धा विभक्तम् मनः, अहङ्कारः, चित्तं बुद्धिश्च। यदा तन्मनुते मनः भवति, यतोहि सङ्कल्पात्मकं मनः सत्तायाः विज्ञाने अहंकरोति इति अहङ्कारः विचारात्मकः, चत्वारि अन्तःकरणानि कथितानि। पृथिव्यप्तेजोवाय्वाकाशाः पञ्चमहाभूतानि–

महाभूतानि पञ्चैव भूरापोऽग्निर्मरुन्नभः।
तन्मात्राणि च तावन्ति गन्धादीनि मतानि मे।।[5]

श्रोत्रं, त्वक्, चक्षुः, रसना, नासिका, वाक् पाणिः, पादः, पायुः, उपस्थश्च दशेन्द्रियाणि भवन्ति।

1. श्रीमद्भागवतमहापुराण–12/7/11
2. श्रीमद्भागवतमहापुराण–3/26/10
3. श्रीमद्भागवतमहापुराण–3/26/101
4. श्रीमद्भागवतमहापुराण–3/26/14
5. श्रीमद्भागवतमहापुराण–3/26/12

इन्द्रियाणि दश श्रोत्रं त्वग्रसननासिकाः।
वाक्करौ चरणो मेदं पायुर्दशममुच्यते॥[1]

एवं प्रकारेण श्रीमद्भागवतमहापुराणे चतुर्विंशति तत्वानि गणितानि । कालो पञ्चविंशतितमम् तत्वम्। केचिद्विद्वांसः काल एव पुरुष ईश्वरः वा एवं मन्यन्ते–

एतावानेव सङ्ख्यातो ब्रह्मणः सगुणस्य ह।
सन्निवेशो मया प्रोक्तो यः कालः पञ्चविंशकः॥[2]

यतोहि ईश्वरेच्छयैव निश्चलप्रकृतौ गुणानां साम्यवस्थायां गतिरुत्पद्यते अत एव विशिष्टकार्यकारी पुरुषरूपः सः काल ईश्वर एव। एवं प्रकारेण स्वमायया जीवनामन्तःकरणे बहिश्च कालरूपेण संव्याप्तः परमात्मा एव पञ्चविंशतितमं तत्वमिति। यथोक्तं श्रीमद्भागवते–

प्रकृते गुणसाम्यस्य निर्विशेषस्य मानवि।
चेष्टा यतः स भगवान् काल इत्युपलक्षितः॥
अन्तः पुरुषरूपेण कालरूपेण यो बहिः।
समन्वेत्येष सत्वानां भगवानात्मायया॥[3]

श्रीमद्भागवतस्यैकादशस्कन्धस्य द्वाविंशतितमेऽध्याये श्रीकृष्णोद्धवसंवादे उद्धवः पृच्छति यत् हे विभो! सृष्टितत्त्वानां विषये ऋषीणां विचारेषु भिन्नता दृश्यते। केचित् पञ्चविंशतिः केचन सप्त अन्ये नव, षड्, चत्वारि, एकादश, सप्तदश, षोडश, पञ्च, त्रीणि, त्रयोदश, अष्टाविंशतिः वा तत्त्वानि मन्यन्ते। एतत् कथम् ? तदा भगवान् श्रीकृष्णः ऋषीणां विविधेषु मतेषु पृथक्–पृथक् विचारं कृत्वा स्वमतं प्रकटितवान्। सर्वेषां तत्वज्ञानिनाम् ऋषिणां विचाराः समादरयोग्याः वर्तन्ते प्रयोजनवशाद् दृष्टिवशादेव तत्र भेदाः। श्रीभगवतः मतमुल्लिख्यते–

इति नाना प्रसंख्यानं तत्वानामृषिभिः कृतम्।
सर्वन्याय्यं युक्तिमत्वाद् विदुषां किमशोभनम्॥[4]

सृष्ट्युत्पत्तिविचारस्य पश्चात् सृष्टेर्वैविध्यं महापुराणेषु वर्णितम्। श्रीमद्भागवते दशधा सृष्टिर्निरूपिता या प्रवाहचित्रमाध्यमेन द्रष्टव्या–

महत्सृष्टिः– इदं जगत् सर्वदा ब्रह्मरूपेण भगवतः मायया लीनं परमात्मनि श्रीकृष्णे एव तिष्ठति। तदेवाव्यक्तकालमूर्त्या पृथक् पृथक् प्रकटीभवति। कालद्रव्यगुणभेदैः प्रथमतः महत्तत्वस्य सृष्टिर्भवति।[5] अनेन भगवत्प्रेरणया सत्वादिगुणेषु वैषम्यं जायते। गीतायां महच्छब्दो बुद्धितत्वस्य

1. श्रीमद्भागवतमहापुराण–3/26/13
2. श्रीमद्भागवतमहापुराण–3/26/15
3. श्रीमद्भागवतमहापुराण–3/26/17–18
4. श्रीमद्भागवतमहापुराण–1/12/25
5. श्रीमद्भागवतमहापुराण–3/10/14

बोधकः कथितः।[1] सांख्यदर्शने महत्तत्त्वं बुद्धिर्वा प्रकृतिपुरुषयोः संयोगस्य प्रथमः परिणामः कथितः।[2]

अहंकारसृष्टिः – द्वितीया अहंकारसृष्टिवर्तते यस्मिन् पृथिवीजलवह्निनभोवाय्वेति पञ्चभूतानि सृज्यन्ते। एतानि सूक्ष्मरूपेणैव वर्तन्ते। अत्र द्रव्याणां ज्ञानं क्रियया उदयश्च भवति।[3]

द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः।

भूतसर्गः – तृतीया भूतसृष्टिः पञ्चतन्मात्राणां सृष्टिर्वर्तते। पृथिव्यादिपञ्चभूतानामत्यन्तसूक्ष्मावस्थाः तन्मात्राः कथ्यन्ते। भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान्।[4]

सांख्यकारिकानुसारेण तन्मात्राः सन्ति– शब्दस्पर्शरूपरसगन्धाः।[5]

ऐन्द्रियसर्गः – चतुर्थीसृष्टिः इन्द्रियसम्बन्धिसृष्टिर्भवति। सांख्यशास्त्रेऽस्मिन् विषये वर्णितमस्ति यदत्र अहंकारस्य तामसरूपेणेन्द्रियाण्युद्भवन्ति। राजसरूपस्य उभयोः सृष्टौ समानरूपेण क्रियाशीलता भवति। भागवते उक्तमस्ति–

चतुर्थ ऐन्द्रियः सर्गो यस्तु ज्ञानक्रियात्मकः।[6]

देवसर्गः– पञ्चमीसृष्टिरिन्द्रियाधिष्ठातृदेवानां सात्विकाहंकारादुत्पन्नानां भवति मनोप्यस्मिन् सन्निविष्टम्। भागवते लिखितम्–

वैकारिको देवसर्गः पञ्चमो यन्मयं मनः।[7]

एषः देवसर्ग एव वैकारिकसर्गरूपेणापि सुविख्यातः।

तमसः सर्गः – षष्ठसृष्टिः तमसः वर्तते। अत्र अविद्यायाः पञ्चपर्वाणि सन्ति, तमः (अज्ञानं), मोहः, महामोहः (भोगेच्छा), तामिस्रः (क्रोधः), अन्धतामिस्रः (अभिनिवेशः) च।

षष्ठस्तु तामसः सर्गो यस्त्वबुद्धिकृतः प्रभो।[8]

उपर्युक्तषट्सर्गाः प्राकृतसर्गाः कथ्यन्ते यतो ह्येते सर्गाः अबुद्धिपूर्वकाः निसर्गतः एव भवन्ति।[9] एषां कृते ब्रह्मणः चिन्तनस्यापि आवश्यकता न भवति।

मुख्यसर्गः – सप्तमीसृष्टिः प्रधानवैकृतसृष्टिः कथ्यते। अस्यां षड्विधस्थावरवृक्षाणां सृष्टिर्भवति। एते स्थावराः सन्ति–वनस्पतिः, ओषधिः, लता, त्वक्सारः, वीरुधः, द्रुमाः। एतेषु प्रायशः ज्ञानशक्तिर्नविद्यते।

1. गीता–14/13
2. सांख्यकारिका–22
3. श्रीमद्भागवतमहापुराण–3/10/15
4. श्रीमद्भागवतमहापुराण–3/10/15
5. सांख्यकारिका–22
6. श्रीमद्भागवतमहापुराण–3/10/16
7. श्रीमद्भागवतमहापुराण–3/10/16
8. श्रीमद्भागवतमहापुराण–3/10/17
9. शिवपुराण–1/12/18

उक्तञ्च भागवते–

सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां च यः।
वनस्पत्योषधिलतात्वक्सारा वीरुधो द्रुमाः॥
उत्स्रतसस्तमः प्रायः अन्तःस्पर्शाः विशेषिणः॥[1]

ये स्थावराः मञ्जरीं विना फलन्ति ते वनस्पतयः यथा वटादयः ये पक्वेषु फलेषु नश्यन्ति ते ओषधयः गोधूमचणकादयः, यथा ब्रह्मादयः ये पृथिव्यामेव चतुर्दिक् विकसन्ति, ते खर्बुजादयः, येषां त्वचः अतिकठोराः वीरुधः भवन्ति ते त्वक्साराः, वंशादयः ये समञ्जरिकाः फलन्ति ते द्रुमाः यथा आम्रजम्ब्वादयः। एषा सृष्टिः ब्रह्मणः धयानान्तरं सञ्जाता, ज्ञानशून्या, तमोमयी चासीत्।

तिर्यक्सृष्टिः – अष्टमी सृष्टिः तिर्यग्गमनशीलानां प्राणिनामासीत्। अस्मिन् सर्वे पशवः पक्षिणश्चासन्। एते तमोगुणप्रधानाः विवेकशून्याः, घ्राणमात्रेण पदार्थज्ञाः, आहारनिद्राभयमैथुनकारिणः, अहंकारयुक्ताश्च भवन्ति। एतेषामष्टाविंशतिप्रकाराः भवन्ति। उक्तञ्च–

तिरश्चाष्टमः सर्गः सोऽष्टाविंशद्विधो मतः।
अविदो भूरितमसो घ्राणाज्ञा हृद्यवेदिनः॥[2]

एतेषु गौः, अजः, महिषः, कृष्णमृगः, सूकरः, गवयः, रुरुमृगः, एडकः, उष्ट्रश्च द्विशफाः, शरभः, चामरी, चैकशफाः, पशवः सन्ति। कुक्कुरः, शृगालः, वृकः, व्याघ्रः, विडालः, शशकः, शल्लकः, सिंहः, कपिः, गजः, कूर्मः, गोधा, मकरादयश्च अन्ये पशवः। कङ्कः, गृध्रः, वटः, श्येनः, भासः, भल्लूकः, बर्हिणः, हंसः, सारसः, चक्रवाकः, काकः, उलुकाश्च, खगाः कथ्यन्ते।[3] एतज्जङ्गमसृष्टेः प्रथमं रूपमवर्तत।

मानवसृष्टिः – विधातुः नवमी सृष्टिः मानवी सृष्टिरभवत्। अस्याः आहारेन्द्रियनिम्नमुखी भवति। मानवाः रजोगुणप्रधानाः कर्मपरायणाः दुःखरूपविषयेष्वेव सुखमानिनः भवन्ति। कथितञ्च–

अर्वाक्स्रोतस्तु नवमः क्षन्तरेकविधो नृणाम्।
रजोऽधिकाः कर्मपराः दुःखे च सुखमानिनः॥[4]

भागवते मानुषी सृष्टिरेकधैव कथिता। अनेन सिध्यति सर्वेषां देशानां लोकानाञ्च मनुष्या एक एव। ये तेषु भेदाश्च ते मानवनिर्मिताः परिस्थितिजन्या वा न तु विधातृकृताः। रजस आधिक्येऽपि सत्वगुणोपस्थित्या मानवेषु केचिद् ब्रह्मज्ञानिनः भवन्ति। एषा त्रिविधा वैकृतसृष्टिर्वर्तते। देवानां सृष्टिरपि वैकृता एव।[5]

1. श्रीमद्भागवतमहापुराण–3/10/18–19
2. श्रीमद्भागवतमहापुराण–3/10/20
3. श्रीमद्भागवतमहापुराण–3/10/21–24
4. श्रीमद्भागवतमहापुराण–3/10/25
5. श्रीमद्भागवतमहापुराण–3/10/26

देवाः अष्टविधाः सिद्धाः यक्षरक्षांसि
चारणाः भूतप्रेतपिशाचाश्च विद्याधरकिन्नराश्च॥[1]

कौमारसर्गः– दशम्यां सृष्टौ कौमारसर्गे तूभयोः गुणास्तिष्ठन्ति।[2] उभयात्मके कौमारसर्गे कः गणनीयः इति विषये विद्वत्सु मतवैविधयं जायते। केचन मन्यन्ते यत् कौमारशब्देन सनत्कुमारस्योदयस्य संकेतः। यतोऽहि–

स एव प्रथमं देवः कौमारं सर्गमास्थितः।
चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखण्डितम्॥[3]

अतः भगवद्ध्यानजन्या कुमारसृष्टिः भगवज्जन्यापि वर्तते, सैवोभयात्मिका।[4] वल्लभाचार्योपि कुमारदेवः मानवाश्च मत्वा इदं मतमेव समर्थितवान्। परन्तु भागवतस्य व्याख्याकारः श्रीशुकदेवः सनत्कुमारं मानववर्गे न गणयति।

एवं प्रकारेण दशधा सृष्टिः श्रीमद्भागवते वर्णिता सा चान्यपुराणैः दर्शनैश्च समर्थिता।

सृष्टिः

- प्राकृतसृष्टिः
  1. महत्सृष्टिः
  2. अहंकार सृष्टिः
  3. भूतसर्गः
  4. ऐन्द्रियसर्गः
  5. देवसर्गः
  6. तमसः सर्गः
- वैकृतसृष्टिः
  1. मुख्यसर्गः
  2. तिर्यक्-सृष्टिः
  3. मानवसृष्टिः
- प्राकृतवैकृतसृष्टिः
  1. कौमारसर्गः

---

1. श्रीमद्भागवतमहापुराण–3/10/27–28
2. श्रीमद्भागवतमहापुराण–3/10/26
3. श्रीमद्भागवतमहापुराण–1/3/6
4. श्रीमद्भागवतमहापुराणविश्वनाथचक्रवर्तेः व्याख्या–3/10/26

पाण्डुग्रन्थानामन्वेषणे प्राच्य-प्रतीच्यविदुषां योगदानसमीक्षा

डॉ. ज्ञानधरपाठकः

आचार्यचाणक्यस्य समेकीकृताखण्डभारतस्य फलीभूतस्वप्नस्यैतिह्यमत्यन्तं गौरवास्पदमासीत्। देशेऽस्मिन् दुग्धनद्यः प्रवहन्तिस्म, स्वर्णपक्षिण उड्डयन्तिस्म इति उपलक्षणत्वात् स्थापितो वर्तते ऐतिह्यगौरवम्- ''गायन्ति देवा किल गीतकानि। धन्यास्तु ते भारतभूमिभागे।'' अस्यां भूमौ ये निवसन्ति ते धन्याः सन्ति भाग्यवन्तः सन्ति। बहुभाषाभाषि बहुजातिधर्मवासिक्षेत्रे च सौहार्देन समृद्ध्या निवसन्तो जनाः ससुखं कालं व्यतीतवन्त आसन्। तेषां समृद्धिं दृष्ट्वा वैदेशिकाः मुहम्मदगोरी-महमूदगजनवीप्रभृतयः धनलोलुपाः लुण्ठकाः भारतभूमौ समायाताः, धनं गृहीत्वा ते गताः इति इतिहासे प्रसिद्धं वर्तते। सोमनाथमन्दिरस्य धनहरणं को न जानाति। अनन्तरकाले ये वैदेशिकाः भारतभूमौ आगताः ते धनं हृत्वा न गताः, अपितु भारते एव शासनं चक्रुः। तदानीन्तने काले शासनकर्मणि व्यापृताः औरंगजेब-बाबर-बख्तियारखिलजी प्रभृतयः शासकाः धर्मान्तरणं बलात् कारितवन्तः सहैव ग्रन्थालयानग्निसात् अकुर्वन् नालन्दाविश्वविद्यालयस्य ग्रन्थालये षड्मासपर्यन्तमग्निः प्रज्वलितः आसीदनेनैव ज्ञायते कीदृशी ज्ञानपरम्परातीतकाले सुरक्षिता आसीत्। प्रायः अष्टशतवर्षपर्यन्तं पराधीने भारते साहित्यस्य ह्रासो जातः ग्रन्थनिर्माणमवरुद्धम्।

ब्रिटिशशासनकाले केचन आंग्लशासकाः वैदेशिकाः आचार्याः भारतीयसाहित्यं प्रति रुचिं प्रदर्शितवन्तः। परम् अस्मिन् कालेऽपि मैकाले सदृशाः शासकाः भारतीयसाहित्यविरोधिनः आसन् । अनुमन्यते यद् भारतीयं साहित्यं दृष्ट्वा केचन वैदेशिकाः भारतीयाचार्याणां सविधे गत्वा परम्परामनुसृत्य भारतीयसाहित्यस्य ज्ञानमधिगतवन्तः। तेषु चार्ल्स विल्किन्सः प्रथमः यूरोपीयविद्वान् आसीद् यः भारतीयशिलालेखानामध्ययनं कृत्वा कांचन अंशानादाय आंग्लभाषायामनुवादं प्रकाशितं कारितवान्। सर विलियम जोन्सः भारते प्रख्यातन्यायाधीशो भूत्वा बंगप्रदेशे एशियाटिकसोसायटी आफ बंगाल इत्यस्य स्थापनां कृतवान्। अयं प्रथमः आंग्लविद्वान् आसीद् यः संस्कृतग्रन्थानां सम्पादनस्य प्रकाशनस्य च श्रेयमवाप्तवान्। अनेन 1792 तमे वर्षे ऋतुसंहारनामकग्रन्थस्य मुद्रणं कारितवान्। हेनरीटॉमसकालब्रुकः सप्तदशवर्षायुषे काले भारते आगत्याधीत्य संस्कृतं नैके ग्रन्थाः अनुदिताः। सः भारतीयपाण्डुलिपीनां संग्रहं कृत्वा तं संग्रहं ईस्ट-इण्डिया-आफिस-आफ-लंदनस्य पुस्तकालयाय प्रदत्तवान्।[1]

प्राचीनाः हस्तलिखितग्रन्थाः- भारतीयपाठालोचनस्य भूमिका नामके ग्रन्थे द्वितीये परिशिष्टे हस्तलिखितमहत्त्वपूर्णग्रन्थानां विवरणं वर्तते 1. भक्षाली, 2. बाबेर, 3. तुरफान, 4. गिलगित, 5.

1. वैदिकसाहित्यस्येतिहासः पृ.सं. 16-17 पुनर्मुद्रितसंस्करणम् 1987 चौखम्बासुरभारतीप्रकाशनम्, वाराणसी

गाडफ्रे, होरियूजी, 6. खरोष्ठी, 7. मैकार्टने कलेक्शन ऑफ फ्रैगमेन्ट्स । परमानुरागिण शर्मण्यदेशीयेन वेदविद्या विदुषा (१८३३-१९००)ई. स्वीये भारताद् 'वयं किं शिक्षितुं प्रभवाम:? (इण्डिया: ह्वाट केन टीच अस)' नामके ग्रन्थ एकत्र कथितमस्ति यत् **'समस्ते संसारे ज्ञानिनां पण्डितानां च देशो भारतमेवैक ईदृशो देशोऽस्ति यत्रत्या विपुला ज्ञानसम्पदा हस्तलिखितपुस्तकानां रूपेण सुरक्षिताऽस्ति।'** मैक्समूलरमहोदयस्येयं वाणी पाश्चात्त्यविद्वद्भ्यो वरदानस्वरूपाऽसिद्ध्यत् तथाऽदम्येनोत्साहेन ते भारतीयज्ञानस्यान्वेषणे संलग्ना:।[1]

अतिप्राचीनकालात् संरक्षिता संगृहीता चेयं भारतस्य विपुला ग्रन्थ-सम्पदा हिमालयादारभ्य कन्याकुमारीपर्यन्तं भारतस्य सर्वेष्वञ्चलेष्वपरिमितायां संख्यायां विकीर्णा विद्यते, वयमिदं विज्ञाय विस्मिता भवामो यदिमानि हस्तलिखितानि पुस्तकानि जापान-जर्मन-ब्रिटेन-प्रभृतिदेशेषु बहुधा सुरक्षितानि सन्ति।

एतेषां मूल्यवतां प्राचीनग्रन्थानां दुर्लभ-कलाकृतीनाञ्च गवेषणे पाश्चात्यविद्वांस एव अधिकमुत्साहवन्तोऽवर्तन्त। १७८४ तमे ईशवीये वर्षे 'रायल एशियाटिक सोसाइटी' संस्थाया: स्थापनाऽभवत्। तन्माध्यमेन भारते संस्कृत-पाण्डुलिपीनामन्वेषणकार्यं प्रारभत। अस्या: संस्थाया ग्रन्थ-संग्रहस्य प्रथमा सूची १८०७ तमे वर्षे लन्दन-नगरात् प्रकाशिता यां सरविलियमजोन्सस्तथा तदीया धर्मपत्नी निरमाताम्।[2]

संस्कृतस्य मर्मज्ञो विद्वान् कोलब्रुक: (१७६५-१८३७ ई.) स्वस्या अन्वेषणपूर्णाया अभिरुचे: कारणात् १८०७ तमे वर्षे 'एशियाटिक सोसाइटी ऑफ बंगाल' संस्थाया: सभापतिपदे नियुक्तौ सत्यामेव सहस्रशो भारतीया: पाण्डुलिपीर्विनाशादरक्षत्। तै: सङ्गृहीतानां तथा साम्प्रतम्-इण्डिया आफिस-लन्दने सुरक्षितानां मातृकाणां विषये तैर्लिखिता गवेषणापूर्णा विवरणिका अतीव महत्त्वपूर्णा: सन्ति। तत: परं 'रायल एशियाटिक सोसाइटी' बंगाल (कलकत्ता) त: ग्रन्थसंग्रहस्य प्रथमत:-सप्तमपर्यन्तभागानां सम्पादनं १८१७ त: १९३६ ई. पर्यन्तं विभिन्नैर्विद्वद्भि: कृतं यस्मिन् हरप्रसादशास्त्रिणां मुख्यो भाग आसीत्।

डॉ. बूलरमहोदया: (१८३७-१८९८ ई.) पेरिस-आक्सफोर्ड-लन्दनादिस्थितानां बृहद्भारतीय-मातृकाणामध्ययनानुशीलनान्तरं मैक्समूलरमहानुभावानां प्रेरणया भारतमागतवान्। मुम्बय्यां शिक्षाविभागे च नियुक्तो भूत्वो संस्कृतविदुषां हिताय 'बम्बई-संस्कृतसीरिज' नाम्ना ग्रन्थमालाया: तै: सर्वप्रथमं प्रकाशनमारब्धम्। तेषां जीवनस्य सर्वाधिकं महत्त्वपूणर्म् अवदानं भारतीयहस्तलिखितपुस्तकानां गवेषणम् एव अस्ति। १८६६ ई. वर्षे शासनेन बंगाल-बम्बई-मद्रासनगरेषु शोधसंस्थानानि स्थापितानि बूलरमहानुभावा बम्बईशाखाया अध्यक्षा नियुक्ता:। तैरस्मिन् कार्यकाले प्राय: २३०० महत्त्वपूर्णा: पुस्तिका गवेषिता:, यास्वद्य काश्चन पुस्तिका एलफिस्टमहाविद्यालयस्य पुस्तकालये काश्चन बर्लिनविश्वविद्यालये तथा शिष्टा 'इण्डिया आफिस' मध्ये सुरक्षिता: सन्ति।

---

1. डॉ. एम. एस. कत्रे- भारतीयपाठालोचनस्य भूमिका
2. न्यू लाइट्स आन मैन्यूस्क्रिप्टोलाजी पृ. सं. 12

डॉ. बेबर: (१८२५-१९०१ ई.) बर्लिनस्य राजकीयपुस्तकालये सङ्गृहीतानां पाण्डुलिपीनामेकं बृहत्सूचीग्रन्थं निरमात् तथा डॉ. बूलरेण बर्लिन् पुस्तकालयाय प्रेषितानां ५०० जैनमातृकानामनुशीलनं कृत्वा जैनसाहित्येऽन्वेषणात्मकमवदानं कृतम्।

१८६८ ई. वर्षे संस्कृतस्य पाण्डुलिपीनामन्वेषणाय ब्रिटिशशासनेनैकस्य पृथग् विभागस्य स्थापना कृता। इत: पूर्व कोलब्रुक-बूलर-बेबरादयो विद्वांसोऽस्यां दिशि कार्याण्यकुर्वन्। अस्मिन्नेव वर्षे ह्विटलीस्टोक्समहोदयेन, यस्तदानीं भारतीयराज्यपरिषद: सचिव आसीत्, २४००० चतुर्विंशतिसहस्रमुद्राणां निधि: संस्कृत-हस्तलिखितग्रन्थानामन्वेषणाय व्ययविधाने स्वीकृत:।

वैदेशिका विद्वांसो विशेषतश्च जर्मनविद्वांसोऽस्यां दिशि महतोत्साहेन कार्यदनमकुर्वन्। त्रिनीतिमहाविद्यालय-कैम्ब्रिजस्थ-सङ्ग्रहस्य सूचीम् आफ्रेख्त: १८६९ ई.वर्षे प्राकाशयत्। एतदन्तरमेव १८७० तमे वर्षे 'जेम्स डी' अलीजेन कोलम्बोनगराद् भारतीयसंस्कृतग्रन्थानामेका सूची मुद्रापिता। रायल एशियाटिक-सोसाइट्या अनन्तरं भारतीयसंस्कृत-ग्रन्थानामन्वेषणस्य संरक्षणस्य च कार्यम्-इण्डिया आफिस द्वाराऽभवत्। सर्वप्रथमं १८७० तमे वर्षे ए. सी. बर्नेल-महाभागेन इण्डिया आफिसलन्दनस्य संग्रहे सुरक्षितानां संस्कृतग्रन्थानां सूच्या: सम्पादनं विधाय तस्या मुद्रणं कारितम्। तत: परं द्वयोर्भागयो: (लन्दनत: 1866-1897 पर्यन्तं) जूलियस एलगलिगमहोदयस्य सूच्य:, तदनन्तरं कीथ-थोमसमहोदयो: सूच्यौ (लन्दन-१९३५) तथाऽन्ते ओल्डेनवर्गस्य सूची (लन्दन १९८२) प्रकाशिता:। इण्डिया आफिसलन्दनेऽद्यापीदं कार्यं प्रचलति।

डॉ. बूलरस्योल्लेख: पूर्वं विहित:, तेनास्मिन् क्षेत्रेऽविस्मरणीयं कार्यं कृतम्। तेषां निरीक्षणे गुजरात-काठियावाड़-सिन्धप्रभृतिषु विभिन्नेष्वञ्चलेषु संस्कृत-पाण्डुलिपीनामत्यन्तं सूक्ष्मरूपेणानुसन्धानमभूत् तथा १६७१-७२ वर्षयोर्मध्ये बम्बईतस्तासां सूचीपत्रं मुद्रितम्। एवमेव संस्कृत-गन्थानामन्वेषणविषये डॉ. बूलरस्य १८७५ वर्षे प्रकाशितं कार्यविवरणमपि सुबहुमहत्त्वशालि विद्यते। बूलरस्य पश्चादिदं कार्यं विभिन्नेषु प्रदेशेष्वतीव तीव्रगत्या नैकर्विद्वद्भि: समपाद्यत। १९७१-१९९० वर्षाणां मध्ये ११ खण्डेषु 'नोटिसेज आफ संस्कृत मैन्यूस्क्रिप्ट्स' नाम्ना विवरणानि मुद्रितानि। मध्यभारतस्य संस्कृतग्रन्थानां सूचीं १८७४ वर्षे नागपुरात् प्रकाश्य एफ. कीलहार्नमहोदय उल्लेखनीयं कार्यमकरोत्। अस्यामेव शृङ्खलायां बूलर: काश्मीर-राजस्थान-मध्यभारतानां केषुचित् क्षेत्रेषु वर्तमानानां ग्रन्थानां प्रतिवेदनं सम्पाद्य तत् १८७७ वर्षे बम्बईतोऽमुद्रापयत्। १९७७-७८ तथा १९८१ वर्षेषु शासनद्वारा क्रीतानां संस्कृतमातृकाणां सूचीं कीलहार्न: समपादयत्। ए. सी. बर्नेलश्च 'ए क्लासिफाइड इण्डैक्स टु द संस्कृतमैन्यस्क्रिप्ट्स इन दि पैलेस एट तंजोर' नाम्ना तञ्जोरपुस्तकालयस्य सूचीपत्रं सज्जयित्वा १८९० तमे वर्षे लन्दनाद् मुद्रापितवान्। तत: परं तंजोरस्य राजकीय-सरस्वतीमहलस्य ग्रन्थानां सूचीं पी. पी. एस. शास्त्री १९ खण्डेषु सम्पादिवान्। तत्र सम्प्रति २५००० संस्कृतपाण्डुलिपय: सुरक्षिता: सन्ति। 1890-91 तमवर्षयोर्बम्बईप्रदेशस्य ग्रन्थानां विवरणं किलहार्न: बम्बईत: १९८१ तमे वर्षे मुद्रापितवान्। इदं विवरणमतीवमहत्त्वपूर्णम्। संस्कृत-ग्रन्थानामेकं विवरणं श्रीकाशीनाथकृन्तेमहोदयोऽपि 188०-81 वषयोर्मध्ये निरमात्।

संस्कृतस्य हस्तलिखितग्रन्थानामन्वेषणानुसन्धानयोः संरक्षणस्य चेदं कार्यं शनैः शनैर्भारतस्य विभिन्नेषु प्रदेशेषु व्याप्तम्। अस्यैव फलस्वरूपं ओपर्टमहोदयो दक्षिणभारतस्य व्यक्तिगतसङ्ग्रहस्य द्वे सूच्यौ निर्मितवान्, ये हि मद्रासतः क्रमेण 1990 तथा 1995 वत्सरयोः प्रकाशिते। एवमेवावधस्य संस्कृतग्रन्थानां सूच्यः पं. देवीप्रसादेन निर्मिताः, यासां प्रकाशनं १९९१ तः 1993 पर्यन्तं प्राचलत्।

अस्यां दिशि ब्रिटिशम्यूजियम्- लन्दनस्य ग्रन्थानां सूची १९९३ तमे वर्षे प्रकाशिता। सूच्यतीवोपयोगिनी अस्ति। इत्थमेव १९९३ तमे वर्षे जोसिल-बेंडाल-राइस डेविट्समहोदयैः कैम्ब्रिजविश्वविद्यालस्थ पुस्तकालयस्य संस्कृतपालिभाषयोग्रन्थानां सूच्यः प्रकाशिताः।

बूलर-कीलहार्नयोरन्तरं बम्बईप्रदेशस्य संस्कृत-ग्रन्थानामन्वेषणे पीटर्सनः तत्परो भूत्वा षट्सु खण्डेषु ग्रन्थानां सूचीमरचयत्, येषां प्रकाशनकालः १८८३ तः १८९८ वर्षाणि वर्तन्ते। मैसूरस्य ग्रन्थानां सूची लेबीजराइसेन निर्मिता तथा सा १८८४ तमे वर्षे बंगलोरतः प्रकाशिता।

पीटर्सनेन 1882 तमे वर्षेऽलवरमहाराजानां सङ्ग्रहस्य सूचीं समपादयत्। जम्मूस्थितरघुनाथमन्दिरपुस्तकालयस्य ग्रन्थानां सूचीं डॉ. स्टीनो व्यधात्, यस्या मुद्रणं १८९४ तमे वर्षे बम्बईतोऽभूत्। डॉ. स्टीनो 'राजतरङ्गिण्याः' प्राचीनतममातृकानामन्वेषणसमये काश्मीरात् केषाञ्चिन्महत्त्वपूर्णानां ग्रन्थानां सङ्ग्रहमप्यकरोत्, ये साम्प्रतम् 'इण्डियन इन्स्टीट्यूट-आक्सफोर्ड' स्थले वर्तन्ते।

इत्थमेव ई. हल्टजो दक्षिण-भारतस्य संस्कृत-ग्रन्थानां सूचीं क्रमशः 1895-1896 तथा १९०५ तमवर्षेषु प्रकाशयत्।

बोडलियम-पुस्तकालयस्य संग्रह-सूची विण्टरनिट्सः प्रारभत्, यामपूरयत् कीथः (आक्सफोर्ड १९०५)। एतदतिरिक्तं तत्रत्यानां पालिग्रन्थानां विवरणी (१८८२ तमे वर्षे) फ्रेंक-फर्टरो निर्मितवान्। डॉ. स्टीनद्वारा सङ्गृहीतानां तथा इण्डियन इस्टीट्यूट आक्सफोर्ड स्थले सुरक्षितानां ग्रन्थानां सूची डॉ. कीथेन सम्पादिता, या हि १९०7 तमे वत्सरे क्लेरेण्डन-प्रेस (आक्सफर्ड) तः प्रकाशिता। एवमेव एस. जैकोदी-वी. फासबोल- मैक्समूलर- जोहन सी. नेसफेल्ड- फ्रेंडरिलेवीजप्रभृतिविदुषां कार्याण्यस्यां दिशि स्मरणीयानि विद्यन्ते।

संस्कृतहस्तलिखितग्रन्थानां सूचेः प्रथमः परिचयः डॉ. गंगानाथझामहोदयः नवम्बर, 1919 तमे ख्रिष्टाब्दे पुण्यपत्तननगरे आयोजिते अखिलभारतीयप्राच्यविद्यासम्मेलनस्य प्रथमे सत्रे कवीन्द्रचार्यस्य ''सर्वविद्यानिधान''स्य हस्तलिखितानां सूचिरूपे प्रस्तुतवान्।[1] पाण्डुलिपिसूचीकरणे श्रीराजेन्द्रलालमित्रः, महामहोपाध्यायः हरप्रसादशास्त्री, श्रीरामकृष्णगोपालभण्डारकरः, श्रीगोविन्दशास्त्री, श्री सी. कुन्हनराजा, पं. कुञ्जविहारीशर्मा काव्यतीर्थः, प्रफुल्लचन्द्रपालः, प्रबोधाचन्द्रसेनगुप्ताश्चासन्,[2] साम्प्रतिके काले दिल्लीस्थराष्ट्रीयपाण्डुलिपिमिशन नाम्नी संस्था समग्रे देशे पाण्डुलिपि-अन्वेषण-संरक्षण-

1. कलाकल्पः, शोधपत्रिका इन्दिरागांधीराष्ट्रीयकलाकेन्द्रः दिल्ली पृ. सं. 211 निबन्धलेखकः डॉ. विजयशंकरशुक्लः
2. कलाकल्पः, शोधपत्रिका इन्दिरागांधीराष्ट्रीयकलाकेन्द्रः दिल्ली पृ. सं. 225 निबन्धलेखकः डॉ. विजयशंकरशुक्लः

सम्पादन-प्रकाशन-प्रभृतयः अत्यन्तं महत्त्वपूर्णं कार्यं करोति। अस्मिन् क्षेत्रे राजनयिकाः शासकाः कश्मीरक्षेत्रस्य महाराजानः डॉ. कर्णसिंहस्य विशेषयोगदानं वर्तते। ते यत्र कुत्रापि गच्छन्ति चेत् तस्मात् स्थानात् अन्विष्य पाण्डुग्रन्थान् आदाय स्वकीये जम्मूस्थिते पाण्डुग्रन्थागारे स्थापयन्ति यत्र अन्वेषकाः गत्वा सम्पादनादिशोधकार्यं कुर्वन्ति। काशीस्थस्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनस्य यावदुल्लेखः नास्ति तावद् अपूर्णमेव कार्यम्। तत्रत्याः आचार्याः भगीरथप्रसाद 'वागीश' शास्त्रिमहोदयाः स्मरणार्हाः एतेषामाचार्याणां समग्रं जीवनं पाण्डुग्रन्थसम्पादने जातः। इलाहाबादस्थितस्य डॉ. गंगानाथझाकेन्द्रियसंस्कृतविद्यापीठस्य शोधसंस्थानस्य पूर्वप्राचार्याः डॉ. गयाचरणत्रिपाठिमहोदयाः तत्रत्या सम्प्रति राष्ट्रियसंस्कृतसंस्थानम् मानितविश्वविद्यालयस्य जयपुरप्रांगणस्य प्राचार्याः डॉ. प्रकाशपाण्डेयमहाभागाः पाण्डुग्रन्थसम्पादने कृतभूरिपरिश्रमाः। दिल्लीस्थ श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य पूर्वशोध-प्रकाशनविभागाध्यक्षाः सम्प्रति कुलपतयः अस्मद् गुरवः आचार्याः रमेशकुमारपाण्डेयमहाभागाः नैके ग्रन्थाः सम्पादिताः प्रकाशिताः। एतेषां आचार्याणां यद् योगदानं सर्वदा स्मरणीयमेव। पूर्ववर्तिनः आचार्याः गौरीशंकरहीराचन्द-ओझा,

इत्थं भारतराष्ट्रस्य बहूमूल्याया ज्ञानसम्पदः संरक्षणाय तथा तस्याः समुद्धाराय प्रतीच्य-पण्डितानां योगदानं चिरस्मरणीयं बहु श्लाघनीयं च विद्यते। भृशमुपकृताः स्मो वयम्।

कालिदासविरचितरघुवंशमहाकाव्यस्य त्रयोदशसर्गविमर्शः

डॉ. अरविन्दकुमारः

महाकवेः कालिदासस्य कृती रघुवंशमहाकाव्यमस्ति। इदं महाकाव्यमेकोनविंशति- सर्गात्मकम्। अत्र सूर्यवंशीयानां राज्ञां यशो वर्णितम्। दशमसर्गतः पञ्चदशसर्गं यावत् पञ्चभिः सर्गैः श्रीरामचरितवर्णनं, ततश्च समाप्तिं यावत् रामचन्द्रवंशवर्णनमस्ति। मर्यादापुरुषोत्तमरामचन्द्रः लोकरावणं लङ्कापतिं संहत्य दयितया सीतया, भ्रात्रा लक्ष्मणेन, भक्तैस्सेवकैश्च विभीषणादिभिः समं पुष्पकविमानमधिरुह्य अयोध्यां प्रति प्रस्थानं करोति। मार्गे श्रीरामचन्द्रः सीतां तत्तत्स्थानानां मनोहरां प्रकृतिं महिमानञ्च वर्णयन् संयतिपूर्वं समुद्रवर्णनं, मुनीनाम् आश्रमाणां रावणेनापहृतायाः स्वप्रियाया नुपूरप्राप्तिस्थानस्य माल्यवतः पर्वतस्य पम्पासरोवरस्य च सम्यक् वर्णनं करोति। तदनन्तरं गोदावर्याः पञ्चवट्याः अगस्त्याश्रमस्य, शातकर्णमुनेः पञ्चाप्सरस्सरोवरस्य, सुतीक्ष्णाश्रमस्य, शरभङ्गाश्रमस्य, चित्रकूटपर्वतस्य, मन्दाकिन्याः वर्णनं जातम्। ततः पर्वतसमीपोपत्यकायां समुद्भूतानां तमालवृक्षाणां अत्रेराश्रमस्य तपोभूमेश्च वर्णनं विधाय भागीरथ्याश्च वर्णनं कृतवान्। ततः गङ्गायमुनयोः सङ्गमक्षेत्रं प्रदर्शयन् सङ्गमस्नानमहिमानं समवोचत्।

भगवान् रामचन्द्रः पुष्पकविमानेन आकाशं प्रविश्य समुद्रं विलोक्य एकान्ते सीतां वक्ष्यमाणप्रकारेण समवोचत् - हे वैदेहि, मलयं यावत् विस्तृतसेतुना द्विधाकृतं फेनिलं समुद्रं तिरश्चनाऽऽकाशविभक्तं शारदीयं तारकितं नभ इव पश्य। यष्टुमिच्छोः सगरस्य यज्ञीयेऽश्वे कपिलेन पातालं प्रापिते सति तदन्वेषणप्रसङ्गे भूमिं खनद्भिः मदीयपूर्वजैः समुद्रः परिवर्द्धित इति ऐतिह्यम्। सूर्यमरीचयः समुद्रावेव जलं संगृह्णन्ति। अयं रत्नाकरः, अस्मिन्नेव वडवानलो विद्यते। अस्मादेव चन्द्रस्योत्पत्तिः।

तां तामवस्थां प्रतिपद्यमानं स्थितं दश व्याप्य दिशो महिम्ना।
विष्णोरिवास्यानवधारणीयमीदृक्तया रूपमियत्तया वा।।[1]

विविधावस्थायां भजमानं महत्त्वेन सर्वा दिशो व्याप्तवन्तः विष्णोरिव स्वरूपमस्य प्रकारतः परिणामतश्च निरूपयितुमशक्यम्। भगवान् विष्णुः प्रलयकाले सर्वानपि लोकान् संहृत्य निद्रामवलम्ब्य ब्रह्मणा संस्तूयमानः समुद्रेऽस्मिंश्शेते। इन्द्रेणाभिभूताः शतशः पर्वताः एवं भीता राजानो धर्मप्रधानं मध्यमभूपालमिवावलम्बन्ते। प्राचीनकाले भगवता वराहेण पातालात् समानीतायाः पृथिव्याः प्रलयकाले प्रवृद्धं समुद्रस्य जलं मुहूर्तं यावत् भुवः मुखाभरणमभूत्।

---

1. रघुवंशमहाकाव्यम् 13/5

मुखार्पणेषु प्रकृतिप्रगल्भाः स्वयं तरङ्गाधरदानदक्षः।
अनन्यसामान्यकलत्रवृत्तिः पिबत्यसौ पाययते च सिन्धुः॥[1]

भार्यासु असामान्यवृत्ति तरङ्गाधरसमर्पणनिपुणोऽसौ समुद्रमुखपर्णेषु स्वभावदृष्टा नदी स्वयं पिबति पाययते च। मत्स्यविशेषा आननं विवृत्य मत्स्यादिजन्तुसहितं जलं गृहीत्वा चञ्चुपुटानि सम्मेलयन्तः सच्छिद्रै मस्तकैः जलप्रवाहान् ऊर्ध्वं विस्तारयन्ति। हे सीते! अतर्कितरूपेण उत्पद्भि हस्तिनिभैः ग्राहैः भागद्वयं विभक्ताः फेनाः तेषां कपोलसंसर्पणेन कर्णयोश्चामरसदृशाः प्रतीयन्ते। हे सीते! वेलातटे वायुं पातुं समागता विशालतरङ्गाकारा एते सर्पाः सूर्यकिरणसम्पर्केण प्रवृद्धकान्तिभिः फणस्थितैर्मणिभि परिचीयन्ते। हे सीते! तवाधरसमेषु प्रवालेषु तरङ्गवेगात् सहसा प्रोत्क्षिप्तं विद्रुमाङ्कुरैः स्यूतवदनं एतच्छङ्खवृन्दं विलम्ब्य दूरीभवति।

प्रवृत्तमात्रेण पयांसि पातुमावर्तवेगात् भ्रमता घनेन।
आभाति भूयिष्ठमयं समुद्रः प्रमथ्यमानो गिरिणेव भूयः॥[2]

हे सीते! जलं ग्रहीतुमारभमाणेनैव परमावर्तवेगात् भ्रमता मेघेनायं समुद्रः पुनरपि मन्दराचलेन मथ्यमान इव प्रतीयते। अयश्चक्रसमानस्य पयोदधेः दूरादणुत्वेनावभासमानाः तमालादिवनपंक्तिनीला तीरभूमिः चक्राश्रिता मालिन्यरेखा इव प्रतीयते।

वेलानिलैकेतकरेणुभिस्ते सम्भावयत्याननमायताक्षि।
मामक्षमं मण्डनकालहानेर्वेत्तीव बिम्बाधरबद्धतृष्णम्॥[3]

हे विशाललोचने! सागरतीरवायुः विद्युदिव बिम्बाधरपाने लालसं मामाभरणक्रियाविलम्बमसहमानं जानन्निव केतकीपुष्पपरागैस्त्वदीयं मुखमलङ्करोति। हे सीते! वयं सिकतामयस्फुटितशुक्ति-परिक्षिप्तमौक्तिकसमूहं समुद्रतटं वायुयानस्य पुष्पकविमानस्य अतिशयवेगात् घटिकाद्वयेनैव प्राप्ता। सम्प्रति त्वं लङ्घिताऽध्वनि दृष्टिपातं विधेहि, सहवना एषा भूमिः विदूरीभवतः समुद्रात् निष्क्रामतीव प्रतीयते। पुष्पकं मदभिलाषं विज्ञाय क्वचिद्देवानां कुत्रचिन्मेघानां कुत्रचित् पक्षिणां मार्गेण गच्छति। एरावतमदगन्धिः आकाशगङ्गातरङ्गशीतलो गगनसमीरः तवाननस्वेदान् शोषयति। हे कोपने! विनोदार्थिन्या त्वया गवाक्षाऽवस्रंसितेन करेण स्पृष्टां विद्युत्सहितो मेघः तुभ्यं द्वितीयं वलयमर्पयतीव। हे सीते! एते तपस्विनः राक्षसविनाशात् दण्डकारण्यभागं विपद्रहितं ज्ञात्वा स्वं स्वमतिक्रम्य नूतनाः पर्णशाला निर्मायाऽधितिष्ठन्ति। इयं वनस्थली सैव, यत्र त्वामन्विष्यता मया त्वच्चरणवियोगादिव निःशब्दं भूमौ पतितं नूपूरमेकं दृष्टम्।

त्वं रक्षसा भीरु यतोऽपनीता तं मार्गमेताः कृपया लता मे।
अदर्शयन्वक्तुमशक्नुवत्यः शाखाभिरावर्जितपल्लवाभिः॥[4]

1. रघुवंशमहाकाव्यम् 13/9
2. रघुवंशमहाकाव्यम् 13/14
3. रघुवंशमहाकाव्यम् 13/16
4. रघुवंशमहाकाव्यम् 13/24

हे सीते! रावणः त्वां येन मार्गेण नीतवान् वागिन्द्रियाभावात् तं मार्गं कथयितुमसमर्था एता लताः अधोनमितपल्लवैर्विटपैर्मामदर्शयन्। तृणभक्षणं विहाय मृग्यश्च दक्षिणस्यां नेत्राणि प्रवर्तयन्त्यः सत्यस्त्वद्गतिं माम बोधयन्। माल्यवत गिरेः अम्बरलेखि एतत्शृङ्गं पुरस्तात् आविर्भवति यत्र घनैः नवं पयो मया त्वद्विप्रयोगाऽश्रु च समं विसृष्टम्। माल्यवतः पर्वतस्याऽभ्रङ्कषम् एतच्छिखरमग्रे विलसति, यत्र मेघैर्नवं जलं मया त्वद्विरहाश्रु च सहैव मुक्तम्। हे सीते! यत्र माल्यवतः शिखरे वृष्टिजः शुष्कजलप्रायसरसो गन्धः अर्धविकसितं किञ्जल्कं नीपकुसुमं मधुरा केका वाणी च त्वद्वियोगेन मामसह्यानि जातानि इति। हे भयशीले! यत्र माल्यवच्छिखरे पुरा घनगर्जिते त्वया भीत्या कृतमालिङ्गनं स्मरन्नहं त्वद्वियोगे गुहाविसारीणि मेघस्तनितानि दुःखेन सोढवान्।

आसारसिक्तक्षितिवाष्पयोगान्मामक्षिणोद्यत्र विभिन्नकोशैः।
विडम्ब्यमाना नवकन्दलैस्ते विवाहधूमारुणलोचनश्रीः॥[1]

हे सीते! यत्र माल्यवतः पर्वतस्य शिखरे विकसितमुकुलानि नूतनकन्दलीपुष्पाणि दृष्टिसिक्तभूमिवाष्पं विलोक्य ततस्तव विवाहधूमेन रक्तनेत्रशोभां संस्मृत्याऽहं पीडितः। पार्श्वस्थित– तैर्वञ्जुलवृत्तैरावृतानि ईषद्दृश्यचञ्चलसारसानि पम्पासरो जलानि मे नेत्रे विहातुं नोत्सहेते। पम्पासरसि प्रियायुक्ताश्चक्रवाकान् विलोकयन् त्वामहमस्मार्षम्। पयोधरसदृशाभ्यां मनोहरपुष्पगुच्छाभ्याम् अवनतां कृशामशोकलतां त्वमेव प्राप्तेति भ्रान्त्या यदाहमालिङ्गितुमुद्यतस्तदा लक्ष्मणेन नेयं प्रजावती कथयता निवारितः। पुष्पकावकाशाऽवस्रंसिनीनां कनकक्षुद्रघण्टिकानां स्वनं श्रुत्वा स्वयूथभ्रमादाकाश– मुड्डीयमाना अमूः गोदावरीसारसराजयः त्वां प्रत्युदगच्छन्तीव प्रतीयन्ते।

एषा त्वया पेशलमध्ययाऽपि घटाम्बुसंवर्धितबालचूता।
आनन्दयत्युन्मुखकृष्णसारा दृष्टा चिरात्पञ्चवटी मनो मे॥[2]

हे सीते! कृशोदर्याऽपि त्वया यत्र कलशजलेन बालचूताः संवर्द्धिताः यत्रत्याः कृष्णसाराः मृगाः अस्मान् दृष्ट्वा उन्मुखा वर्तन्ते, बहुकालानन्तरं दृष्टा सा पञ्चवटी मदीयं मनः आह्लादयति। हे सीते! पञ्चवट्यां आखेटात् परावृत्य तरङ्गवायुना विनीतखेदः एकान्ते त्वदङ्के मस्तकं निधाय वेतसकुञ्जेषु सुप्तोऽहं तत् वृत्तं सम्प्रत्यपि चिन्तयामि। यो मुनिः भ्रूभङ्गेनैव नहुषं राजानम् इन्द्रत्वात् प्रभ्रंशयाञ्चकार कलुषजलप्रसादकारणस्य तस्य भूमौ स्थितम् आश्रमोऽयं दृश्यते। प्रसिद्धकीर्तेः तस्यागस्त्यस्य आकाशव्याप्तहविगन्धि अग्नित्रयधूमाग्रम् घ्रात्वा रजोरहितं मदीयान्तःकरणं लाघवं प्राप्नोति। शातकर्णिमुनेः पञ्चाप्सरो नाम प्रसिद्धं सर इदं यस्य समीपं वनानि विराजन्ते तादृशं एतत् कीणासरः जलदमध्ये किञ्चिद्दर्शनीयं चन्द्रमण्डलमिव शोभितमस्ति।

पुरा स दर्भाङ्कुरमात्रवृत्तिश्चरन्मृगैः सार्धमृषिर्मघोना।
समाधिभीतेन किलोपनीतः पञ्चाप्सरो यौवनकूटबन्धम्॥[3]

---

1. रघुवंशमहाकाव्यम् 13/29
2. रघुवंशमहाकाव्यम् 13/34
3. रघुवंशमहाकाव्यम् 13/39

हे सीते! पुरा दर्भाङ्कुरमात्रवृत्तिः मृगैः सार्धं चरन् स ऋषिः समाधिभीतेन मघोना पञ्च-अप्सरसः प्रेष्य तपश्चरणान्निवारितः। सलिलान्तर्गतप्रसादस्थितस्य तस्य मुनेः सन्ततसङ्गीतमुरजध्वनिराकाशव्यापी सन् पुष्पकविमानचन्द्रशालाः कञ्चित् कालं यावत् प्रतिध्वनिभिः शब्दायमानाः करोति। सुतीक्ष्णनामकः मुनिः तपःक्लेशं सहमानः चतुर्षु दिक्षु चतुरोऽग्नी निधाय स्वयं सूर्याभिमुखः सन् तपश्चरति। इन्द्रं सशङ्कितं कुर्वन्तं सुतीक्ष्णं देवेन्द्रेण प्रेरिता अप्सरसः हावभावकटाक्षादिभिः विलासचेष्टाभिरपि स्खलयितुं समर्था न बभूवुः। ऊर्ध्वबाहुः सुतीक्ष्णोऽयं मुनिः अक्षमालाधारिणं मृगाणां कण्डूतिमपनयन्तं कुशच्छेदकं दक्षिणं भुजं मत्सम्माननिमित्तं मदभिमुखं करोति। अयं सुतीक्ष्णो मुनिः मौनव्रतित्वात् मदीयं प्रणामं स्तोकं शिरःकम्पेन पुष्पकव्यवधानरहितं नेत्रं पुनः सूर्ये प्रवर्तयति। इदं पवित्रं तपोवनं शरभङ्गनामकस्य अग्निहोत्रिणः मुनेरस्ति यो बहुकालं काष्ठैरग्निं सन्तर्प्य शरीरमपि हुतवान्।

छायाविनीताध्वपरिश्रमेषु भूयिष्ठसम्भाव्यफलेष्वमीषु।
तस्यातिथीनामधुना सपर्या स्थिता सुपुत्रेष्विव पादपेषु॥[1]

हे सीते सम्प्रति शरभङ्गस्याश्रमे छायापनीतमार्गश्रमैः प्रचुरफलशोभितैः वृक्षैः सत्पुत्रैरिवातिथीनां पूजा विधीयते। अयं चित्रकूटो यस्मिन् कन्दरं निर्झरधाराशब्देन प्रतिध्वनितं अस्ति, यत्र कूटाग्रे वप्रपङ्क इव मेघो लग्नोऽस्ति स पर्वतः सदर्पो वृषभ इव मे नेत्रमाकर्षति।

एषा प्रसन्नास्तिमितप्रवाहा सरिद्विदूरान्तरभावतन्वी।
मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमेः॥

हे सीते! स्वच्छनिश्चलप्रवाहा च दूरत्वात् सूक्ष्मत्वेन प्रतीयमाना इयं मन्दाकिनीसरित् चित्रकूटपर्वतोपकण्ठगतायाः भूमेः गलेऽवलम्बिनी मौक्तिकमालेव शोभते। चित्रकूटसमीपे सुन्दरोऽयं तमालवृक्षः यस्य सौरभयुक्तं प्रवालं मया तव कर्णालङ्कारत्वेन परिकल्पितम्।

इदम् अत्रिनामकस्य ऋषेः तपसः साधनभूतं वनमस्ति। यत्र दण्डभयं विनापि जन्तवः नियन्त्रिताः पुष्पपल्लवं विनापि वृक्षाः फलिता वर्तन्ते। अत्र अनसूया स्वर्गकमलप्रसूतां शिवजटाजूटस्थितां भागीरथीं तपस्विनां स्नानाय प्रवाहयामास। वीरासनैः ध्यानिनामृषीणां वेदिमध्ये स्थिता अमी वृक्षा अपि निवाते निष्कम्पतया ध्यानभाज इव शोभन्ते। प्रयागे त्वया पूर्वप्रार्थितः श्यामनामको वटः अधुना फलितः पद्मरागसहितो मरकतराशिरिव शोभते। अस्य श्यामवटवृक्षस्य परिसरे अतीव रमणीया शोभा विद्यते, पश्य क्वचित् मरकतैः सह गुम्फिता हारावलिरिव अन्यत्र नीलोत्पलैः मध्यभागे गुम्फिता कमलपंक्तिरिव कुत्रचित् कलहंससंसृष्टा राजहंसपंक्तिरिव, अन्यत्र च कृष्णागुरुरचितमकरिकापत्रा चन्दनकल्पिता भूरेखेव, क्वचित् छायास्थितैरन्धाकरैश्चित्रीकृता चान्द्री प्रभेव, अन्यत्र च छिद्रेषु ईषल्लक्ष्यव्योमप्रदेशा शुक्ला शरन्मेघरेखेव क्वचित् कालसर्पालङ्कारा भस्मोद्धूलिता शङ्करतनुरिव यमुनातरङ्गैः मिश्रितप्रवाहा गङ्गा शोभते।

---

1. रघुवंशमहाकाव्यम् 13/48

समुद्रपत्न्योर्जलसन्निपाते पूतात्मनामत्र किलाभिषेकात्।
तत्त्वावबोधेन विनाऽपि भूयस्तनुत्यजां नास्ति शरीरबन्धः॥[1]

हे सीते! प्रयागे स्नानकर्तर्णिां पवित्रान्तःकरणानां जनानां ज्ञानं विनापि प्रारब्धशरीरत्यागानन्तरं पुनर्जन्म नैव भवति, ते मुक्ता भविष्यन्तीति भावः। हे सीते! निषादराजस्य गुहस्य नगरमिदम्, यत्र मया मुकुटरत्नं विहाय जटाजूटं, तदा सुमन्त्रः हे कैकेयि रामनिर्वासनात्मकस्तव मनोरथः फलितः इति कथयित्वाऽरोदीत्। हे सीते! इदं तादृशं मानसरोवरं यत्र यक्षसुन्दर्यः क्रीडन्ति, यत्र च सुवर्णकमलान्युद्भवन्ति यस्याः सरय्याः बुद्धेः प्रकृतिमिव करणमिति वेदाः मुनयश्च प्रतिपादयन्ति। तीरे निखातयूपयुक्ता पवित्रीकृतं सलिलं अयोध्याराजधान्याः समीपं प्रापयति। यां सरयूं मदीयं चित्तं तद्रूपोत्सङ्गस्थितानां प्रचुरपयोभिः पुष्टानां अयोध्याधीश्वराणां साधारणमातरमिव विमृशति। मदीया जननी इव मान्येन तेन राज्ञा वियुक्ता सा इयं सरयूः दूरे वसन्तं मां शिशिरानिलैः तरङ्गहस्तैः उपगूहतीव। रक्तवर्णा पृथिव्या धूलिर्यस्मात्कारणात् उद्गच्छति ततो हनूमतो मदागमनवार्तां ज्ञात्वा भरतः सैन्यैः सह मां प्रत्युद्गत इति तर्कयामि। भरतः पितुः प्रतिज्ञापालनाय मे राजलक्ष्मीं रणाङ्गणे खरादीन् निहत्य निवृत्ताय मह्यं लक्ष्मणः त्वामिव प्रत्यर्पयिष्यतीति सत्यम्। असौ वल्कलवसनः पादचारी भरतः सेनां पश्चादवस्थाप्य गुरुं वसिष्ठं पुरो विधाय वृद्धमन्त्रिभिः समं पूजाद्रव्यं हस्ते निधाय मत्सकाशं समागच्छति। यः भरतः पित्रा दत्ताम् अङ्के स्थितामपि राजलक्ष्मीं तरुणः सन्नपि अभोक्ता सन् चतुर्दशवर्षाणि यावत् तया सह दुश्चरं व्रतमाचरतीव प्रतीयते। समवाक्यान्तरं विमानवाहिकयाधिदेवतया रामभावनां ज्ञात्वा भरतानुगाभिः प्रजाभि ऊर्ध्वदृष्टं विमानं आकाशात् भूभाववतारितम्। रामचन्द्रः सुग्रीवकरामवलम्ब्य विभीषणप्रदर्शितेन समीपभूतलस्फटिकेन पथा पुष्पकविमानात् अवतीर्णः।

इक्ष्वाकुवंशगुरवे प्रयतः प्रणम्य स भ्रातरं भरतमर्घ्यपरिग्रहान्ते।
पर्यश्रुरस्वजत मूर्धनि चोपजघ्रौ तद्भक्त्यपोढपितृराज्यमहाभिषेके॥[2]

श्रीरामचन्द्रः कुलगुरुं वशिष्ठं प्रणम्य अर्घ्यं स्वीकृत्य परिगतानन्दवाष्पः सन् भरतम् आलिङ्ग्य स्वभक्तिपरित्यक्तपितृराज्यमहाभिषेके भरतशिरसि आघ्रातवांश्च। श्रीरामचन्द्रः दीर्घकूर्चान् मन्त्रिवृद्धान् दयार्द्रैरवलोकनैः कुशलप्रश्नेन च अनुगृहीतवान्। अयं मे आपद्बन्धू सुग्रीवविभीषणौ, भरतः लक्ष्मणं विहाय तौ शिरो नमयित्वा ववन्दे। भरतः सुग्रीवविभीषणयोर्वन्दनं विधाय तत्पश्चात् नतमस्तकं लक्ष्मणं समुत्थाय आलिङ्गितवान्।

रामाज्ञया हरिचमूपतयस्तदानीं कृत्वा मनुष्यवपुरारुरुहुर्गजेन्द्रान्।
तेषु क्षरत्सु बहुधा मदवारिधाराः शैलाधिरोहणसुखान्युपलेभिरे ते॥[3]

तस्मिन् काले वानरसेनापतयो रामाज्ञया मनुजरूपं समाकलय्य गजेन्द्रारूढाः अनेकशो मदजलानि क्षरत्सु तेषु पर्वतारोहणसुखं प्राप्नुवन्तः। सानुचरो विभीषणोऽपि रामाज्ञया रथमारूढः, सङ्कल्पविशेषनिर्मिताः

1. रघुवंशमहाकाव्यम् 13/58
2. रघुवंशमहाकाव्यम् 13/70
3. रघुवंशमहाकाव्यम् 13/74

विभीषणरथा अपि येषां समतां नैव प्राप्नुवन्ति।

भूयस्ततो रघुपतिर्विलसत्पताकमध्यास्त कामगति सावरजो विमानम्।
दोषातनं बुधवृहस्पतियोगदृश्यस्तारापतिस्तरलविद्युदिवाभ्रवृन्दम्॥[1]

तदनन्तरं मर्यादापुरुषोत्तमो रामो भरतलक्ष्मणसहितः सन् पताकाभिः सुशोभितं स्वेच्छानुरूप–विचरणशीलं व्योमयानं अध्यारूढः। विमाने आदिवाराहेण पृथिवीमिव शरदागमेन चन्द्रचन्द्रिकामिव रामेण रावणरूपसङ्कटात् प्रत्युद्धृतां सीतां भरतोऽभिवादनमकरोत्। रावणप्रणययाच्ञाप्रणतिनैष्फल्य–सम्पादनदृढपतिव्रतं जानक्याः चरणयुगलं अग्रजमनुसृत्य जटिलं भरतशिरश्च द्वयमपि लोकोत्तरनियमं सङ्गत्य परस्परं पावनमभूत्। रामचन्द्रः मन्दवेगेन पुष्पकविमानेन क्रोशार्धं गत्वा शत्रुघ्नसज्जितपटभवनोपेतं सुरम्यं साकेतोपवनमधितिष्ठौ।

---

1. रघुवंशमहाकाव्यम् 13/76

काव्यप्रकाशानुसारेण रसविवेचनसन्दर्भे अभिनवगुप्तस्याभिव्यक्तिवादः रसस्यालौकिकता च

श्री रिंकेशभदूलाः

साहित्यजगति सर्वाधिकं महत्त्वं रसस्यैव। रसः काव्यस्यात्मा वर्त्तते। काव्यशरीरप्रकरणे आचार्येण राजशेखरेणोक्तं – **'रसादिश्चात्मा'**[1]। रसस्यापरनाम **'आनन्दः'**। आचार्यविश्वनाथानुसारेण रसः **'ब्रह्मास्वादसहोदरः'**[2]। ब्रह्मणः सृष्टौ षड्रसाः सन्ति, किन्तु काव्ये नवरसाः। रसस्य विषये सर्वप्रथममाचार्यभरतेन नाट्यशास्त्रे सूत्रमेकं लिखितं तद् रससूत्रनाम्ना प्रसिद्धम् –

''विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः''[3]

अर्थात् विभाव-अनुभाव-व्यभिचारिभावानां संयोगेन रसस्य निष्पत्तिः भवति। रसानुभूतेः कारणानि विभावाः। ते द्विविधाः – आलम्बनमुद्दीपनञ्च। काव्ये नाट्ये वा नायकः नायिका च आलम्बनविभावः। उद्यानं चन्द्रिकादयश्च उद्दीपनविभावाः भवन्ति। अनुभावः शारीरिको मानसिको वा व्यापारः वर्त्तते। यथा रसस्यानुकूलं नायकादयः हस्तविक्षेपनादिकार्यं कुर्वन्ति। कथनानुसारेण मुखे वारं वारं प्रकटिताः भावाः ये स्थायिभावान् पोषयन्ति, ते व्यभिचारिभावाः कथ्यन्ते। एतेषां त्रयाणां संयोगेन रसस्य निष्पत्तिः भवति।

आचार्यभरतस्यास्मिन् सूत्रे 'निष्पत्तिः' इति शब्दः व्याख्येयः। विभावानुभावव्यभिचारिभावानां सम्मिश्रणे नास्ति सन्देहः, किन्तु 'निष्पत्तिः' इति शब्दः आचार्येभ्यः चिन्तनीयः। अस्य शब्दस्य व्याख्या विभिन्नैः आचार्यैः स्वचिन्तनानुसारेण कृता। अस्य सूत्रस्य व्याख्याकारेषु चत्त्वारः आचार्याः, तेषां मतञ्च प्रसिद्धं – भट्टलोल्लटस्य उत्पत्तिवादः, श्रीशङ्कुकस्यानुमितिवादः, भट्टनायकस्य भुक्तिवादः, अभिनवगुप्तस्य चाभिव्यक्तिवादः। एषु प्रमुखं स्थानमभिनवगुप्तस्याभिव्यक्तिवादः भजते। आचार्यमम्मटेन काव्यप्रकाशे आचार्यभरतप्रणीतरससूत्रस्य व्याख्याक्रमे अभिनवगुप्तस्याभिव्यक्तिवादसिद्धान्तः सर्वश्रेष्ठसिद्धान्तरूपे प्रतिपादितः। आचार्याभिनवगुप्तस्य नाम्नि बहुवचनस्य **''इति श्रीमदाचार्याभिनव-गुप्तपादाः''**[4] इत्ययं प्रयोगः प्रमाणयति अस्य प्रमाणं यत् मतमिदं सर्वश्रेष्ठमतं विद्यते।

---

1. काव्यमीमांसा तृतीयोऽध्यायः पृ. 27
2. साहित्यदर्पणः 3/2
3. नाट्यशास्त्रं द्वि. भा. पृ. 34
4. काव्यप्रकाशः चतुर्थाध्यायः पृ0 112

आचार्याभिनवगुप्तेन स्वपूर्ववर्तिनः अलङ्कारशास्त्रस्य प्रमुखाचार्यानन्दवर्धनस्याधारेण अभिव्यक्तिवादः प्रतिपादितः। अतः तस्य मतमालङ्कारिकमतमपि कथ्यते। मतस्यास्यभिप्रायः वर्त्तते यत् सहृदयानां हृदि वासनारूपे स्थितानां रत्यादिस्थायिभावानामभिव्यक्तिः एव रसः कथ्यते। आचार्यमम्मटः वदति -

व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः।[1]

आचार्याभिनवगुप्तस्य रससूत्रव्याख्यां काव्यप्रकाशे स्वशब्दैः एवमभिव्यनक्ति आचार्यमम्मटः-

लोके प्रमदादिभिः स्थाय्यनुमानेऽभ्यासपाटववतां काव्ये नाट्ये च तैरेव कारणत्वादिपरिहारेणा विभावनादिव्यापारवत्त्वादलौकिकविभावादिशब्दव्यावहार्य्यैर्ममैवैते, शत्रोरेवैते, तटस्थस्यैवैते, न ममैवैते, न शत्रोरेवैते, न तटस्थ- स्यैवैते, इति सम्बन्धविशेषस्वीकारपरिहारनियमानध्यवसायात् साधारण्येन प्रतीतैरभिव्यक्तः सामाजिकानां वासनात्मकतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात् तत्कालविगलितपरिमितप्रमातृभाववशोन्मिषितवेद्यान्तरसम्पर्कशून्यापरिमितभावेन प्रमात्रा सकलसहृदयसंवादभाजा साधारण्येन स्वाकार इवाभिन्नोऽपि गोचरीकृतश्चर्व्यमाणतैकप्राणः, विभावादि-जीवितावधिः, पानकरसन्यायेन चर्व्यमाणः पुर इव परिस्फुरन्, हृदयमिव प्रविशन्, सर्वाङ्गीणमिवालिङ्गन्, अन्यत्सर्वमिव तिरोदधद्, ब्रह्मास्वादमिवानुभावयन्, अलौकिकचमत्कारकारी शृङ्गारादिको रसः।[2]

आचार्याभिनवगुप्तेन स्पष्टरूपेण सामाजिकेषु रसानुभूतिमुपपादितुमन्यस्य मार्गस्यावलम्बनं कृतम्। तत्र प्रथमं तु तेनोक्तं यत् सामाजिकेषु विद्यमानाः स्थायिभावाः एव रसानुभूतेः निमित्तानि भवन्ति। मूलतः मनःसंवेगः अर्थात् वासना अथवा संस्काररूपे रत्यादयः स्थायिभावाः सामाजिकेषु विद्यन्ते। ते साधारणीकरणव्यापारेण उपस्थितैः विभावादिभिः अभिव्यक्ताः उद्बुद्धाः वा भवन्ति। तथा च तन्मयीभावेन वेद्यान्तरसम्पर्केण शून्यं ब्रह्मास्वादसदृशं परमानन्दरूपमनुभवति सहृदयः।

व्याख्यायामस्यामाचार्याभिनवगुप्तेन रसः सामाजिकेषु स्पष्टरूपेणाभिव्यक्तो भवति। इदमपि तेनोक्तं यत् कथं रसोऽयं कदा पर्यन्तमास्वाद्यमानो भवति। रत्यादयः यद्यपि सहृदयानां हृदि नियतरूपेण भवन्त्येव परन्तु नियतप्रमातृत्वस्य विच्छेदेन ते सर्वसाधारणः जायन्ते। तात्पर्यमिदं यत् यावद् नियतप्रमातृत्वभावविच्छेदो न जायते तावद् वेद्यान्तरसम्पर्कशून्यता न भवति। एवञ्च यावत् वेद्यान्तरसम्पर्कशून्यता न स्यात् तावद् रत्यादयः आस्वादयोग्याः न जायन्ते। इदमपि वक्तुं शक्यते यत् वेद्यान्तरसम्पर्कशून्यतायाः आरम्भेनैव रसास्वादः प्रारभते। तथा च वेद्यान्तरसम्पर्कशून्यताविच्छेदेन सहैव रसास्वादस्य प्रक्रिया समाप्तिं गच्छति। एवं प्रकारेण आनन्दमिमं सहृदयाः सामाजिकाः प्राप्नुवन्ति। अत्र वैशिष्ट्यमिदं यत् आत्मस्थानां रत्यादीनाम् एवं साक्षात्कारो भवति।

आचार्याभिनवगुप्तेन रसनिष्पत्तिव्याख्यायां रसः अलौकिकः उक्तः। रसः लौकिकः तु नास्ति यतोहि अस्यास्वादः ब्रह्मास्वाद इव। आचार्यविश्वनाथेनापि रसोऽयं ब्रह्मास्वादसहोदरः इत्युक्तः। अस्यालौकिकत्वसिद्धये त्रयः उपायाः उल्लिखिताः काव्यप्रकाशे। तत्र प्रथमः -

1. काव्यप्रकाशः चतुर्थाध्यायः पृ0 95
2. काव्यप्रकाशः पृ. 108-109

स च न कार्यः, विभावादिविनाशेऽपि तस्य सम्भवप्रसङ्गात्। नापि ज्ञाप्यः, सिद्धस्य तस्यासम्भवात्। अपि तु विभावादिभिर्व्यञ्जितश्चर्वणीयः।[1]

रसोऽयं न कार्यः न च कारणम्। विनष्टे कारणे अपि कार्यं तिष्ठति। यथा घटरूपकार्यस्य सत्ता दण्डचक्रादीनां विनाशे अपि विद्यते। किन्तु रसरूपकार्यं विभावादीनां कारणानां नाशे एव समाप्यते। अतएव रसनिष्पत्तिव्याख्यायां ग्रन्थकारेणोक्तम् – **''विभावादिजीवितावधिः''[2]।** यदि रसं कारणं स्वीक्रियते तर्हि अस्य किञ्चित् कार्यमपि भवेत् यत् न भवति। अतः अयं रसः कारणमपि नास्ति। अयं ज्ञाप्योऽपि नास्ति यतोहि ज्ञाप्यस्य सत्ता ज्ञानात् पूर्वं ज्ञानानन्तरमपि भवति। परन्तु रसस्य विषये एवं न। अतः नायं ज्ञाप्यः। तथैव ज्ञापकमिमं न वक्तुं शक्यते यतोहि अनेन कस्यचित् ज्ञानं न भवति। एतेभ्यः सर्वेभ्यः भिन्नोऽयं रसः विभावादिभिः व्यञ्जितः चर्वणीयः वर्त्तते।

उचितोऽयं प्रश्नः यत् नायं कारणं न च कार्यः, न ज्ञापकः न च ज्ञाप्यः तर्हि विभावादिभिः व्यञ्जितः चर्वणीयः कथम्? यतोहि लोकेऽस्मिन् द्विप्रकारस्य वस्तुनी विद्येते– कारणं कार्यं वा, ज्ञापकं ज्ञाप्यं वा। प्रश्नमिममुत्तरति आचार्याभिनवगुप्तः– सत्यमिदं यत् लोके विद्यमानानां वस्तूनां प्रकारद्वयम्। अतएव रसोऽयं लौकिकः नास्ति अपितु अलौकिकः। कार्ये ज्ञाप्ये न सति व्यञ्जमानः अस्यालौकित्वसिद्धये भूषणमेव न तु दूषणम्।

रसस्यालौकिकतायाः सिद्धये आचार्यः द्वितीयमुपायमेवं वेदयति –

कारकज्ञापकाभ्यामन्यत् क्व दृष्टमिति चेत्? न क्वचिद् दृष्टमित्यलौकिकत्वसिद्धेर्भूषणमेतन्न दूषणम्। चर्वणानिष्पत्त्या तस्य निष्पत्तिरुपचरितेति कार्योऽप्युच्यताम्। लौकिकप्रत्यक्षादिप्रमाणताटस्थ्याव-बोध-शालिमितयोगिज्ञानवद्यान्तरसंस्पर्शरहितस्वात्ममात्रपर्यवसितपरिमितेतरयोगिसंवेदनविलक्षणलोकोत्तर-स्वसंवेदनगोचर इति प्रत्येयोऽप्यभिधीयताम्।[3]

चर्वणानिष्पत्त्या रसस्य निष्पत्तिः भवति अतः चर्वणां कारणं स्वीकृत्य तं कार्यमपि वक्तुं शक्यते किन्तु अयं लौकिकज्ञानात् मितयोगिज्ञानात् परिमितेतरयोगिज्ञानाच्च विलक्षणः।

1– लौकिकज्ञानं कार्यरूपेण ज्ञाप्यरूपेण वा भवति किन्तु रसः एताभ्यां विलक्षणः

2– लौकिकज्ञानं प्रत्यक्षप्रमाणेन आधारितं किन्तु मितयोगिज्ञानाय प्रत्यक्षप्रमाणस्यावश्यकता न भवति। ज्ञानमिदं प्रत्यक्षप्रमाणस्याभावे भूयमानं योगजज्ञानं वर्त्तते। उक्तमपि– **'प्रमाणताटस्थ्याव-बोधशालिमितयोगिज्ञान........'।[4]**

3– परिमितेतरयोगिज्ञानं परिपक्वबुद्धिमतां निर्विकल्पकसमाधौ स्थितानां योगीनां ज्ञानमस्ति। ज्ञानमिदं वेद्यान्तरसम्पर्कशून्यात्मानुभूतिमात्रं वर्त्तते। उक्तमपि– **'वेद्यान्तरसंस्पर्शरहितस्वात्ममात्र-**

---

1. काव्यप्रकाशः पृ. 110
2. काव्यप्रकाशः पृ.108
3. काव्यप्रकाशः पृ.110–111
4. काव्यप्रकाशः पृ.111

पर्यवसितपरिमितेतरयोगिज्ञान..........'।

रसः एतेभ्यः त्रिभ्यः ज्ञानेभ्यः विलक्षणः। कारणमिदं यत् प्रत्यक्षो नास्ति रसः। मितयोगी इव भूयमानं योगजमपि नास्ति। यदि एवं स्यात् तर्हि विभावादीनामभावेऽपि रसः भविष्यति। परिमितेतरयोगिज्ञानमपि नास्ति यतोहि तद् ज्ञानं स्वसंवेदनमात्रं वर्त्तते। रसोऽयं विभावादिभिः सहैव भवति। आत्मानुभूत्या सह विभावादीनां ज्ञानमपि तिष्ठति।

पुनः रसस्यालौकिकत्वसिद्धये तृतीयमुपायं वदति आचार्यः -

तद् ग्राहकं च न निर्विकल्पकं विभावादिपरामर्शप्रधानत्वात्। नास्ति सविकल्पकं चर्व्यमाणस्यालौकिकानन्दमयस्य स्वसंवेदनसिद्धत्वात्। उभयाभावस्वरूपस्य चोभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति नतु विरोधमिति श्रीमदाचार्याभिनवगुप्तपादाः।[2]

उपर्युक्तानुच्छेदे तृतीय उपायः उक्तः अभिनवगुप्तेन यत् तस्य रसस्य ग्रहणं न तु सविकल्पकज्ञानेन भवितुं शक्यते न च निर्विकल्पकज्ञानेन। अतएव स अलौकिकः। सविकल्पकज्ञानेन पदार्थस्य स्वरूपेण सह तस्य नामजात्यादीनामपि ज्ञानं भवति। **'नामजात्यादियोजनासहितं ज्ञानं सविकल्पकम्'** यथा- घट-पटादीनां पदार्थानां ज्ञाने तेषां स्वरूपेण सह नामजात्यादीनां ज्ञानमपि भवति। एष शब्दव्यवहारस्य विषयः। किन्तु रसानुभूतिः स्वसंवेदनीया वर्त्तते, शब्दव्यवहारस्य नास्ति विषयः। अतः नास्त्यत्र नामजात्यादीनां ज्ञानावसरः। अतः रसः सविकल्पकज्ञानेन ग्राह्यः नास्ति।

द्वितीये निर्विकल्पके ज्ञाने केवलं पदार्थस्यैव ज्ञानं भवति तस्य नामजात्यादीन् नावगम्यते। तद् बालमूकादिविज्ञानसदृशम्। तात्पर्यमिदं वर्त्तते यथा अबोधबालकस्य समक्षे घटिका वर्त्तते। बालकः तां घटिकां तथैव अवगच्छति यथा कश्चित् वयस्कः। किन्तु बालकः नाम कार्यमुपयोगञ्च न जानाति, एवञ्च वयस्कः जानाति। अतः बालकस्य ज्ञानं नामजात्यादीनां योजनारहितं निर्विकल्पकं वर्त्तते। यतोहि तत्र विभावादीनां ज्ञानं भवति। अतः रसोऽयं न सविकल्पकं न च निर्विकल्पकम्। एतयोः द्वयोः अभावे रसालौकिकत्वमेव सिद्ध्यति।

काव्यप्रकाशे उल्लिखितं प्रकरणमिदं रसनिष्पत्तिसिद्धान्तस्य द्योतकं वर्त्तते। प्रकरणमिदमभिनवगुप्तस्य नाट्यशास्त्रस्य प्रसिद्धायाः टीकायाः अंशमात्रमस्ति। तत्रेदं प्रकरणमत्यन्तं विस्तृतं किन्तु अत्र मम्मटेन तदेव प्रकरणं संक्षिप्तेन सरलेन च प्रस्तुतम्।

---

11. काव्यप्रकाशः पृ.111
12. काव्यप्रकाशः पृ.112

पणिनिव्याकरणे संस्कारसमन्वयः

डॉ. सुजाता त्रिपाठी

सम् उपसर्गपूर्वकात् कृधातोः घञि प्रत्यये सति निष्पन्नस्य संस्कार-पदस्य सन्ति बहवोऽर्थाः। तथा हि संस्कृति-प्रशिक्षण-शिक्षण-सौजन्यादिष्वर्थेषु तथा च व्याकरणजन्यशुद्ध्यर्थे संस्करणपरिष्करणयोश्च संस्कारशब्दस्य प्रयोगो भवति। तर्कभाषायां दार्शनिकदृष्ट्या शब्दोऽयं विवेचितः। तद्यथा-

संस्कारव्यवहारासाधारणं कारणं संस्कारः। संस्कारस्त्रिविधो वेगो भावना स्थितिस्थापकश्च।[1] अथवा **आत्मशरीरान्यतरनिष्ठो विहितक्रियाजन्योऽतिशयविशेषः संस्कारः।**

वस्तुतस्तु संस्कारः आत्मशुद्धिरिति वक्तुं शक्यते, यत्र ज्ञानं ज्ञेयाद् मुक्तमस्ति, चेतना च निर्विषया। इयमनुभूतिरेव आत्मसंस्कारः। अयमेव च खलु भारतीयसंस्कृतेः मूलभूतः। संस्कारस्य प्रकाराणां निर्धारणे वर्तते विदुषां विभिन्नमतानि। तथा हि- आचार्यमनुः षोडशसंस्कारान् मनुते परम् आश्वलायनमते एकादश एव संस्काराः। एवमेव वैखानसाचार्येण अष्टादशसंस्काराणां विधानम् उक्तम्, पारस्कराचार्येण च त्रयोदशसंस्काराणाम्। आचार्यगौतमेन तु चत्वारिंशत्प्रकाराः संस्कारस्य मताः। आङ्गिरसस्मृतौ पञ्चविंशतेः संस्काराणां वर्णनं प्राप्यते। परवर्तिस्मृतिषु षोडशसंस्काराणां सूची प्राप्यते। चरकसंहितायाः

संस्कारो हि गुणान्तराधानमुच्यते इति सुप्रसिद्धोक्त्यनुसारं गुणानाम् आधानप्रक्रिया संस्कार इत्यभिमन्यते। इत्थं हि आपाततः विचारे सति तथ्यमिदम् आविर्भवति यत् बहुविश्रुतेऽस्मिन् संस्कारशब्दे मलापनयनम् अतिशयाधानं हीनाङ्गपूर्तिश्चेति एतत्त्रयाणाम् अन्तर्धानं वर्तते। गर्भाधानादिसंस्काराणां प्रमुखम् उद्देश्यं मलापनयनं वर्तते। बैजिकगार्भिकदोषाः आजीवनं कष्टप्रदायकाः भवन्ति व्यक्तीनां कृते। एतद्दोषविमुक्त्यर्थं संस्काराणां व्यवस्था प्रतिपाद्यते, तदेव मलापनयनम् इति वक्तुं शक्यते।

उपनयनादिसंस्कारेषु अतिशयाधानं दृष्टिगोचरं भवति। संस्कारेऽस्मिन् बालकः आचार्येण सह स्थित्वा विद्याध्ययनाधिकारं प्राप्नोति तथा च गुरुशुश्रूषया प्रभूतं ज्ञानम् अर्जयितुं प्रयतते।

एवमेव विवाहसंस्कारेण हीनाङ्गपूर्तिः भवति। यज्ञादिसिद्धये सपत्नीको हि जनः अधिकारी भवति। पितृ-ऋणाद् मुक्तये सन्तानोत्पत्तिः साधनम्, अतः संस्कारोऽयं हीनाङ्गपूर्तिं करोति।

संस्कारार्थं शरीरस्य इति मनूक्तेरनुसारं शुद्धये मानवजीवनस्य सर्वांगीणविकासाय संस्कारः अत्यन्तं सापेक्षितो वर्तते, न केवलम् इहलोके अपितु परलोकेऽपि संस्काराः पवित्रयन्ति। यथा ह्युक्तम्-

---

1. तर्कभाषा, पृ. 483, चौखम्बा संस्करण

वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्।[1]
कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च॥

संस्कारो हि वैदिककर्मत्वेनोच्यते। वैदिककर्मसु मन्त्राणां प्रयोगो भवति। मनुष्याणां वैदिकप्रक्रियया पूर्णत्वोत्तमत्वोत्तमविभूतिसम्पन्नत्वसम्पादनं संस्काराः कुर्वन्ति।

प्रस्तुतेऽस्मिन् शोधपत्रे भगवता पाणिनिना विरचितायाः अष्टाध्याय्या आधारेण संस्कारपद्धतिपरिशीलनस्य प्रयासः विहितोऽस्ति। आचार्यपतञ्जलेः आचार्यभर्तृहरेश्चापि मतानाम् उपस्थापनं यथास्थानं कृतमस्ति।

मनुष्यस्य व्यवस्थितजीवनशैलीहेतवे धर्मशास्त्रे चतुर्णाम् आश्रमाणां परिकल्पना कृतास्ति। वार्तिककारकात्यायनेन चातुराश्रम्यम् इति पदं प्रयुक्तम्। पाणिनीयाष्टाध्याय्याः सूत्रेषु चतुराश्रमवाचकपदानि इत्थं सन्ति–

1. ब्रह्मचारी – वर्णाद् ब्रह्मचारिणि (5/2/134)[2]
2. गृहपतिः – गृहपतिना संयुक्ते ञ्यः (4/4/90)[3]
3. भिक्षुः – सनाशंसभिक्ष उः (3/2/168)[4]
4. परिव्राजकः – पारस्करप्रभृतिनी च संज्ञायाम् (6/1/154)[5]

पाणिनेः समये ब्रह्मचर्यशिक्षाप्रणाली उन्नतदशायाम् आसीत्। ब्रह्मचारिणे 'वर्णी' इति नूतनसंज्ञायाः प्रयोगः प्राचुर्येण भवति स्मवर्णाद् ब्रह्मचारिणि (5/2/134)

आचार्यः ब्रह्मचारिणम् आत्मसमीपम् आनीय तस्य उपनयनं कुर्वन्ति स्म, येन शिष्याचार्ययोः नूतनसम्बन्धः जायते, सः पाणिनिना आचार्यकरणम् इति नाम्ना उच्यते। तथा हि–

सम्माननोत्सञ्जनाचार्यकरणज्ञानप्रभृतिविगणनव्ययेषु नियः इति सूत्रे।

विद्याध्ययनारम्भात् प्राक् माणवकस्य उपनयसंस्कारो भवति स्म, ततश्च ब्रह्मचारी अन्तेवासी इति अन्वितार्थपदवीं धारयति। एतदर्थं हि 'उपनयते' इति क्रिया प्रयुज्यते स्म।– माणवकम् उपनयते।

तदस्य ब्रह्मचर्यम् (5/1/94) इति सूत्रे ब्रह्मचारिणां नामकरणस्य विधिः कथिता वर्तते। पञ्चदशदिनात्मकस्य ब्रह्मचर्यव्रतस्य दीक्षां स्वीकुर्वाणः छात्रः 'आर्द्धमासिको ब्रह्मचारी' इति व्यवह्रियते स्म। मासिकव्रतस्य कृते 'मासिकः' तथा वर्षात्मकव्रतस्य कृते 'सांवत्सरिकः' इति। अष्टचत्वारिंशद्वर्षात्मकव्रताय ब्रह्मचारी 'अष्टचत्वारिंशी' कथ्यते। गृह्यसूत्रैः ज्ञायते यद् अवधिरयं

---

1. मनुस्मृतिः 2/26
2. पा. अ .5/2/134
3. पा. अ .4/4/90
4. पा. अ .3/2/168
5. पा. अ .6/1/154

गुरुकुलवासस्य अधिकतमोऽवधिः आसीत्। एतादृशाः ब्रह्मचारिणः आदित्यव्रतिकाः अप्युच्यन्ते स्म।

छात्राणां नामकरणाय आधारत्रयं मन्यते स्म– 1. अध्ययनाधारेण 2. चरणाधारेण 3. आचार्याधारेण। अष्टाध्याय्यां चतुर्थाध्यायस्य द्वितीयपादे षष्टितः द्विषष्टिः यावत् सूत्रेषु विषयानुसारं छात्राणां नामकरणस्य विधानमस्ति–

ऋतूक्थादिसूत्रान्ताट्ठक्	(4/2/60)
क्रमादिभ्यो वुन्	(4/2/61)
अनुब्राह्मणादिनिः	(4/2/62)
छन्दोब्राह्मणानि च तद्विषयाणि	(4/2/66)

वैदिकच्छात्राणाम् आचार्याणां च नामानि अधीयमानशखाधारेण एव प्रचलितानि आसन्। यथा– तैत्तिरीयशाखाध्यायिनः तैत्तिरीयाः इत्युच्यन्ते स्म।

वैदिकशिक्षासंस्थाभ्यः बहिः स्वतन्त्रतया अधीयमानानां छात्राणाम् अप्येकः वर्ग आसीत्। अत्र यः विद्यार्थी यस्माद् आचार्यात् यच्छास्त्रम् अधीते स्म, सः तनैव नाम्ना व्यवह्रियते स्म। यथा आपिशलेः शिष्यः आपिशलः, शाकटायनस्य शिष्यः शाकटायनीयः, पाणिनीयशास्त्राध्येतारः पाणिनीयाः चेति। एतादृशा आचार्याः उपज्ञाताः इति कथ्यन्ते–उपज्ञाते (4/3/115)।

उपर्युक्तशास्त्रीयनामकरणाद् इतरस्य लौकिकनामकरणसंस्कारस्य अपि नियमः भाष्यकृत्पतञ्जलेः महाभाष्ये पस्पशाह्निके दृष्टिगोचरः भवति–

दशम्यां पुत्रस्य। याज्ञिकाः पठन्ति–दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद् घोषवद् आद्यन्तरन्तःस्थमवृद्धं त्रिपुरुषानूकम् अनरिप्रतिष्ठितम्। तद्धि प्रतिष्ठिततमं भवति। द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितम्।

विवाहसंस्कारः

आत्मत्याग–संयमाध्यात्मिकभावानाम् उज्ज्वलादर्शभूतो विवाहसंस्कारः सर्वेषु संस्कारेषु मुख्यतां भजते, यतो विवाहसंस्कारेणैव जीवानाम् उत्पत्तिः प्रारभते। पाणिनिना विवाहाय उपयमनशब्दः प्रयुक्तः (**विभाषोपयमने** 1/2/16) अस्य च व्याख्यायै स्वकरणशब्दः प्रयुक्तः **उपाद्यमः स्वकरणे** (1/3/56) इति। विकारसंस्कारसम्पन्नतायै वरेण वध्वाः पाणिग्रहणस्य महत्त्वं 'पाणिगृहीती' इति शब्देन प्रकटितं भवति। कात्यायनानुसारं अस्य शब्दस्य प्रयोगः परिणीतायां भार्यायां भवति।

गृहपतिना संयुक्ते ञ्यः[1] इति सूत्रेण ज्ञायते यत् ब्रह्मचर्याद् गार्हस्थ्यं प्रविशतां व्यक्तीनां संज्ञा 'गृहपतिः' इत्यासीत्। विवाहसमये प्रज्ज्वलितोऽग्निः गार्हपत्याग्निः उच्यते, यतः गृहपतिः तेन संयुक्तो भवति स्म। अग्निहोत्रयज्ञे जात्या सह विधिपूर्वकं संयोगकारणात् विवाहितायाः स्त्रियः पत्नी

1. पा. अ 4/4/90

इति संज्ञा। यथा च पाणिनीयं सूत्रम्- **पत्युर्नो यज्ञसंयोगे**[1]। पुत्रपौत्रादिभिः सम्पन्नाः सुप्रज-बहुप्रज-पुत्रपौत्रीणादिशब्दैः अभिधीयन्ते स्म। तथा हि-

सुप्रजः - **नित्यमसिच् प्रजामेधयोः** 5/4/122

बहुप्रजा - **बहुप्रजाश्छन्दसि** 5/4/123

पाणिनीयाष्टाध्याय्याः तृतीयचतुर्थपञ्चमाध्यायानां कतिपयस्थलेषु श्राद्ध-पित्र्यहविषादीनाम् उल्लेखः प्राप्यते। पितृभ्यः अग्नेः आहुतिः कव्यवाहनाग्नौ प्रदीयते स्म- कव्यपुरीष्येषु ञ्युट् (3/2/65)

सास्य देवता इति कृत्वा यद् हविः प्रदीयते स्मः तत् पित्र्यहविः इत्युच्यते। तथा च सूत्रम्- वाय्वृतुपित्रुषसो यत् 4/2/31) आश्विनकृष्णपक्षे क्रियमाणः श्राद्धः शारदिकश्राद्धः कथ्यते। तथा च सूत्रम्- **श्राद्धे शरदः** (4/3/12) अत्र श्राद्धम् इति कर्म न तु श्रद्धावान् पुरुषः। श्राद्धी इति पदेन ज्ञातं भवति यत् श्राद्धे ब्राह्मणभोजनस्य आसीद् व्यवस्था इति। तथा हि सूत्रम्- **श्राद्धमनेन भुक्तमिनिठनौ** (5/2/85)। भाष्यकृद् वदति- **अद्य भुङ्क्ते श्राद्धे श्वः श्राद्धिक इति मा भूत्।** श्राद्धभोजी ब्राह्मणः जपादिना आत्मसंस्कारं करोति स्म। धार्मिककृत्येषु मुण्डनस्य प्रथा आसीत्- **मद्रात्परिवापणे** (5/4/67)। मुण्डनकर्ता मद्रंकरः मद्रंकारो वा कथ्यते- **क्षेमप्रियमद्रेऽण् च** (3/2/44)

जीवने नैतिकगुणानाम् उत्थानाय तपस्यया श्रद्धया च आत्मनः संस्कारः करणीयः। पाणिनिनापि एतादृशशब्दाः उल्लिखिताः सन्ति- दीक्षातपसी, श्रद्धातपसी, मेधातपसी, अध्ययनतपसी च। तथा हि सूत्रम् - **न दधिपयआदीनि** 2/4/14

तपस्या श्रद्धा वा तावत् फलभूता न भवति यावत् नो वाणी सुसंस्कृता न स्यात्। आचार्यपतञ्जलिः महाभाष्ये पस्पशाह्निके उल्लिखति-

एकः शब्दः सम्यज्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति।[2]

शब्दस्य साधुत्वासाधुत्वयोः बृहद् विवेचनं भाष्यकृता विहितमस्ति। वैयाकरणैः शब्दसंस्कारः शब्दानां साधुत्वासाधुत्वविवेचनं दार्ढ्येन कृतमस्ति। यतः असंस्कृतशब्दाः दूषितसंस्कारान् जनयन्ति। येन च असंस्कृतभावनानाम् उत्पत्तिः भवति। तथा च सति असाधुशब्दः मनुष्यस्य अनर्थसाधको भवति। यथा ह्युक्तम्-

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।

स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥ (महा. पस्पशाह्निकम्)

किञ्च तत्रैव महाभाष्ये शब्दज्ञाने धर्म उत प्रयोगे इत्याशंक्य निष्कर्षरूपेण भाष्यकृता संवुक्तम् वस्तुतः धर्मप्राप्तिः मुख्यतः ज्ञानपूर्वके प्रयोगे एव- **आचारे नियमः, शास्त्रपूर्वके प्रयोगेऽभ्युदयः।**

अतः सुसंस्कृतशब्दानां ज्ञानपूर्वकं प्रयोगः एव भवति अस्माकं धर्मसाधनम्।

1. पा. अ 4/1/33
2. महाभाष्यम् 6/1/84

अष्टाध्याय्यां दार्शनिकतत्त्वोपलब्धिः

डॉ. दयालसिंहः पँवारः

1. भूमिका-

संस्कृत-व्याकरण-शास्त्र-परम्परा वर्ततेऽत्यन्तमेव गभीरा, विशाला सुदीर्घा च। त्रिमुनिसम्पोषितेयं परम्परा तदोत्कर्षं गता, यदौस्याः परम्परायाः विलक्षणानि तत्त्वानि सम्यगनुसन्धायैव वैयाकरण-मनीषिणा भर्तृहरिणा दर्शन-प्रस्थाने इयं शब्दविद्या प्रतिष्ठापिता। सामान्यरूपेण सर्वैः स्वीक्रियते यद् भगवता महाभाष्यकारेण महाभाष्य एवेयं दर्शन-सामग्री समुपस्थापिता तदनु च हरिणैव व्याकरण-दर्शनस्य भव्यं स्वरूपं समुपस्थापितम्।

इदमत्रोल्लेखनीयं यदस्य त्रिमुनिव्याकरस्याधारग्रन्थोऽष्टाध्यायी भगवता पाणिनिना प्रणीता। वयं मन्यामहे यदस्यामेव तैर्दर्शन-बीजैरवश्यमेव भाव्यं यदाधारेण व्याकरण-दर्शन-कल्पद्रुमोऽयं पुष्पितः पल्लवितो बभूव। यद्यपि प्रायशः प्रक्रिया-ग्रन्थत्वेन अष्टाध्याय्या अध्ययनं विधीयते, तथापि विविध-शास्त्राणां विश्वकोशोऽयमिति मन्महे वयम्। सूत्र-ग्रन्थत्वात् अष्टाध्याय्यां विविधेतर-शास्त्र-विस्तारो नापेक्षितुं शक्योऽस्माभिः, तथापि विविध-शास्त्र-सङ्केतास्तु प्राचुर्येण स्फुटतयास्माभिरवलोकयितुं शक्यन्त एव।

2. एतादृशाध्ययनस्यौचित्यम् -

नूतने परिवेशे एतादृशेषु विषयेषु परिशीलनस्य, अनुसन्धानस्य वर्तते महती आवश्यकता। अनेन सूत्र-ग्रन्थानां प्रक्रियेतर-विविध-पक्षाणां प्रकाशनं भविष्यति। सूत्रकारस्य चिन्तनस्य दृष्टेर्व्यापकता, आर्ष-प्रतिभायाः विलक्षणतायाश्च साक्षात्कारो भवति। अपरतश्च दर्शन-शास्त्रस्य चापि महानुपकारोऽनेन भवति। एकतः एतादृशेनाध्यनेन दार्शनिक-चिन्तनस्य प्राचीनतायाः प्रकाशनं भवति, अपरतश्च तत्र सन्निहितपारिभाषिक-शब्दानां व्युत्पत्तौ, तद्दृष्ट्या चार्थानुसन्धाने नूतनानुसन्धातारश्छात्राश्च दत्तावधाना भविष्यन्ति। एतादृगध्ययनेन ग्रन्थानां, शास्त्राणां च पौर्वापर्यक्रमविषये ऐतिहासिक-दृष्ट्यापि सामग्री समुपलप्स्यते।

3. सूत्रत्वेन मङ्गलाचरणम्-

ग्रन्थादौ मङ्गलाचरणं न केवलं दर्शन-ग्रन्थानामपितु सकलसंस्कृतवाङ्मयस्य विद्यते शिष्ट-परम्परा। सूत्र-परम्पराया आदिमेऽस्मिन् ग्रन्थे सूत्र-शैल्या यथा निर्वाहः कृतः, न तथान्यत्र दृश्यते। लोककल्याणाकांक्षया ऋषिरयं वकाररूपं मङ्गलवर्णं वृद्धिपदं चादितःप्रयुङ्क्ते, वक्तारोऽध्येतारश्च

वृद्धियुक्ता यथा स्युः।। तस्मादेव महाभाष्यकारेण शास्त्रीय-परम्परायां सर्वप्रथमं मङ्गलाचरणस्य मञ्जुलायां पदावल्यां रहस्यं प्रकाशितम्। तथा हि– ''मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि ही शास्त्राणि प्रथन्ते, वीरपुरुषकाणि च भवन्त्यायुष्मत्पुरुषाश्चाध्येतारश्च वृद्धियुक्ता यथा स्युः।[1]'' तदाप्रभृत्येव मन्ये परम्परेयं अथादिशब्दपुरःसरं सूत्र-ग्रन्थेषु प्रसृतौभवत्।

4. दार्शनिकवादसम्बद्धाः प्रमुख-शब्दाः

अष्टाध्याय्यां विविधदर्शनानां प्रमुखसिद्धान्तसम्बद्धानां शब्दानां प्राचुर्येणोपलब्धिर्भवति। तत्रैषां शब्दानां योऽर्थः, दर्शन-शास्त्रे प्रयुक्तैः पदार्थैः सह तदर्थस्य का सङ्गतिरिति विचारणीयमेव। तद्यथा–

(4.1) ब्रह्म– ब्रह्म खलु वेदान्त-शास्त्रस्य सर्वातिशायी पदार्थः। प्रायशः पदमिदं अष्टाध्याय्यां वेदवाचकत्वेन प्रयुक्तः। ब्रह्मप्रतिपादकतया ग्रन्थराशिरयं ब्रह्मशब्देन विनिर्दिष्टः स्यात। 'ब्राह्मोऽजातौ[2]' इत्यस्य सूत्रस्य योगविभागादयमर्थः प्रकाश्यते यदपत्यार्थे जातौ वाच्यायां अणि प्रत्यये ब्रह्मणः अपत्यं 'ब्राह्मणो जातिरिति।' अनेन ज्ञायते यस्यायं जातिविशेषः अपत्यं तद्ब्रह्म सर्वातिशायिनी ईश्वरीया सत्ता। सामान्यतया तु ब्रह्म वेदस्तदधीते तद्वेद वा ब्राह्मणोऽपि भवितुमर्हति। 'ब्रह्मभ्रूणवृत्रेषु क्विप्[3]' इत्यादिभीः सूत्रैर्ज्ञायते यद् ब्रह्म-शब्दोऽत्र ब्राह्मणवाचकोऽपि वर्तते।

(4.2) ईश्वरः- 'स्थेशभासपिसकसो वरच्' इति सूत्रेण ईश ऐश्वर्ये इति धातोर्निष्पन्न ईश्वर-शब्दः। अयं शब्द अष्टाध्याय्यां विविधस्थलेषु प्रयुक्तः। यथा – 'अधीरीश्वरे', 'ईश्वरे तोसुन्कसुनः' स्वामीश्वरदायादप्रतिभूप्रसूतैश्च', 'तस्येश्वरः[4]' चेत्यादीनि। उल्लेखनीयं यच्छब्दोऽयं विशिष्टदार्शनिकशब्दावल्यां किञ्च लौकिके धार्मिके च वाङ्मये विशिष्टो विश्रुतश्च जातः।

(4.3) मोक्ष- वाचकाः शब्दाः– मोक्षः, निर्वाणः, अपवर्गश्चेत्यादयः शब्दाः विविध-दार्शनिक-सम्प्रदायेषु जीवस्य उत्तमाया अन्तिमायाश्च गतेः कृते प्रयुज्यन्ते। तेषां शब्दानां सामान्यार्थे अष्टाध्याय्यां प्रयोगो दृश्यते। यथा– अपवर्गे तृतीया। अत्र व्याख्याकारा आहुः अपवर्गः 'फलप्राप्तिरिति[5]' उदाहरणतया–मासेन ग्रन्थोऽधीतः। अत्राध्ययनस्य पूर्णतैवापवर्गः। तथैव 'निर्वाणोऽवाते' इति सूत्रेण निर्वाण-शब्दो निपात्यते। प्रयोगो यथा– निर्वाणोऽग्निः। अत्र प्रज्वलितस्याग्नेः सर्वथा लोपे सति निर्वाण-शब्दः प्रयुक्तः। तत्र प्रयुक्तशब्दावल्यापि यौर्थप्रतीतिर्भवति, सा विविधदर्शनगतमोक्षावधारणाया निकटवर्तिनी एव वर्तते।

(4.4) माया- 'अस्मायामेधास्रजो विनिः' इत्यनेन सूत्रेण मायाशब्दाद् विनिप्रत्ययेन मायावीति पदं निष्पादितम्। या काचिदपि सा माया तद्वान् मायावी। प्राग्वर्तिनि वैदिके साहित्ये इन्द्रो मायावीत्यादिभिःप्रयोगैः मायायाः इन्द्रजालादिवाचकता सिध्यति। परवर्तिनि दार्शनिकसाहित्ये विशेषतया

1. महाभाष्यम् द्वितीयमाह्निकम्
2. पा.6.4.171
3. पा.3.2.87
4. पा.5.1.41
5. वै.सि.कौ.

वेदान्ते मायाया अवधारणा व्यवस्थिता जाता।

स्पष्टं भवति यत पाणिनीयाष्टक एवंविधाः नैके शब्दाः प्राप्यन्ते, ये परवर्तिनि दार्शनिकवाङ्मये दार्शनिकावधारणाप्रकाशका जाताः।

5. दार्शनिक-मान्यता-विषयिणी सूचना

वेदपुरुषस्य मुखभूतमिदं व्याकरणशास्त्रम्। तस्मात् छन्दःपदवाच्येषु वेदेषु अत्र स्वाभाविकी महती श्रद्धा निष्ठा च सूत्रकारस्य। तां दृष्ट्वैव वार्त्तिककारो महाभाष्यकारश्च व्याकरणाध्ययनस्य मुख्यप्रयोजनानि वेदसम्बद्धानि प्रत्यपादयताम्। यथा– रक्षोहागमलघ्वसन्देहाः प्रयोजनम्।[1] एवं सत्यपि प्रत्येकं कालखण्डे जनानां चिन्तनशैल्यां भूयान् भेदः किंच परस्परं वैपरीत्यं भवति। तथाविधानि जनचिन्तनधाराविषयकाणि सूत्राण्यप्यत्र द्रष्टुं शक्यन्ते। तत्रैकं महत्त्वाधायि सूत्रं वर्तते – 'अस्तिनास्तिदिष्टं मतिः[2]।' अनेन सूत्रेण चिन्तनविषयिण्यस्तिस्रो धाराः प्रामुख्येण सूच्यन्ते। यथा – अस्ति परलोकादिविषयिणी मतिर्येषां ते आस्तिकाः। नास्ति परलोकादिविषयिणी मतिर्येषां ते नास्तिकाः। अपि च दिष्टं मतिर्येषां ते दैष्टिकाः भाग्यवादिनो वा।

6. विविध-दर्शनेषु प्रयुक्तायाः पारिभाषिक-शब्दावल्याः प्रयोगः

विविधदर्शनेषु प्रयुक्तायाः शब्दावल्ययाः अत्र पारिभाषिकपदतया क्वचित् सङ्कोचः, क्वचिच्च सामान्यार्थ-दृष्ट्या प्रयोगो दृश्यते। यथा–

गुण इति पदं विविधशास्त्रेषु विविधार्थेषु प्रयुज्यमानो दृश्यते। यथा– साङ्ख्याः सृष्ट्याविर्भावकरीं प्रकृतिं त्रिगुणात्मिकामाहुः। स्पष्टं यत् तत्र यानि सत्त्वादीनि त्रीणि तत्त्वानि भवन्ति,तानि गुणशब्देन व्यवह्रियन्ते। नैयायिकानां सप्तपदार्थेषु प्रसिद्धो द्वितीयो गुणः चतुर्विंशतिविधः। अत्र व्याकरण-शास्त्रे भगवता पाणिनिना 'अदेङ् गुणः[3]' इदं सूत्रं विधाय अदेङ् इत्यत्रैव सङ्कोचितः। अथवा अत्र एवमपि विचारयितुं शक्यते यदत्र त्रयो वर्णाः साङ्ख्यानां त्रिगुणानां सङ्केताः स्युः। अकारः सत्त्वगुणप्रधानस्य नारायणस्य वाचकः। एकार इति सन्ध्यक्षरं अकारस्य इकारस्य च योगेन निर्वर्त्यते। इ-वर्णो माया-वाचकः। माया प्राधायेन प्रवृत्तिकरी बन्धनकरी वा। अकारस्य उकारस्य संयोगेन निर्वरत्यमानः ओकारः तमसः प्रतीको भवति। यतोस्मिन्नुचारिते सतिअधरोष्ठयोर्निमीलनेन मुखपिधानं भवति। साङ्ख्यशास्त्रेऽप्युच्यते– 'गुरु वरणकं तमः'[4] अत्रायमपि विशेषो यदाचार्येण सामान्यार्थेष्वपि बहुत्र गुण इति पदं प्रयुक्तम्। यथा 'विभाषा गुणेऽस्त्रियाम्।'[5] 'तृतीया तत्कृतार्थेन गुणवचनेन'[6] चेत्यादीनि।

---

1. पा.8.2.50
2. महाभा. पस्शाह्निकम्।
3. पा.4.4.60
4. पा.1.1.2
5. साङ्का. अत्र अयमपि विशेषो यदयं शब्दः सामान्यार्थेऽ
6. पा.1.2.25

तथैव न्याय-दर्शने 'उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि'[1] इति तृतीयपदार्थत्वेन निरूपितं कर्म अष्टाध्याय्यां यद्यपि पारिभाषिकतया 'कर्तुरीप्सिततमं कर्म'[2] इति प्रयुक्तम्, तथापि कर्तरि 'कर्मव्यतिहारे[3]', 'कर्मणि घटोऽठच्[4]' 'गुणवचनब्राह्मणादिभ्यःकर्मणि[5]' इत्यादिषु स्थलेषु सामान्यार्थे न्यायसम्मतार्थे प्रयुक्तः।

न्याय-दर्शने संयोगः समवायश्चेति द्विविधः सम्बन्धो भूयान् दृश्यते। तत्र संयोगस्तु व्याकरण-शास्त्रस्यान्वर्थसंज्ञा- 'हलोऽनन्तराः संयोगः[6]'। अत्र अज्भिरव्यवहिताः संयोगसम्बन्धवन्त एव हलः संयोगपदेनोच्यन्ते। संज्ञाभिन्ने सामान्येऽप्यर्थे पदमिदं भगवता पाणिनिना प्रयुक्तम्। यथा - 'कालाध्वनोरत्यन्तसंयोगे[7]', 'अत्यन्तसंयोगे च[8]' चेत्यादि। अत्र समवायशब्दः प्रायः समूहार्थे दृश्यते - 'समवायान् समवैति'[9] इत्यनेन ठक्-प्रत्ययं विधाय सामवायिक इति शब्दं व्युत्पादितः।

7. उपसंहारः

इमं विषयमादाय अयं खलु लघीयान् प्रयासः। अद्यत्वे अष्टाध्याय्याः, एतादृशां च ग्रन्थानां विविधपक्षैरध्ययनस्य वर्तते महती आवश्यकता। उपर्युक्तेन विवरणेन इदं स्पष्टं भवति यदष्टाध्याय्यां दर्शनविषयकाः ये शब्दाः प्राप्यन्ते, तेषां कश्चनार्थसम्बन्धः परवर्तिन्या दार्शनिक-शब्दावल्या सह अवश्यमेव विद्यते। अपि च, ये व्यापकार्थाः शब्दाः सूत्रकारेण पारिभाषिकतया प्रयुक्ताः, तदितरस्थलेषु तेषां व्यापके स्वाभाविके वार्थेऽपि प्रयोगो महता कौशलेन कृतः। इदमपि महत्त्वपूर्णः पक्षो यदष्टाध्याय्यां प्रयुक्ताः अन्वाख्याताश्च शब्दाः परवर्तिन्याः दर्शन-परम्परायाः विकासे महत् साहाय्यं व्यदधुः।

---

1. पा.1.129
2. तर्कसङ्ग्रहः
3. पा.1.4.49
4. पा.1.3.14
5. पा.5.2.35
6. पा.5.1.123
7. पा.1.1.7
8. पा.2.3.5.
9. पा.2.1.28

व्याकरणानां माहेश्वरसूत्रमूलकत्वम्

डॉ. रामसलाहीद्विवेदी

लोके सुविदितमेव यत् पाणिनीयं व्याकरणं वेदाङ्गत्वेन अद्यत्वे भगवतः शब्दब्रह्मणः कालशक्त्या अभ्यनुज्ञया प्रतिष्ठापितम्। अत एव भगवता पतञ्जलिना "वृद्धिरादैच्"[1] इति सूत्रे संज्ञाधिकारः कर्तव्यः न वा इति विचारप्रघट्टके लिङ्गकरणाद्वा इति प्रतीकमुपादाय इत्संज्ञालोपादयश्च न कर्तव्या भवन्ति इत्यनन्तरं सिद्धत्येवं परमपाणिनीयं भवति इत्युक्तम्। तेन अपाणिनीयस्य अनुशासनत्वमिदानीं नाभिमतम्। अतः अस्यैव व्याकरणस्य साध्वनुशासनत्वमवगन्तव्यम्। तदेव भट्टनागेशीयं लघुशब्देन्दुशेखरस्थं वाक्यमस्यैव वेदाङ्गत्वमिति सङ्गतिमुपैति।

यद्यपि भिन्नक्रमेण एवकारस्य समायोजनं विधाय अप्यर्थतां वा प्रतिपाद्य समादधते विपश्चितः। तथापि अद्यत्वे पाणिनीयमित्यनुरोधात् कालशक्तिस्वभावाच्च अत्रापि अद्यत्वे अस्यैव वेदाङ्गता अवगन्तव्या। वेदाङ्गतायां मानं श्रुतिमूलकत्वमेव। अत इति माहेश्वराणि इति वाक्येन नातो अधिकं नातो न्यूनं केवलं चतुर्दशसंख्यापरिमितं सूत्रजालमित्यर्थ इतिशब्दस्य। अथ च महेश्वरप्रसादलब्धानि सूत्राणि माहेश्वरपदस्य विवरणं ग्रन्थकृद्भिः निकाममङ्गीकृतम्।

किञ्च एतानि माहेश्वरसूत्राणि साक्षात् श्रुतिरूपाणि वाग्व्यवहारस्य प्रवर्तकानि च भवन्ति। न हि एतान्यन्तरा वाग्व्यवहारः प्रभवति लोके। तदेव नृत्तावसाने एतेषामुपदेशः सङ्गच्छते। नृत्तावसाने इत्यस्य अयमभिप्रायः यत् नृत्तं नाम गात्रविक्षेपः, अर्थात् गात्रविक्षेपैः सङ्केतैर्वा भावानभिव्यङ्तुं कश्चित् प्रयासविशेषः नृत्तपदेन अभिधीयमानः भवति। यदि नृत्तमाध्यमेन तादृशाः गूढाः भावाः गुह्यतरा उपदेशा: वा न शक्याः उपदेष्टुं तदा वाचा एव प्रवर्तना कर्तव्या। अतिविस्तरस्यापि शब्दजालस्य मात्रिकासु एव समावेश इति अतिरोहितः। मात्रिकासु च सर्वशक्तिसमन्वयः आगमिकैः बहुधा प्रतिपादितः। माहेश्वरसूत्रे वर्गाणां मातृकापाठापेक्षया व्यत्यासेन स्थापनयापि मात्रिकाजालमेव शिवसूत्रमनुहरति। अतः पूर्वं पञ्चमवर्णाः, ततः चतुर्थाः, ततः तृतीयाः, ततो द्वितीयाः, अन्ते प्रथमाः इत्यादिरूपेण वर्णानां क्रमविशेषेण स्थापना कञ्चित् अपूर्वं भावं स्पष्टयति। जाग्रत्स्वप्नसुषुप्तीनामपि अत्र स्थानं नितान्तं सुस्थिरमवलोक्यते। अज्भिः सह सुषुप्त्यवस्थायाः, अन्तस्थसंज्ञकवर्णानां यणां स्वप्नावस्थया सह, कवर्गादीनां जाग्रदवस्थया सह सम्बन्धः। अक्षु केवलं सुखाभिसन्धिः, यण्सु मिश्रिताभिसन्धिः सुखस्य प्राचुर्यञ्च, कवर्गादिषु सुखदुःखयोः पर्यायेण उपलब्धिः समेषामनुभूता। हकारसकारयोस्तु प्राणरूपता हंसः इति निर्देशात्। संयुक्ताक्षराणां क्षादीनां प्रपञ्चनियामकत्वमभिमतम्। एतदेव सर्वं मात्रिकारहस्यविवेके यथागमं प्रतिपादितम्। अत एव मात्रिकाबन्धः इत्याद्यपि अभिमतं भवति।

1. पा.सू. 1.1.1

एवम्भूतं विलक्षणशक्तिसम्पन्नं शिवसूत्रजालं प्राणिमात्रस्य हितकरं सर्वसमर्थमिति ऋषिभिर्दृष्टम्। तत्रापि पञ्चधा महावाक्येन व्याकरणशास्त्रस्य प्रवृत्तेः सत्त्वात् प्रक्रियाविवेचनद्वारैव स्फोटोपलब्धिः इति सिद्धान्तस्य सर्वसम्मतत्वात् प्रक्रियायाः एव प्रामुख्यं प्राथमिकत्वञ्च अभिमतं भवति। पश्यन्त्याः परिणामः विवर्तो वा स्फोटरूपतायां प्रतिफलति। तस्या एव सञ्चारः आनादं परिलक्ष्यते। तेनैव **उपदेशः गुह्यतत्त्वानामित्य**स्ति कश्चित् नियमः। ऋषीणां कृते पश्यन्त्या नादेनोपदेशः जनसामान्यानां कृते तु वैखर्या उपदेश इति चावलोक्यते। तस्यैव सुलभत्वात् सर्वग्राह्यत्वाच्च। विवर्तसिद्धान्तस्वीकारेण वैखर्या अपि ब्रह्मरूपता उपपद्यते। अत एव **तुरीयं वाचो मनुष्या वदन्ति** इत्यत्र वाचः तुरीयं वैखरीरूपं मनुष्या वदन्ति इति नागेशभट्टीयं मतमवलोक्यते। तदेव **नामाख्यातोपसर्गनिपाताश्च** इत्यत्र च पदेन परापश्यन्तीत्यादीनां संग्रहः जायते। ये तु त्रय्या वाचः परंपदमित्येव समामनन्ति तेषां मते तुरीयः वाचः इत्येव योजना कर्तव्या अर्थात् वाचः कश्चिदेवांशः व्यवहाराय उपादीयते जनैः।

भट्टनागेशमते तु त्रय्या वाचः परं पदमिति कथनं व्याकरणस्य माहात्म्यनिरूपणावसरे प्रतिपादितमिति हेतोः तिसृणां वाचामेव उपादानं न परायाः, व्याकरणस्य तत्रैव गतेः सत्त्वात्। यतः तिसृणां वाचामेव हंसः इति रूपता अभिमता, इयमेव प्राणशक्तिः स्पन्दरूपता च। परायास्तु बिन्दुरूपत्वादनादिनिधनत्वाद्वा अक्षरनिमित्तता एव साधिता न तु वर्णरूपता। अवसरस्तु व्याकरणस्य वर्णरूपतायामेव परायाः ज्योतिरूपत्वात् ब्रह्मरूपत्वाच्च। तदेव **सत्या विशुद्धिस्तत्रोक्ता विद्यैवैकपदागमा** इत्यादिभर्तृहरिवाक्यं सङ्गच्छते। एकं पदमागमः बोधकं यस्याः सा एकपदागमा प्रणवादिपदैः बोध्यमाना परावागेव परामृश्यते। बहुशास्त्रसामञ्जस्याद्वाचः चतुष्टयत्वमेवाङ्गीकरणीयमत एव नैकागमविरोधः। एतेनास्य ब्रह्मराशिता सङ्गच्छते राशीत्यस्य ब्रह्मप्रतिपादको राशिः इत्यपि अर्थः प्रतिपाद्यते। मातृकाप्रबन्ध मवलम्ब्य नैकैः आचार्यैः स्वकीयमभिप्रेतं यथामतमवधारितम्। तत्रादौ भगवतः शिवस्य साक्षाच्छिष्यः परमात्मनः हार्दमवलम्ब्य स्वकीयं मतमुपस्थापयति। तन्मतोपस्थापने इदमेव रहस्यं यत् "उद्धर्तुकामः सनकादिसिद्धान्" इत्येव मुख्यं प्रयोजनम् अक्षरसामाम्नायस्य, अतः तदनुरोधेनैव व्याख्यानं करणीयम्। तद्यथा –

आचार्यनन्दिकेश्वरकृतकाशिकानुसारम् अइउण् इति सूत्रव्याख्याप्रसङ्गे **चित्कलामिम्** इति कथनेन इदं सिद्ध्यति– अकारो नाम निर्गुणः परमेश्वरः इम् अर्थात् इकाररूपिण्याः कामकलायाः अवलम्बनं प्राप्य जगद्रूपेण प्रवर्तितः सन् सगुणभावेन स्वसत्ताम् अभ्यव्यनक्। एतत्कथनेन जगत्कर्तृत्वेन सगुण-निर्गुण-चित्कलेतितत्त्वानां स्वातन्त्र्यपारतन्त्र्ययोः कस्याश्चित् प्रबलयुक्त्याः निर्धारणाभावात् प्रमाणाभावाच्च वैयाकरणमतं द्वैतपक्षे अद्वैतपक्षे वा निर्धारयितुम् अशक्यम्। अत एव ऋलृक् इतिसूत्रस्य व्याख्यायाम् आचार्यनन्दिकेश्वरेण स्वाभिप्रायः पूर्णतः स्पष्टीकृतोऽस्ति।

ऋलृक् सर्वेश्वरो मायां मनोवृत्तिमदर्शयत्।
तामेव वृत्तिमाश्रित्य जगद्रूपमजीजनत्॥[1]

---

1. नन्दिकेश्वरकृतकाशिका 2

अर्थात् अत्र सूत्रे प्रथमाक्षरम् ऋकारः परमेश्वरबोधकः, लृकारः मनोवृत्तिरूपमायातत्त्वस्य बोधकः तथा च अनुबन्धभूतः ककारः क्रियाबोधको विद्यते। इत्थं ह्यस्यार्थो भवति– ऋकाररूपपरमेश्वरेण मायारूपीं वृत्तिं प्रदर्श्य तामेव अवलम्ब्य च स्वेच्छया जगत् प्रकाशितम्। इदमेव तथ्यम् आचार्यभर्तृहरिकृतस्य वाक्यपदीयस्य ब्रह्मकाण्डस्य आद्यकारिकायाम्

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥[1]

इत्यत्र स्पष्टम्। अर्थात् शब्दब्रह्मणः सम्प्रभागासम्प्रभागौ इत्यवस्थाद्वयं स्पष्टम्। मायारूपिण्या अविद्यया सह सम्प्रविभागावस्थां प्राप्नोति तथा च विद्यातत्त्वसन्निधानेन असम्प्रविभागावस्थां प्राप्नोति। अत्र सम्प्रविभागो नाम विवर्तावस्था, असम्प्रविभागश्च संवर्तावस्था। यथा च भर्तृहरेः कारिका–

एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात्।
अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनैव वर्तते॥[2]

वाक्तत्त्वस्य सर्वरूपत्वं पोषयति। आचार्योपमन्युना ऋकारस्य परमेश्वरवाचकत्वेन प्रमाणमिदं प्रस्तुतम्– **"ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्"**[3] इति। अस्य समन्वयं कुर्वन् सः कथयति– तं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ऋ इति स्वरूपम् अवगन्तव्यम्। महावाक्यार्थवत् तत्पदार्थाभिकाङ्क्षायाम् 'ऋ सत्यम्' इत्युक्तम्। अत एव **"सोऽकामयत बहु स्यां प्रजायेय"**[4] इत्यादिश्रुतिसन्दर्भितसिद्धान्ताः अनुस्रियन्ते। **सोऽकामयत** इत्यत्र तत्पदाभिप्रायः श्रौततन्त्रस्य अस्माद् मन्त्राद् ग्रहीतव्यः –

मत्तो ह्यभून्मनोरूपं लृकारः परमेश्वरी।

अर्थात् एक एव प्रणवः त्रिधा विभज्यते इत्यनुसारं प्रणवरूपशब्दतत्त्वात् मनोरूपलृकारस्य उत्पत्तिः स्वीक्रियते। तेनैव लृकारेण सह च ऋकारस्य तादात्म्य अभ्युपगम्यते। इत्थम् ऋकारलृकारयोः उभयोः तादात्म्येन वृत्तिवृत्तिमतोः तादात्म्यं स्पष्टम्। यद्यपि तादात्म्यं भेदघटितं भवति, यथा हि लक्षणम्– तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम् इति। अर्थात् भेदः वास्तविकः अभेदश्च आरोपितः। तथापि वैयाकरणनिकाये स्वस्य स्वस्मिन् तादात्म्यस्य प्रतिपादितत्वाद् अत्र वृत्तिवृत्तिमतोः अभेदसंसर्गः परिलक्ष्यते।

एतदनन्तरं तृतीयक्रमे एओङ् इति सूत्रं प्राप्नोति। एतच्च आचार्योपमन्युः इत्थं व्याख्याति– अक्षरात्मकोऽकारः इकाररूपमायया युक्तः सन् प्रज्ञानरूपतां प्राप्नोति। अत एव सः प्रज्ञानात्मा सन् सर्वेषु वस्तुषु नानात्वं निरस्यन् एकत्वं प्रतिपादयति।

एवं प्रकारेणैवास्य अक्षरसमाम्नायस्य चित्तत्वावबोधने प्रकामः विस्तारः साधितः आचार्येण, न केवलमुपमन्युना शतपथब्राह्मणेऽपि अस्याचार्यस्य पाणिनेः कञ्चित् विधिमवलम्ब्य ब्रह्मणः साक्षात्

1. वा.प. 1.1
2. वा.प.1.3
3. नन्दिकेश्वरकृतकाशिका उपमन्युभाष्यम् 2
4. तैत्ति.उ.

संकेतः प्रदत्तः। यथा श्रुतिः - "समञ्चनप्रसारणयोरेव अनुजानीते, तथैव आचार्यस्य पाणिनेः समञ्चने पक्षपातः अवलोक्यते, समञ्चितस्यैव संप्रसारणसम्भवात्" इति। तदेव उपाग्निविद्यायामेवम्भूतः मन्त्रोऽपलभ्यते -

अथातः समञ्चनप्रसारणस्यैव। पशुरेष यदग्निः
यदा वै पशुरङ्गानि संचाञ्चति प्र च सारयति।
अथ स तैर्वीर्य्यं करोति। प्राणो वै समञ्चनप्रसारणम्
यस्मिन्वा अङ्गे प्राणो भवति तत् सञ्चाञ्चति प्र च सारयति॥[1]

इति। एतेन परब्रह्मणीव शब्दब्रह्मण्यपि वाक्प्राणस्य समञ्चनप्रसारणाभ्यामेव व्यञ्जनस्वरसिद्धिरवकल्पते। तथाहि व्यञ्जनानां सम्प्रसारणात् स्वरत्वं सम्पद्यते। स्वराणां तु समञ्चनात् व्यञ्जनत्वं भाव्यते। तच्चेदं समञ्चनं स्वरद्वयसंपरिष्वङ्गादियोग- विशेषादेवोपपद्यते।

किञ्च "तवचकाकिलनस्स्तुतिः" इत्यभिनवगुप्तपादाचार्यानुसारेण सर्वमपि मातृकाजालं तैजसमेव। इयञ्च मातृका आर्याणां नितान्तं स्पष्टा, परन्तु म्लेच्छाणामपि मातृका निरर्थका न भवति, अर्यैः अग्राह्यत्वात् सा प्रशस्ता न भवति। उक्तञ्च मातृकाप्रपञ्चे यत् - "होडाचक्रनाम्नी आसुरी वर्णमातृका सप्तत्रिंशद्वर्णा। असुराणां पुरात्वे बहवोऽवान्तरभेदा आसन्। तेष्वेको मयासुरविभागो विद्याशिल्पकलावीरता- सभ्यतागुणविशेषाच्छ्रेष्ठ आसीत्, एष एवासुरविभागः पुरात्वे यवन इत्याख्यायते स्म।" इति। अइउण् इत्यादीनि तु माहेश्वरमातृकापदेन अभिधीयन्ते, ब्रह्ममातृकाजालमद्यत्वे लोके साक्षाद्व्यवह्रयते। एतेनेदं स्पष्टं यत् पाणिनीयं व्याकरणं नहि केवलं व्युत्पत्तये कल्पितमपितु तस्य मुख्यमुद्देश्यं प्राणिमात्रस्य उद्धरणमेव।

किञ्च बिन्दुविसर्गमभिलक्ष्य केचन गुह्यतमाः सिद्धान्ताः आगमशास्त्रेषु निरूपिताः सन्ति। यथा मात्रिकाचक्रविवेके पद्यमुपलभ्यते -

अन्तर्मुखी भवति बिन्दुगतिर्विसर्गस्योक्तागतिर्गुरुजनेनबहिर्मुखीति।
पूर्वं सुषुप्तिपदमध्यमुपैति जाग्रन् मध्यात्तमृच्छतिपरस्तुसुषुप्तिमध्यात्॥[2]

अस्यायमभिप्रायः यत् बिन्दोः अन्तर्मुखीगतिर्भवति, विसर्गरूपस्य जीवस्य तु बहिर्मुखी गतिर्भवति। बिन्दुपदेन शिवः अभिप्रेतः, यद्यपि आगमशास्त्रे बहुत्र बिन्दुविसर्गयोः अर्थाज्जीवमहेश्वरयोः विश्रवणात्मकः कश्चित् स्वभावः निर्धारितोऽस्ति। बिन्दोः विश्रमणं विसर्गस्य संसरणमिति प्रसिद्धमस्ति। एतेन इदं सिद्धं भवति यत् बिन्दुः निवृत्त्यात्मके संसरणे जाग्रदवस्थायां प्रविश्य सुषुप्तौ सन्निविष्टो भवति। जाग्रत्स्वप्नसुषुप्त्यवस्थासु प्रत्येकं दशाद्वयं भजते। तत्र जडात्मिका दशा, अजडात्मिका दशा च विभागस्य मुख्यं स्वरूपमतः, एतासु दशासु जडाजडभागद्वयमध्ये यत्र सन्धिरवलोक्यते तत्रैव अवस्थानभागः परिलक्ष्यते। अनेन नियमेन जडः जाग्रदवस्थायां परिसमाप्तायां तुरीयं पर्यायभूतमजडजाग्रदवस्थायाः

1. शत. 9.1.14
2. मातृकाचक्रविवेकः 1.23

प्रारम्भः क्रियते। तन्मध्ये सुषुप्तिः भवति, तत्समाप्त्यनन्तरमेव जडसुषुप्तिः प्रारभ्यते, तस्याः पूर्वमेव उद्बुद्धः सन्धिः सुषुप्तिमध्यमः कथ्यते। मध्यपदस्य इदं स्वरूपं यत् बिन्दोरन्तर्मुखदशायां निवृत्त्यात्मकसंसरणे बिन्दुजागृतमध्ये सुषुप्तिपदमध्ये च जडसुषुप्तौ सन्निवेशः जायते। सूत्रस्य अन्तिमे चरणे विसर्गस्य बहिर्मुखदशायाः इदं तात्पर्यं यद्विसर्गस्य अवस्थायां बिन्दोः प्रवृत्तिः सुषुप्तिमध्यमारभ्य जाग्रन्मध्यमयावद्भवति। ततः अजडसुषुप्तिपरिसमाप्त्यनन्तरमेव उद्बुद्धजडसुषुप्तिः जायते। अस्याः अवस्थायाः अपरं नाम सुषुप्तिमध्यावस्था कथ्यते। अतः सिद्ध्यति यत् विसर्गावस्थायां बिन्दोः संसरणं भवति। पुनश्च सुषुप्तितः आरभ्य जडजाग्रदवस्थायाः अन्तिमं यावज्जायते। इयमेव प्रक्रिया विसर्गस्य बहिर्मुखी प्रक्रिया भवति। एतच्च शिवानन्देन स्वतन्त्रानन्दनाथविरचितमात्रिकाचक्रविवेकस्य व्याख्यायां प्रपञ्चितम्[1]।

एवं प्रकारेण इदं पाणिनीयं व्याकरणं कोटिशः गुह्यतरसिद्धान्तमण्डितं सर्वथा उपयुक्तं चकास्ति, मन्येऽहमस्य बहिरन्तर्स्वरूपेषु नूनमेव काचिद्विचित्रा शोधसरणिः प्रयतनीया। तत्रैव दिशि मे लघुतमः कश्चित् प्रयासान्यतमः वर्तते।

---

1. बिन्दुगतिरन्तर्मुखीभवति विसर्गस्यगतिर्वहिर्मुखीति। गुरुजनेनोक्ता, तयोर्विश्रमणं संसरणस्वभावतेति प्राक्प्रतिपादितत्त्वा-दत्राप्रतिपादनमितिमन्तव्यम्। अतः कारणात् पूर्वोपसन्निहितवाक्ये पूर्वनिर्दिष्टो बिन्दुः सन्निहितवाक्यपूर्वनिर्दिष्टो जाग्रन्मध्यात्सुषुप्तिपदमध्यमुपैति तिसृणामपिदशानां प्रत्येकं जडाजडजाग्रत्परसमाप्त्यनन्तराद्बुद्धं तुर्यापर्यायाजडजाग्रत् प्रारम्भपदं जाग्रन्मध्यं ततः पूर्वावधेः सुषुप्तिपदमध्यमभेदसुषुप्तिपरिसमामप्तिपदमुत्तरावधिमुपैति। परस्तु उत्तरनिर्दिष्टो विसर्ग इत्यवगम्यते इति।

पदभेदविचारः

श्रीबद्रीनारायणगौतमः

इदं सुविदितं यत् सर्वत्र व्यवहारे प्रयुक्तानामनन्तवाक्यानामानुकूल्येन एकत्वबुद्ध्या प्रसरीकरणार्थम् आचार्यैः यथामनीषं लाघवार्थं केचन उपायाः प्रकल्पिताः। तत्र तेषामाग्रहानुरोधेन जातिः व्यक्तिः, उभयम्, किञ्चिदन्यद्वा शब्दवाच्यत्वेन पदार्थविशेषाः परिकल्पिताः। तत्र –

एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा।
नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः॥[1]

तत्र एकपदेन जातिरवबुद्ध्यते। जातिपदेन प्रवृत्तिनिमित्तस्यैव ग्रहणं भवति। प्रवृत्तिनिमित्तस्य लक्षणं तु **"वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितीयप्रकारताश्रयत्वम्"** इति। यद्यपि जातिरित्येव पदार्थः इति, पक्षे इदं लक्षणं न सङ्गच्छते। यत एकस्या एव जातेर्वाच्यत्वेन सत्त्वात्। अतोऽत्र पक्षे प्रवृत्तिनिमित्तपदेन असाधारणधर्मो गृह्यते। यदा तु उभयं पदार्थः तदा गदाधरभट्टोक्तशक्तिवादसमर्थितं लक्षणमिदमानुकूल्यमाधत्ते। परन्तु यदा त्रिकं (त्रिकसंघातः) पदार्थः, तदा अस्य लक्षणस्य समन्वयः कर्तुं न शक्यते, तेन लक्षणान्तरं परिकल्पनीयं भवति। अतो वैयाकरणैः श्रीबालकृष्णपञ्चोलिमहाभागैः प्रवृत्तिनिमित्तस्य लक्षणं वैयाकरणभूषणसारस्य प्रभाटीकायामेवमुपकल्पितम् – **प्रातिपदिकविशिष्टत्वं प्रवृत्तिनिमित्तत्वमिति । वैशिष्ट्यञ्च स्ववाच्यत्व-स्ववाच्यवृत्तित्व-स्वजन्यशाब्दबोधीयमुख्यविशेष्यतासमानाधिकरणो- पस्थितीयविशेष्यतानिरूपितप्रकारता-श्रयत्वैतत्त्रितयसम्बन्धेन**[2]। तेन इदं तु अवश्यमेव प्रतिज्ञातं भवति यदत्र सम्प्रदाये शब्दवाच्यत्वेन अभिप्रेतया जात्या प्रवृत्तिनिमित्तमसाधारणधर्मो वा उपगृहीतो भवति। इयञ्च जातिः अखण्डोपाधिरूपेणापि व्याख्यातुं शक्यते। तत्र एतत्सर्वं परिलक्ष्यीकृत्यैव आचार्यः श्रीभर्तृहरिः अनन्तवाक्यानामेकत्वबुद्ध्या व्याख्यातुमुपक्रमते। तथा च कारिकामाह –

द्विधा कैश्चित् पदं भिन्नं चतुर्धा पञ्चधापि वा।
अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत्[3]**॥**

अत्र इदं रहस्यमवगन्तव्यं यत् –

---

1. वैयाकरणभूषणसारः कारिका 25
2. वैयाकरणभूषणसारः, प्रभाटीका कारिका 25
3. वा.प.3.1.1

यथार्थजातयः सर्वाः शब्दाकृतिनिबन्धनाः।
तथैव लोके विद्यानामेषा विद्या परायणम्॥[1]

अत्रार्थजातेः शब्दगता जातिः निबन्धिका भवति, तत्र अखण्डायाः जातेः अञ्जसा गृहीतुमपोद्धारपरिकल्पनायाः शरण्यमभिमन्य "अपोद्धृत्यैव वाक्येभ्यः" इत्येषः कश्चित् पथिविशेषः परिकल्पितो भवति। यतो हि समग्रमपि व्याकरणमष्टसु कार्येषु प्रतिज्ञातमुपनिबद्धञ्च आचार्येण भर्तृहरिणा स्वयमेव। तद्यथा– "**अपोद्धारपदार्थाः ये ये चार्थाः स्थितलक्षणाः**[2]" इत्यादिकारिकाभिः तस्य हार्दं स्पष्टीकृतम्। अत्र जातेः परिचायकत्वावसरे अनुसङ्गतस्य तदाधारस्य व्याख्यानमुपयुक्तमेव, अतः जातिसमुद्देशस्यादौ पदानां विभागमवधारयति। तदेवाह कारिकां "द्विधा कैश्चिद्" इति।
अत्र कारिकायां कैश्चिदिति पदमुल्लिख्य सर्वेषां विकल्पानां द्वाराणि समानरूपेण उद्घाटितानि। यतः रूचीनां वैचित्र्यात् पदार्थावबोधोपक्रमस्य कल्पनामात्रसत्त्वे कल्पनायाश्च ज्ञानरूपत्वेन ज्ञानतन्त्रस्य अनियतत्वात् प्रतिभाधीनत्वाच्च विकल्पप्रामुख्यं स्वाभाविकमेव। अत्र अपोद्धार इत्यत्र अपपूर्वपदात् उत्पूर्वपदाच्च हृधातोः कर्मणि घञि अपोद्ध्रियते इति व्याख्यानमर्थात् **पृथक् क्रियते वाक्यार्थात् यत् तदेव अपोद्धारपदार्थरूपेण संगृहीतं** भवति। तदेव केचनाचार्याः द्विधा एव इति पदं मन्वते, स च विभागः नामाख्यातभेदेन प्रसिद्धः। यद्यपि नामाख्यातोपसर्गनिपाताश्च इत्यादिना यास्काचार्येण पदानां विभागाः चतुर्धाः परिकल्पिताः तथापि उपसर्गनिपातकर्मप्रवचनीयानां नामसु एव संग्रहः, यद्वा कर्मप्रवचनीयानां **कर्मक्रियां प्रोक्तवन्तः** इति व्याख्यानेन आख्यातेषु संस्थानमवद्योतितम्। यतः कर्मप्रवचनीयाः क्रियागतविशेषमेव द्योतयन्ति। निपातास्तु सत्त्वप्रधानेन तदानुगुण्येन च नामसु अन्तर्हिताः भवन्ति। यद्यपि नामस्वपि हिरुक्पृथगित्यादयः वर्जनक्रियाप्रधानाः शब्दाः वर्तन्ते, तथापि क्रियावाचकत्वेन तेषामाख्याते एव अन्तर्भावः करणीयः। तेन स्पष्टं वक्तुं शक्यते यदुपसर्गनिपातयोः अर्थानुरोधेन नामसु समावेशः, कर्मप्रवचनीयानाञ्च आख्याते समावेशः, अतः पदस्य द्वैविध्यमेव उपपद्यते। अत एव द्विधा कैश्चिदिति प्रतिज्ञातं कारिकायाम्।

अयञ्च पदविभागः अखण्डवाक्यव्युत्पत्तौ उपाय एव, यतः आनन्त्याद् वाक्यानां स्वरूपलक्षणेन ज्ञानं दुष्करम्। अन्ये तु चतुर्धा पदमिति मन्वते, तत्र नामाख्याताभ्यां सह उपसर्गनिपातयोरपि पार्थक्येन अवस्थानं प्रतिपाद्यते, यतो हि केषाञ्चिद् मते इमे द्योतकाः, अन्येषां मते तु वाचकाः वा भवन्ति। व्याकरणप्रक्रियायामपि स्वसन्निधानेन स्वातन्त्र्येण स्वकीयं महत्त्वमुपपादयन्ति। यथा – "अभिनिविशश्च"[3], "अधिशीङ्स्थाऽऽसां कर्म"[4], "उपान्वध्याङ्वसः"[5], "उपोऽधिके च[6]" इत्यादि। अतः एतेषां स्वातन्त्र्येण परिकल्पनं समुचितमेव। कर्मप्रवचनीयानामाख्यातेषु अत्र समावेशः करणीयः। येषां मते पञ्चधा

1. वा.प.1.15
2. वा.प.1.24
3. पा.सू. 1.4.47
4. पा.सू. 1.4.46
5. पा.सू. 1.4.48
6. पा.सू. 1.4.87

विभागः अभिमतः तत्र कर्मप्रवचनीयानामपि स्वातन्त्र्येण गणना क्रियते, यतो हि कर्मप्रवचनीयाः उपसर्गेषु अन्तर्हिताः न भवन्ति विशेषात्। अयं हि विशेषः उपसर्गाः हि क्रियाविशेषप्रकाशकाः भवन्ति, इमे तु न। अतः तेषु नान्तर्भावः। यथा शाकल्यस्य **संहितामनुप्रावर्षत्** इति वाक्ये संहितानिशमनं पूर्वं भवति तदैव प्रवर्षणक्रियायाः अवतारः जायते। अत्र निशमनपूर्वकमेव प्रवर्षणमिति वाक्यार्थेन कश्चिद् विलक्षणः हेतुहेतुमद्भावः उपस्थाप्यते न तु क्रियाविशेषप्रकाशकत्वमात्रम्। अतः उपसर्गेषु एतेषामन्तर्भावः कर्तुं न युज्यते। आख्यातेष्वपि अनेन हेतुना अन्तर्भावो न भवति तत्र क्रियामात्रस्य प्रतीतेः सत्त्वात्। अतः पञ्चधापि पदं कल्पयितुं युज्यत एव। अत्र कारिकायां दृष्टान्तः उपात्तः "प्रकृतिप्रत्ययादिवत्" इति। यथा प्रकृतिप्रत्ययादिकल्पना अनियता वर्तते तथैव पदापोद्धारोऽपि अनियत एव। प्रकृतिप्रत्ययादि इत्यत्र आदिपदेन आगमस्य विकारस्य च ग्रहणं कर्तव्यम्। यथा विकारे **रञ्जेर्णौ मृगरमणे नलोपो वाच्यः** इत्यत्र रमणं हिंसा। रजयति मृगान् इत्यत्र नलोपमात्रेण हिंसा अवगम्यते, आगमेषु तु भवतीत्यत्र पूजार्थता, भवन्तीत्यत्र स्त्रीत्वविशिष्टवर्तमानकालिकसत्ता-कर्तृकरूपार्थावगतिः। एवं प्रकारेण दृष्टान्तदार्ष्टान्तिकयोः काल्पनिकत्वरूपसामान्यधर्मेण सामञ्जस्यमाकलनीयम्।

अत्र द्विधा चतुर्धा इत्यत्र ग्रन्थकारेण विधापदार्थः विशेषारम्भेण परिशीलितः। तत्र संख्यावाचकाद् द्विशब्दात् "**संख्याया विधार्थे धा**[1]" इत्यनेन सूत्रेण धाप्रत्यये सति द्विधेति पदं सिद्ध्यति। तत्र प्रत्ययार्थः प्रकारः, तदेवोपक्रम्य हेलाराजः प्रकाशटीकायां द्विधापदस्य पदार्थं निरूपयति। प्रकारो हि विधार्थः, प्रकारशब्दार्थः सादृश्येऽर्थे विशेषणे च प्रयुक्तो भवति। एतत्सर्वं "**यथाऽसादृश्ये**[2]" इति सूत्रे कैयटेन सविस्तरं प्रतिपादितम्। यत्र सामान्यस्य भेदकः विशेषः भवति तस्यैव प्रकारपदेन ग्रहणं कर्तुं शक्यते। अयं भावः यदनियतविशेषगुणस्य नियतविशेषगुणप्रतिपादनाय विशेषणं प्रयुज्यते, न तु तद्रूपोपघाताय। अत एव प्रकाशटीकायामुक्तं सामान्यस्य भेदको विशेष इति। अत्र सर्वत्र सादृश्यमेव प्रकार इति मन्यते कैश्चित्। यतो हि अत्र व्याकरणशास्त्रे वाक्यस्यैव प्राधान्यम्, तत्रान्वयव्यतिरेकनिमित्तार्थमुपजीव्य प्रकृतिप्रत्यययोः अपोद्धारः परिकल्पितः। तदेव वार्तिककृता उक्तम् – "**सिद्धं तु अन्वयव्यतिरेकाभ्याम्**[3]" इति। तेन यथा अखण्डवाक्यगतपदस्य काल्पनिकत्वं तथैव पदभेदस्यापि काल्पनिकत्वमेव। अनेन काल्पनिकत्वरूपधर्मेण सर्वत्र सादृश्यमुपकल्पनीयम्। सादृश्यलक्षणम्– **तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्**[4] इत्यादिना तादात्म्यरूपं परिकल्पनीयम्। यद्वा **स्वभिन्नत्वे सति स्वगतभूयोधर्मवत्त्वम्**[5] इत्यादिनाऽपि सादृश्यस्य व्यवस्थापनं कर्तुं शक्यते। अत्र ग्रन्थकृता कैश्चिदिति पदमुल्लिख्य कस्यचिद् मतविशेषस्य परिकल्पना कृता। अथवा पक्षान्तरे बुद्ध्या परिकल्पितस्य सादृश्यस्यैव विधापदार्थत्वेन व्यवस्थापनं जातम्। यतो हि ज्ञानप्रतिबिम्बितस्य बाह्यानुकारित्वेन समानरूपेण

1. पा.सू. 5.3.42
2. पा.सू. 2.1.7
3. महाभाष्यं पश्पशाह्निकम्
4. परमलघुमञ्जूषा शक्तिनिरूपणम्
5. न्या.सि.मुक्ता. प्रत्यक्षखण्डम्

प्रतिभासनात् बुद्धिस्थबाह्यपदार्थमध्ये ऐक्यस्य प्रतिभानात् तत्र प्रकारार्थे सादृश्यमुपकल्प्यते। यतो हि सङ्कल्पितसादृश्यस्य बाह्यस्य निवर्तनाद् अर्थवत एव अपोद्धारस्य सम्भवात् संविदाकारस्य एव अर्थवत्त्वे तस्यैव सादृश्यप्रयोजकत्वेन सत्त्वात्। अत एव अर्थापोद्धार एव पदापोद्धारे निमित्तम्। तेन वर्णापोद्धारः अवसरं न प्राप्नोति, अनेनापि कल्पयितुं शक्यते यन्निरंशस्य अखण्डस्य वाक्यस्य कारकोत्कलितक्रियास्वभावस्य यावन्तोऽपि अशांशिकल्पनया बौद्धबाह्यविभागाः परिकल्पिताः ते सर्वेऽपि समानरूपेण प्रतिभासनात् सामान्यधर्मवन्त इति प्रतीयते। अनेनापि प्रकारेण विधापदार्थस्य व्याख्यानं कर्तुं शक्यते।

सिद्धान्ते वाक्यार्थः स्थितलक्षणः निरंशः कारकोत्कलितक्रियास्वभावः, तत्र बुद्ध्यैव अंशांशिकल्पनया अर्थमुपजीव्य सिद्धसाध्यभावमूलकस्य विभागः अपोद्धारेण परिकल्पितः। अत एव पदापोद्धारः द्विविधः – प्रथमः नामाख्यातरूपः, शक्तिशक्तिमतोरभेदांशमुपकल्प्य यावानपि कारकांशः स सिद्धरूपः वर्तते, यद्यपि नामपदानां प्रत्ययार्थस्य संख्यादेः शाब्दं प्रधानं भवति, तथापि अर्थतः प्रातिपदिकार्थस्य जात्यवच्छिन्नस्य द्रव्यत्वेन उपस्थीयमानस्य सिद्धरूपस्यैव द्रव्यस्य प्राधान्यमभिमन्यते। यतो हि तत्रैव द्रव्यत्वशक्तौ संख्याकारकशक्तीनां समवायेन आलम्बनं स्पष्टमनुभूयते। अतः नामाख्यातयोः विशेषणत्वात् निपातोपसर्गकर्मप्रवचनीयानामनयोः पदयोरेव समावेशः जायते। लोकेऽपि सिद्धार्थाभिधायि नामपदं तदर्थगतविशेषं द्योतयन् निपातोऽपि तत्रैवान्तर्भूयते। तदेवोक्तं प्रकाशकारेण "**सिद्धं हि अर्थं साक्षाद्वा अभिदधातु, तद्गतं विशेष्यं वा प्रकाशयतु**"[1] इति, अर्थात् द्योतकत्वं वाचकत्वं वा भवतु निपातानामेतेन भेदः न भवति परन्तु अपोद्धारे पदभेदसामान्यमेव भेदस्य प्रयोजकं भवति। यद्यपि आचार्येण यास्केन "**क्रियाप्रधानमाख्यातं सत्त्वप्रधानानि नामानि**"[2] इत्यादि अभिधत्तम्। तत्र आख्यातं क्रियाप्रधानं भवतीति नाभिप्रायः अपितु यत्क्रियाप्रधानं तदाख्यातम्। तेन हिरुगादीनां वर्जनार्थं प्रामुख्येन अभिदधतामाख्यातपदवत्त्वमेव। अतः उपसर्गकर्मप्रवचनीयपदान्यपि आख्यातपदवन्ति एव भवन्ति। तेषां साध्यार्थगतविशेषार्थस्य द्योतनात्। एवं निपातोऽपि यथायथं विभागेन परिकल्पनीयः। एवं प्रकारेण यथा भेदानां सम्भावना जायते तथैव द्विधा, चतुर्धा, पञ्चधा वा विभागाः उपकल्पिताः भवन्ति।

अत्र वाक्यादपोद्ध्रियमाणस्य पदस्य विभागः अर्थविशेषादन्वयव्यतिरेकनिमित्तमेव वर्तते। तदेवं द्विधा चतुर्धा पञ्चधा वा इत्यादिना यथामनीषं परिकल्पयितुं शक्यते। तेन "स्वौजसमौट्..[3]" इत्यादीनि विभक्तिबोधकपदानि पदव्युत्पादनावसरे शास्त्रकृता तत्तदर्थेषु संकेतितान्यपि वाक्यार्थबोधनावसरे पार्थक्येन ते परिगणयितुं न शक्यन्ते। अत एतावानेव पदापोद्धारः।

---

1. जातिसमुद्देश प्रकाशटीका कारिका 1
2. निरुक्तम् 1.1
3. पा.सू. 4.1.2

सिद्धान्तेषु त्रिपुरसिद्धान्तस्य परमं वैशिष्ट्यम्

डॉ. रविशङ्करशुक्लः

अयि आगमोपासनरताः रसिकाः शाम्भवीविद्योपासन-सत्परायणाः साधकवर्याः भवन्तः विचारयन्तु आगमसम्प्रदाये साधनायाः महन्महत्त्वं विद्यते। साधनां विहाय नान्यो मार्गः जीवनस्य कल्याणायेति जिज्ञासा समुदिते, भगवानादिनाथः श्रीविद्यासाधनां कुर्वत्सूपासकेषु हृत्कमले पराशक्तेरतिशयप्रीतिरुत्पन्ना स्यादिति। तत्प्रीतिः कुतस्मादुत्पद्ये साधनापथिसु।

तस्याः साधनायारखिललोककल्याणकर्त्र्याः निमेषोन्मेषाभ्यामेवानादिकालतः संसार-सागरे निमग्नानां जीवनानां झटित्युद्धाराय आगमविद्यासरणिरूपकल्पितो विद्यते। अत्र एवं विचारः प्रस्थितो भवति।

यथा तुलसीदासप्रणीतं रामचरितं निगमागमसम्मतं विद्यते, तथैव अयमपि त्रैपुरसिद्धान्तः निगमागमसम्मतमिति नात्र संशयः। यथा षड्दर्शनानि न्यायवैशेषिकवेदान्तादीनि शास्त्राणि सन्ति तेभ्यः सर्वेभ्यः शास्त्रेभ्यः परमोत्कृष्टतमं यच्छास्त्रं वर्तते तद् आगमशास्त्रमेव वर्तते। एवेत्यत्र नास्ति काचन संशीतिलेशः। इयान् विशेषः-वेदाः परमेशितुर्नि श्वासभूताः स्वत एवाऽविर्भवन्ति, आगमास्तु पारम्पर्यपरत्वं भजन्ते तेषामद्य उपदेष्टा पार्वतीपतिः भगवान् शिव एव पार्वतीमुपदिदेश तद्रहस्य जातम्। उक्तञ्च-

आगतं शिववस्त्रेभ्यो गतं च गिरिजामुखे।[1]
मतं हि वासुदेवस्य तस्मादागम उच्यते॥

अनयारीत्या स्पष्टं प्रतीयते यद्वासुदेवाभिमतमागमशास्त्रं भगवतः शिवात् निर्गतम् इदमपि ध्येयं भवति तन्त्रागमयोः सकलशास्त्रे परस्परमभेदेन व्यवहारदर्शनात् तन्त्रशब्दस्यापि व्युत्पत्त्या तन्त्रागमयोः एकत्वमेव लक्ष्यते। तथा चोक्तम्-

तनोति विपुलानार्थान् तत्त्वमन्त्रसमन्वितान्।
त्राणं च कुरुते यस्माद् तन्त्रमित्यभिधीयते॥

अतश्च योगरूढ़तन्त्रागमशब्दार्थयोः साम्यं दृष्टवा तात्रिकैरन्यैर्वा विद्वद्भिरभेदेनानयो व्यवहारः कृतः तथा हि मृगेन्द्रतन्त्रं मृगेन्द्रागमः, शैवतन्त्रं शैवागमः, भैरवतन्त्रं भैरवागम इत्यादि। तथा च 'मालिनीविजयवार्तिके[2] तदुपगामिनि तत्रालोकविवेकशिवस्य पञ्चवक्त्रेभ्यो दशानां शैवागमानामष्टादशानां च रौद्रागमानां, चतुष्टष्षष्ठि संख्याकानां च भैरवागमानामाविर्भावप्रकारो निरूपितोऽस्ति। तेषु स्थलेषु

1. स्वच्छन्दतन्त्रम्
2. पृ. (36 41) 1.18

समानतया सामान्यविशेषभावेन वा कृतो व्यवहारो अनुभूयते इति निष्कर्षः।

शैव-शाक्त-यामलभेदात्तन्त्रस्य त्रैविध्यमस्ति। शैवतन्त्रे शिवभट्टारकस्य, शाक्तन्त्रे शिवाभट्टरिकायाः, यामलतन्त्रे तु पुनर्द्वयोरनयोरभेदस्य वर्णनं कृतमस्ति। तत्र शिवतत्त्वमर्थरूपम्, शक्तितत्त्वं शब्दरूपम्, तस्य तत्त्वद्वयस्य भेदकल्पनाऽत्र तन्त्रे नैव शक्यते, अपि तु योऽयं शब्दः, सोऽर्थः, योऽर्थः सोऽयं शब्द इति रीत्या इयं शक्तिः सोऽयं शिवः सेयं शक्तिरित्येष सिद्धान्तो यामतन्त्रेऽभिमतोऽस्ति। तत्रैव यामलत्वस्य स्वरूपं परिपश्यन्ति विदः। एवमेवागमसिद्धान्तस्यातीव महिमा। निगमनागमसम्प्रदाये नितरां सुलभतया द्रष्टुं शक्यते। यतोहि अनयैव संख्या देवानां, देवतानाञ्च पूजनक्रमः सर्वागमेषु दृश्यते। रुद्रयामले उक्तञ्च-

आगमोक्तविधानेन कलौ देवान् यजेत् सुधीः।[1]
नहि देवा प्रसीदति कलौ चान्यविधानतः॥

अथोक्तेन वचसा ज्ञायते निगमागमसम्प्रदायाः आराधनायाः एकाविलक्षणा उपासना पद्धतिः वर्णितो विद्यते। अनया पद्धत्या झटिति देवाः प्रसीदन्ति। साधनाकर्तुरपि मनोरथः पूर्णतामेति, उपासनायाः विस्तरः परिदृश्यते यथा शास्त्रेषु दीक्षा कस्यापि देवस्य देवतायाश्च। मन्त्राधिकारिणः के? मन्त्राणां दशसंस्काराः, पुरश्चरणविचारः, प्रातःकृत्यविधिः, षट्चक्रोपासना, शाक्ततिलकविधिः, तान्त्रिकसन्ध्या, अन्तर्यागविधिः, बहिर्यागविधिः, मातृकान्यासः, मालानिर्णयः, मन्त्रजपप्रकारः, ध्यानविधिः, जपविधिः भूतशुद्धिश्च विद्यते।

यद्यपि भारतीये वाङ्मये निगमागमशब्दयोः समानार्थे प्रयोगो बहुत्र दृश्यते यथा श्रीहरिणा आगमशब्दस्य निगमार्थे प्रयोगः कृतः। पुनश्च परवर्तिकाले शैवरौद्राद्यागमेषु वैष्णवागमेष्वपि च प्रयुक्तो निगमशब्दः, आसननिर्णयः वैदिकीसन्ध्या, तान्त्रिकसन्ध्या, तर्पणविधिः, होमादिनियमः, दीपस्थानचिन्तनम्, मुद्राविचार इत्यादयः विषयाः सामान्यतया सर्वैरपि साधकवर्यै यथाविभवं सति सामर्थ्येन अनुष्ठेयमिति। उपासनाया तत्तद् ग्रन्थेषु भिन्नाःभिन्नाः क्रमाः परिलक्षिताः भवन्ति, तथाप्यत्र संक्षेपेणेह उपस्थापितम्।

त्रिपुरसिद्धान्तस्याङ्गतया अयं खलु यः प्रथमाङ्गत्वेन मातृकान्यासस्य क्रमो दृश्यते। तन्त्रेषु साऽतीव मनोरमा सर्वकामदुग्धा च वर्तते। तत्र नादिफान्ता वर्णमाला मालिनी इति विशेषः। शैवतन्त्रेषु पञ्चाशदक्षरा मातृका प्रोक्ताः, सेयं पञ्चाशद् वर्णात्मिका मातृका अष्टवर्णात्मिका भवति। तथाहि अष्टवर्णाः अकचटतपयशा अकारादयः षोडशस्वराः, प्रथमवर्गकादयः पञ्चवर्णाः, द्वितीयवर्गचादयः पञ्चमचतुर्थः, तादयः पञ्च पञ्चमः, पादयः पञ्च-षष्ठः, यादयश्चत्वारः सप्तमः, शादयः पञ्च अष्टमः। अनया रीत्या अष्टवर्गात्मिका भगवती मातृका त्रिपुरसुन्दरी एकपञ्चाशदक्षरा मातृका इति तेषां मते शवर्गः षड्करः यवर्णलवर्णयोरपि पञ्चपञ्चवर्णात्मकतैवेति मतविशेषोऽपि निर्दिष्टः सेतुबन्धकृतः। आभिर्पङ्तिभिः सुस्पष्टतया ज्ञातं भवति यद्मातृकाक्षराणां कियन्महत्त्वं एनं विना लौकिकपारमार्थिक-व्यवहारयोः सिद्धिर्न स्यात् तस्माद् वक्तुं शक्यते यद् मातृकैव जगदाधाररूपेण भासते। उक्तञ्च

1. रुद्रयापल

''मालिनी हि परा शक्ति निर्णीता विश्वरूपिणी''ति त्रिपुरसिद्धान्ते मालिनीशक्तेरस्ति विशिष्टं महत्त्वम्। अत एव त्रिपुरसिद्धान्तोऽपि समस्तेषु सिद्धान्तेषु विशिष्टतमं स्थानं प्राप्नोति नात्र शंसीति।

तन्त्रशब्दोऽपि आगमसमानार्थक एव वैष्णवागमेषु लक्ष्मीतन्त्रपद्मतन्त्रप्रभृतिग्रन्थदर्शनात्। अस्यां स्थितौ आगमतन्त्रयोरर्थान्तरत्वेऽपि निगमादाभिधेयापेक्षया वैलक्षण्यमस्त्येव। यद्यपि स्वयं प्रमाणान्येतानि न हन्तव्यानि हेतुभिः।

श्रीत्रिपुरोपासनायां मतत्रयम्

सौन्दर्यलहरी व्याचक्षणेन श्रीलक्ष्मीधरेण तु त्रिपुरोपासनायां मतत्रयमुपदिष्टम् कौलमतम्, मिश्रमतम्, समयिमतं च। तत्र चतुष्षष्ट्यागमाः कौलानां नित्याषोडशिकार्णवे प्रतिपादिताः। मिश्रमतेऽष्टौ आगमाश्चन्द्रकलाज्योत्स्नावतीप्रभृतयः, समयिनां तु शुभागमपञ्चकम्। चतुःषष्ट्यातन्त्रे अस्य श्लोकस्य व्याख्याने श्रीलक्ष्मीधरेण एषां त्रिविधागमानां परिचयः प्रदत्तोऽस्ति, वसिष्ठ-सनक-शुक-सनन्दन-सनत्कुमारनामानः पञ्चमुनयः शुभागमपञ्चकनाम्ना प्रख्यातसंहितापञ्चके समयाचारमार्गमुपदिष्टवन्तः। आन्तरपूजारतिः समयाचार उच्यते। अत्र मते समयस्य सदाख्यतत्त्वस्य समर्चा सहस्रदलकमल एव विधीयते, न तु बाह्ये पीठादौ। बाह्यपूजारतिः कुलाचार इत्युच्यते।

अथ च श्रीचक्रस्य वियच्चक्रमिति नामान्तरम्। वियत्पूज्यत्वाद् वियच्चक्रमिति। वियत्पूज्यत्वं द्विविधं दहराकाशजम्, बाह्याकाशजं च। तत्र बाह्याकाशावकाशे पीठादौ भूर्जपत्रशुद्धपट्टहेमरजतादिपट्टतले लिखित्वा समर्चनम्। इदमेव कौलपूजा। दहराकाशत्वंन्नामहृदयाकाशवकाशे श्रीचक्रमस्य पूजनम्। किञ्च पञ्चशक्तिचतुर्वह्निसंयोगात् श्रीचक्रस्य निष्पतिरिति सार्वत्रिकी प्रसिद्धिः।

स्वाभिमुखात्रिकोणपरम्परायाः शक्तिसंज्ञात्वम्। विपरीतया वह्निसंज्ञात्वमिति समयः। कौलमतानुसारं त्वधोमुखानि चत्वारि त्रिकोणानि शिवात्मकानि ऊर्ध्वमुखानि पञ्चत्रिकोणानि शक्त्यात्मकानि। कौलमते संहारक्रमेण श्रीचक्रस्य खनं भवति, समयिनां मते तु सृष्टिक्रमेण भवति। कौलमतं तु द्विविधं पूर्वकौलम्, उत्तरकौलं च। तत्र 'शरीरं त्वं' (श्लोक 34) इति श्लोकेन पूर्वकौलस्य प्रतिपादनम् 'मनस्त्वम्' (श्लोक 35) इत्यादिना श्लोकेनोत्तरकौलस्य प्रतिपादनम्। उत्तरकौलमते शिवतत्त्वं शक्तितत्त्वेऽन्तर्भूतम्। तदेव 'चोपास्यम्।' 'तवाज्ञाचक्र....' (श्लो. 36) इत्यादिना पद्यषट्केन सामयिकं मतमुक्तमस्ति। 'कदा काले' इत्यनेन चरणनिर्णेजनजलमिति कथनेन समयाचार एवोक्तः।

सहस्रकमल एव चरणनिर्णेजनजलस्योपलब्धिः। 'सुधाधारासारैः' (श्लोक 10) इत्यर्धेन समयितमम्, 'अवाप्य स्वा' इत्यर्धेन च कौलमतं प्रतिपादितम्। शिरः स्थितं चन्द्रमण्डलं सर्वयोगशास्त्रसिद्धम्। समयिनां मते श्रीचक्रमेव चन्द्रमलडलम्, षोडशकलात्मत्वात्। श्रीविद्यायाः प्रतिपादादिषोडशतिथिषु कलावृद्धिक्षययोर्भवनात् चन्द्रमण्डलमिदमेव। सहस्रदलकमलान्तर्गत-श्रीचक्रात्मकचन्द्रबिम्बमध्यस्थिताया भगवत्याश्चरणकमलनिर्णेजनजलैः साधकस्य सर्वशरीरं संसिच्य पुनर्भुजङ्गरूपेणाधारकुण्डं प्रविश्य सुषुम्नामवष्टभ्य सा भगवती स्वपितीति श्लोकस्यास्याशयः। एवमेव सरस्वत्या लक्ष्म्या (श्लोक 11) इति श्लोकस्य व्याख्याने श्रीलक्ष्मीधरेण समयिसिद्धान्तकौशलसिद्धान्तयोः रहस्यं सम्यक् प्रतिपादितम्।

'मिश्रकं कौलमार्गं च परित्यज्यं हि शांकरि' इतीश्वरवचनाद् मिश्रमतं कौलमार्गः च परित्याज्यम्। चतुःषष्टितन्त्राणि कुलमार्गं एव। चन्द्रकलाद्यष्टकं तु कुलसमयानुसारित्वेन मिश्रकमिति कथ्यते। वैदिकानां कृते तु शुभागमपञ्चकमेव समादर्तव्यम्, केवलसमयमार्गप्रदर्शनपरत्वात्।

एवं लक्ष्मीधरोक्तायां टीकायाम् समयिमताख्यत्रिपुरोपासनायां तान्त्रिकोपासनायां वैदिककरणप्रक्रिया प्रदर्शिता। अथ च सौन्दर्यलहरीकृता लक्ष्मीधरप्रभृतिभिश्च योगप्रधानमान्तरमर्चनं समयिमतनाम्ना वैदिकप्रक्रियायां स्वीकृतम्। अभिनवगुप्तप्रदर्शितं रहस्यात्मककौलिक बाह्यर्चनं तु निषेधितम्।

कुलार्णवादिषु शाक्तागमग्रन्थेषु कौलसिद्धान्तः सर्वोत्कृष्टतया प्रतिपादिताऽस्ति। अभिनवगुप्तेनापि कौलिकसिद्धान्ते श्रद्धापूरितः समादरः क्रियते। एवं च लक्ष्मीधरस्यैतत्कुलसमयिगतप्रतिपादनेन वैदिकसिद्धान्तेषु श्रद्धातिशय एव संसूच्यते। सम्प्रति त्रिपुरसिद्धान्तस्य वर्णनं क्रियते।

अथ त्रिपुरसिद्धान्तः

यथा पृथिव्यप्तेजोवायुवियन्ति भूतानि पञ्च। गन्धरसरूपस्पर्शशब्दाः तन्मात्राणि पञ्च। उपस्थपायुपादपाणिपादः कर्मेन्द्रियाणि पञ्च। घ्राणरसनाचक्षुस्त्वक्श्रोत्राणि ज्ञानेन्द्रियाणि पञ्च। रजःसत्त्वतमोरूपाणि अहङ्कारबुद्धिमनांसि अन्तःकरणवृत्तित्रयं प्रकृतिर्गुणसाम्यरूपा। चित्तं पुरुषो जीवः। परमशिवगताः स्वतन्त्रता नित्यता नित्यतृप्तता-सर्वकर्तृता-सर्वज्ञाताऽख्याधर्मा एव सङ्कुचिता सन्तो जीवे क्रमात् नियति-काल-राग-कला-विद्याशब्दवाच्या भवन्ति। माया जगत् परमशिवयो भेदबुद्धिः। शुद्धविद्या तयोरभेदधीः। जगदिदन्तया पश्यन् परमशिव ईश्वरः तदहन्तया पश्यन् स एव सदाशिवः। शक्तिः परमशिवस्य जगत्सिसृक्षा तद्वान् एवं तत्त्वेषु प्रथमतत्त्वरूपः शिवः। इति षट्त्रिंशत्तत्वान्येव एतद् दर्शनप्रमेयजातम्। एतदात्मकं विश्वमेव परमशिवशरीरं जीवः। तद्विनिर्मुक्तः स्वरूपावबोध पुरूषार्थः।

आगमेषु त्रिपुरसिद्धान्तस्य प्रमुखं स्थानं विद्यते। अयं यः त्रिपुरसिद्धान्तः तस्य सिद्धान्तस्य प्रतिपादकः भगवानादिनाथः एवं श्रोत्री च भगवती पराम्बाराजराजेश्वरी देवता। एनं वृत्तं समर्थयति आगमीयं वचनम्-

गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः।
प्रश्नोत्तरपदैः वाक्यैः तन्त्रं समवतारयत॥[1]

अनेन कथाव्याजेन सुतरां निश्चीयते। यदस्य त्रिपुरसिद्धान्तस्य आगमत्वात् प्रथितस्य परमवैशिष्ट्यं प्रख्यापितं विद्यते। तन्त्रागमेषु एतादृक्सिद्धान्तेन जीवाः झटित्यैव मोक्षं प्राप्नुवन्ति च। यथा-

श्रृणु देवि प्रवक्ष्यामि ज्ञानानाम् ज्ञानमुत्तमम्।
येन विज्ञानमात्रेण भवाब्धौ न निमज्यति॥[2]

1. स्वच्छन्दतन्त्रम् 8.31
2. सौन्दर्यलहर्याभाष्ये श्लो. 31

मानवजीवने वेदाध्ययनस्य महत्त्वम्

डॉ. शैलेन्द्रप्रसाद उनियालः

षड्भाव[1]-विकारमापन्नेऽस्मिञ्जगतीतले मानुषजन्मजुषां सकलकल्याणसाधनाय अस्ति वेदाध्ययनेऽक्षरग्रहणार्थानुसन्धानप्रयोगे परम्पराख्यायाः त्रिवेण्याः सङ्गमस्य महत्त्वम्। यत्र विश्वं भवत्येकनीडम्[2]। यथा सङ्गमे कुम्भपर्वणि विश्वजना एकीभवन्ति नीडस्योपकल्कतया यथा कुम्भादिपर्वसु जनो जन्मजन्मान्तरीयपापमपनुदति तथैवात्र स्नातकः पञ्चज्ञानेन्द्रियैः ज्योतिभिः जन्मजन्मान्तरीय-पापमपाकरोति। **पञ्चनद्यः सरस्वतीमपियन्ति सस्त्रोतसः। सरस्वती तु पञ्चधा सो देशेऽभवत्सरित्॥**[3] उव्वटः दृषद्वती शतद्रश्चन्द्रभागाविपाशेरावतीत्यादिकाः सस्रातसः समानानि स्रोतांसि यासां तास्तथोक्ताः तु शब्दोऽवधारणार्थः। सरस्वत्येव पञ्चधा सा सा च स्वदेशेऽभवत् भवति। सरित् नदी तस्यां हि सारस्वतानि सत्राणि भवन्ति। मन्त्रस्यास्योपकालपकतया व्याजेन वा वक्तुकामोऽहं यत् पञ्चनद्यः नाम अस्माकं शरीरे पञ्चज्ञानेन्द्रियाणि सन्ति तैः पञ्चभिः निर्मलज्ञानाम्बुभिः आत्मतत्त्वं ज्ञानधारया स्नपयन्ति आचार्याः। अत्र स्नात्वाऽयं स्नातकः श्रोत्रेन्द्रियेण श्रुतिनिरुक्तादिज्ञानं गृहीत्वा नासिकया शिक्षादिसौगन्ध्यरूपं पुण्यो गान्धारस्तेन हेतुना सामवेदीयस्वरवर्णादीन् गृहीत्वा चक्षुषा शुभकालादिनिर्णयं ज्योतिषशास्त्ररूपं प्रगुह्य, वाचा शब्दसाधुत्वविषयां व्याकरणस्मृतिं विज्ञाय, इमां तनुं स्पर्शनोपस्पर्शनद्वारा कल्पशास्त्रछन्दःशास्त्रैः यज्ञविधिना यज्ञैश्च महायज्ञैश्च ब्राह्मीकर्तुं, मानवजीवने साफल्यावाप्तुकामः षडङ्गवेदमधीयीत वेदाध्ययनमहत्त्वं अभिगच्छन् विश्वधारायाः संस्कृतेः संस्कारवीचिषु स्नातः स्नातकः शुद्धो भूत्वा अधीतिबोधाचारणप्रचारैः शान्ति-सद्भावना-मैत्री-करुणा-सहिष्णुतादिवेदप्रतिपाद्यविषयान् सर्वजनसुखाय सर्वजनहितायवितन्वत् सिद्धान्तानां प्रयोगेण मानवानां प्रापणे सम्प्रति धर्ममोक्षौ विहाय अर्थकामौ एव सेव्येते फलतः समाजे न्यायहीनता वैचारिकी दूषणता च सञ्जाता। यथा-**गङ्गायमुने दूषिते जाते तथैव वैदिकी ज्ञानगङ्गापि दुर्बला जाता।**

शैशवे वदिविद्यायाः यौवने धर्मसेवनात्।
वार्धक्ये मुनिवृत्त्या च योगेनान्ते हरिं व्रजेत्॥
संस्कारस्य महानद्यां यः स्नास्यति वै पुमान्।
मेधया वर्च्चसा कान्त्या प्रजया च धनेन वा॥

---

1. षड्भावविकारा भवन्तीति वर्ष्यायणिः जायतेऽस्ति वर्धते विपरिणमतेऽपक्षीयते नश्यतीति। निरुक्त 1.1.2
2. वा. सं. 32.8
3. वा. सं. 34.11

परिपूर्णो भवेदत्र जन्मबन्धाद्विमुच्यते।

यद्गत्वा न पुनरायाति परमं सुखमाप्नुयात्।।

वैदिकसंस्कृत्या: संस्कारिता जना: सभ्या: भविष्यन्ति तत्कथमित्युक्ते–'जायमानो वै ब्राह्मण: त्रिभि: ऋणैर्ऋणवान् भवति ब्रह्मचर्यवासी.....।[1]

उपदेशमिमं श्रुत्वा नरो जागरितो भवेत्।

ज्ञात्वा चात्मानमुद्धर्तुं वेदमार्गावलम्बनम्।।

वेद: स्मृति: सदाचार: स्वस्य च प्रियमात्मन:।

एतच्चतुर्विधं प्राहु: साक्षाद्धर्मस्य लक्षणम्।।

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रह:।

धीर्विद्यासत्यमक्रोधो दशकं धर्मलक्षणम्।।

ऋणानि त्रीण्यपाकृत्य पुत्रमुत्पाद्य धर्मत:।

इष्ट्वा च विविधैर्यज्ञैर्मनो मोक्षे निवेशयेत्।।

व्यवस्थितार्यमर्याद: कृतवर्णाश्रमस्थिति:।

त्रय्याहि रक्षितो लोक: प्रसीदति न सीदति।।

एवंप्रकारेण वेदाध्ययन-संस्कारपरिमार्जितो भूत्वा जन: समाजस्य संरक्षणं विधायात्मानमुद्धर्तुं व्यवस्यति। अतो हि वैदिक ऋषिरुपदिशति स्नातकम्–

सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमद:। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव, अतिथिदेवो भव। यानि-यानि अनवद्यानि तानि त्वया सेवितव्यानि नो इतराणि।।[2]

इत्थं धर्माचरणेन मानवजीवने समृद्धि: समायास्यति। परमात्मन: नि:श्वासभूताया: सनातनवेदवाण्या: स्वाध्यायकर्मणा धर्म: सम्पद्यते।[3] ज्ञानेन मन्त्राणां युगानुकूलं नवीनार्थस्योमेषं तात्पर्यं च विज्ञाय ज्ञापयितुं च प्रभविष्यति वेदवित्। तत्रभवता निरुक्तस्य टीकात्र महता विदुषा दुर्गाचार्येण निर्ऋतिपदं विचारयता महत्यै गवेषणायै समुक्तं यत तत्रैवं सति प्रतिविनियोगमस्यान्येनार्थेन भवितव्यम् त एते वक्तुरभिप्रायवशादर्थान्यत्वं भजन्ते मन्त्रा:। न ह्येतेष्वर्थस्येयत्तावधारणमस्ति महार्था ह्येते दुष्परिज्ञानाश्च, यथाश्वरोहवैशिष्ट्यादश्व: साधु: साधुतरश्च वहत्येवमेते वक्तृवैशिष्ट्यात्साधून्साधुतराँश्वार्थान्स्त्रवन्ति। तस्मादेतेषु यावन्तोऽर्था उपपद्येरन्नधिदैवाध्यात्मधियज्ञाश्रया: सर्व एव ते योज्या नात्रपराधोऽस्ति।[4] इति

1. तै. सं. 6.3.10.5
2. तैत्तिरीयोपनिषद्
3. वेदस्याध्ययनाद्धर्म: सम्प्रदानात्तथा श्रुते:। स्वर्णशोऽक्षरशो ज्ञानाद्विभक्तिपदशोऽपि च।
4. निरुक्त 2.2 दुर्गभाष्यम्

धिया अत्रैको मन्त्रवर्णः समालोच्यते यथा–**इषे त्वो..... इन्द्राय भगम्** इन्द्रो-राजा, शासकः सर्वकारः तस्मै सर्वकाराय शासनविभागाय प्रजया भागः करः देयो येनास्माकं राष्ट्रस्याभिवृद्धिर्भविष्यति इति कस्यचिद्विदुषः मतं स्वीकरिष्यन्ति विद्वांसोऽहं मन्ये। वेदः प्रातिभचक्षुषा साक्षात्कृतानां तथ्यानां प्रशंसनीयः पुञ्जोऽस्ति। वैदिकयुगस्य मनीषिणां तथा लोकातीतार्षचक्षुर्मण्डितानां द्रष्टृणां वाणीषु सार्वदैशिकनैतिकतायास्तथा सार्वकालिकधर्मस्य च मूलप्रेरणायाः शाश्वतं स्फुरणं दृश्यते। अद्याप्यस्मिन् राष्ट्रे विश्वमानवान् शुभमार्गे प्रवर्तयितुं सामर्थ्यं वेदाध्ययनेनोत्पादयितुं शक्यते। अस्मिन् मार्गे वेदाध्येतुः दृशि धर्म एव जीवनयात्रायाः प्रमुखोपयोगिसाधनम् कल्पते।[1] धर्ममार्गः सुगमो विद्यते। सत्यस्य नौः धार्मिकं जनं पारं नयतिः[2], धर्मो विश्वस्य जगतः प्रतिष्ठा। लोके धर्मिष्ठं प्रजा उपसर्जन्ति। धर्मेण पापमपनुदति। धर्मे सर्वं प्रतिष्ठितं तस्माद्धर्मं परमं वदन्ति।[3] द्वयोः पुरुषयोः विवदमानयोः एकः खलु बलिष्ठोऽपि सन् न जयति दुराचारात्। यतो हि दुर्बलस्य धर्मः पुरुषार्थः जयहेतुः।[4] क्रमेऽस्मिन् स्मरन्त्याचार्याः वाजसनेयिनः आमनन्ति तच्छ्रेयोरूपमत्यसृजत धर्मं तदेतत्क्षत्रस्य क्षत्रं यद्धर्मस्तस्माद्धर्मात्परं नास्त्यथोऽबलीयान्बलीयांसमाशंसते धर्मेण यथा[5] राज्ञैवम्। वेदस्योत्तरकाण्डे परं प्रयोजनं ब्रह्म सुविचारितम् नावेदविन्मनुते तं बृहन्तम्।[6] तं बृहत्तत्वमवेदविन्नं जानाति कथमिति चेत् **रूपलिङ्गादिराहित्यान्नमानान्न-मरयोग्यता**[7] तस्य कारण ब्रह्मणः प्रमाणान्तरैः रूपलिङ्गादिस्वरूपराहित्यात् ज्ञातुमशक्यत्वात् धर्मब्रह्मणोर्वेदविषयत्वमङ्गीकृतमाचार्यसायणेन[8] एवं वेदेन अध्यात्मेन सह व्यवहारस्य परलोकेन सह इह लोकस्य मञ्जुलं सामञ्जस्यं सौरभ्यं सौलभ्यं च स्वकीयभव्योपदेशे प्रस्तूयते–

स्वाध्यायेन व्रतै.....व्रतजपनियमतपःस्वाध्यायक्रतुशमदमदयादानविशिष्टगुणैः यज्ञैः महायज्ञैश्च अयं देहः ब्रह्मीभवनाय कल्पते नरान्न नारायणत्वाय जीवत्वाच्छिवत्वाय।

सेनापत्यञ्च......सेनानियन्त्रणकार्यं राज्यनियन्त्रणकार्यं दण्डादिकारित्वं समलोकस्वामित्वमपि वेदज्ञाः कर्तुं पारयन्ति। माध्यन्दिनसंहितायाम् अग्निस्वरूपं परमात्मानं प्रार्थयते।

भवन्नग्ने-मा दुश्चरितात्पापायरणत् परित्रायस्व सुचरिते स्थापय,

परिमाग्ने दुश्चरिताद्वाधस्वा मा सुचरिते भज। उदायुषा स्वायुषोदस्थाममृताँ2अनु॥ येन मानवजीवने मानवमूल्यानामभिवृद्धिः सुसमृद्धिश्च भवेत् तत्कथमिति चेदत्रैवाग्रे मन्त्रे वर्णितं यत् सुमार्गे गच्छन् मानवः अवश्यमेव दुष्टान् परित्यज्य धनं लभते।

---

1. सुगा ऋतस्य पन्थाः, ऋ. 8.3.13
2. सत्यस्य नावः सुकृतमपीपरत्, ऋ. 9.73.1
3. तै. आ. 10.63
4. दुर्बलस्य बलं राजा बालानां रोदनं बलम्। बलं मूखर्यस्य मौनित्वं चौराणामनृतं बलम्।। चा. नीति
5. बृ. उ. 14.14
6. तै. ब्रा. 3.12.9.17
7. वै. न्या. 1.1.3.18
8. ऋ. भू. नृ. 114, चतुर्थ संस्करण, चौखम्बा पब्लिशर्स

सुष्ठु प्रेरयति वेदः धनलाभार्थं च आश्वासयति यस्मै अभिद्रवन्ति धावन्ति जनाः द्रविणमिति तत् निश्चयेन प्राप्स्यते धावनस्यावश्यकता नास्ति।

अथ गायत्रीमुखविज्ञानमन्तरेण[1] तद्विज्ञानं पूर्णं न भवति। अतस्तद्विज्ञानार्थं अर्थवादोऽभिधीयते यत् हे आश्वतराश्वे! यः एवं ब्रूयादहं तु गायत्री विद् गायत्र्याः प्रतिग्रहदोषेण हस्ती भूत्वा वृथाभिमानं करोति किं तस्येति? तम्राजाह तस्याः गायत्र्याऽअग्निरेव मुखं एवं वित् स स्वयमग्निमुखगायत्र्यात्मा सर्वं पापं सम्यग्भक्षयित्वा शुद्धः अग्निवत् पापस्पर्शरहितः अजरः अमृतश्च सम्भवति।

वित्तेन पूर्णामिमां कृत्स्नां ब्राह्मणेभ्यः प्रयच्छन् यावत् लोकं जयति, 'त्रिस्तावन्त' त्रिवृत्परिमाणं लोकं जयति वेदाध्येता स्वाध्यायेन। ततोऽपि भूयांसमधिकतरं अक्षय्याकं प्राप्नोतीति मानवजीवने वेदाध्ययनस्य महत्त्वम् स्फुटी भवति माध्यन्दिनशतपथब्राह्मणालोके।[2]

ब्राह्मणस्य वेदाध्ययनं परमं तपः[3] अनध्ययने शूद्रत्वम्। वैदिकषोडशसंस्कारैः निषेकादिभिः जीवनकालः पावनो भवति तस्माद् ऐहिकामुष्मिकशुभेच्छुभिः वैदिककर्मभिः श्रेष्ठत्वं महत्त्वं प्राप्तव्यम्।

या वेदस्मृति शास्त्रविन्मुनिरैर्जुष्टासुखैकास्पदा,
दैवी सम्पदलङ्कृता भगवता श्रीशेन संरक्षिता।
या वर्णाश्रम सारहार हृदया धर्मार्थमोक्षप्रदा
नित्या विश्वहितैषिणी विजयते सा वैदिकी संस्कृतिः॥

1. मा. श. 14.2-11-12
2. मा. श. 11.3.8
3. योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्। स जीवन्यते शूद्रत्वमाशु गच्छति सान्वयः॥ मनु.168

संस्कृतवाङ्मये ऋतूनामवधारणा

श्रीयोगेन्द्रकुमारशर्मा

यस्मिन् शास्त्रेऋतुस्थितिसूचकानांमेघ-मारुत-वृष्टि-कुञ्झटि-करका-हिम-तुषारादीनां विवेचनपूर्वकम्एतेषां भाविस्थितेः पूर्वसूचनोपलब्धि-विधयश्च वर्ण्यन्ते तच्छास्त्रं ऋतुविज्ञानमिति कथ्यते।[1] शास्त्रमिदं प्राच्यग्रन्थेषु वृष्टिज्ञानशास्त्राख्ययाऽपि प्रथितं दृश्यते। अत्र वृष्टिशब्देन आचार्यैः मेघ-मारुत-वर्षणावर्षण-कुञ्झटि-करका-हिम-तुषारादीनां सर्वेषां ग्रहणं कृतम्। शास्त्रमिदं प्राचीनकाले सुविकसितमासीदिति वराहमिहिरस्य बृहत्संहितया ज्ञायते[2] प्राच्याचार्यैः शास्त्रस्यास्य महत्वं स्वग्रन्थेषु सगर्वमुद्धृतम्। शास्त्रस्यास्य विभिन्नशाखानां सूत्रभूतो निर्देशः कौटलीये अर्थशास्त्रे वृष्टिदृष्ट्या शोभनसंवत्सरस्य ज्ञापकानां वर्णनप्रसङ्गे समुपलभ्यते। यथा-**तस्योपलब्धिबृहस्पतेः स्थान-गमन-गर्भाधानेभ्यः शुक्रोदयास्तमयचारेभ्यः सूर्यस्य प्रकृतिवैकृताच्च**[3] इति। अत्र स्थानं मेषादिराशिस्थितिः गमनं मेषादेर्वृषभादिसङ्क्रमः गर्भाधानं मार्गशीर्षादिषु षट्सु मासेषु तुषारादिदर्शनम्, आषाढमासपञ्चम्यादिषु नवसु तिथिषु सञ्चारः सूर्यस्य प्रकृतिवैकृतं स्वभावान्यथाभावः सपरिवेषत्वादय इति। शास्त्रस्यास्यैकस्याः शाखायाः सूत्रभूतो निर्देशो ब्रह्मवैवर्तपुराणेऽपि दृश्यते[4]।

अत्र हि कल्पे-कल्पे युगे-युगे प्रचलतोऽब्दक्रमस्य विधातृनिरूपितत्ववर्णनात् अथ च वृष्ट्यादिसूचकानां नृप-शस्याधिपमंत्रिजलाढक प्रभृत्तीनां क्रमानुवर्तस्यापि विधातृनिरूपितत्ववर्णनात् संवत्सरक्रमाश्रितो वृष्टिज्ञानविधिनिर्दिष्टो भवति। विधिरयमंशतः साम्प्रतमपि देशे जनैरुपयुज्यमानो दृश्यते। होलिकादाहाद् द्वितीयदिवसे भारतीयसम्वतसरारम्भोत्सवप्रसंङ्गे ग्रामेषु ग्रामवासिनो ग्रामपुरोहितद्वारा कुत्रचिदन्यत्र वा सार्वजनिकस्थाने एकत्रीभूय ग्रामपुरोहितादागामिवत्सरस्य शुभाशुभफलं शृण्वन्ति। अवसरेऽस्मिन् संवत्सरक्रमाश्रितविधिना ज्ञातं भाविवत्सरीयवृष्ट्यादिफलमपि वर्ण्यते। इत्थं विनष्टप्रायस्यापि लोकोपकारकस्य शास्त्रस्यास्य सूत्रभूतो निर्देशः प्राच्यग्रन्थेषूपलभ्यते।

---

1. उद्धृतं प्राच्य-भारतीयम् ऋतुविज्ञानम् - पृ. 01
2. दैवविदविहितचित्तो द्युनिशं यो गर्भलक्षणे भवति।
   तस्य मुनेरिव वाणी न भवति मिथ्याऽम्बुनिर्देशे।। गर्भलक्षणाध्यायः श्लोकः 3
3. कौटलीयार्थशास्त्रे द्वितीयाधिकरणे सीताध्यक्षप्रकरणे।
4. सूर्य-ग्रस्तञ्च नीरञ्च काले तस्मात् समुद्भवः। सूर्यो मेघादयःसर्वे विधात्रा ते निरूपिताः।।
   यत्राब्दे यो जलधरो गजश्च सागरो मतः। शस्याधिपोनृपो मैत्री विधत्रा ते निरूपिताः।।
   जलाढकानां शस्यानां तृणानाञ्च निरूपितम्। अब्देऽब्देऽस्त्येव तत्सर्वं कल्पे युगे युगे।।
   (ब्र.वै.पु.-श्रीकृष्णजन्मखण्डे 21-तमाध्याये श्लोक 105-107)

ऋतुविज्ञानस्य भौतिकस्थितिः -

पाश्चात्यमतेन वर्षे चत्वार ऋतवः वसन्तः ग्रीष्मः शरदः शिशिरश्च। वसन्तो वसन्तसंपातात् कर्कसंक्रान्तिपर्यन्तकालः ग्रीष्मः कर्कसंक्रान्तितः शरदसम्पातमध्यवर्तिकालः एवं शरदृतुः शरदसंपाताद् मकरसंक्रान्तिपर्यन्तकालः शिशिरर्तुश्च मकरसंक्रान्ति-वसन्तसंपातमध्यवर्तिकालः।[1]

ऋतूनाम् औष्ण्यस्य शैत्यस्य च कारणं सूर्यसन्निधिर्न यतः शिशिरर्तौ भूः सूर्यस्य समीपतमं वर्तते तथापि स एव स कालः शैत्यातिरेकस्य। एवं ग्रीष्मर्तौ भूः सूर्यस्य दूरतमं तिष्ठति तथापि न दूरत्वात् कापि न्यूनता औष्ण्यस्य। तर्हि किं कारणं ग्रीष्मे औष्ण्यस्य शिशिरे च शैत्यस्य? अत्र पृथिव्या अक्षस्य प्रवणता मुख्यो हेतुः। यदि पृथिवी स्थिरा भवेत् तदा न स्याद ऋतु वैभिन्यम्। एकस्मिन् स्थाने सर्वदैक एव तापक्रमो भवेत्। यदि पृथिव्या अक्ष ऊर्ध्वाधरः स्यात्तर्हि कश्चित् स्थानविशेषः सर्वदा सूर्य प्रति एकामेव प्रवणतां भजेत। निरक्षप्रदेशेषु सर्वदात्यौष्ण्म् ध्रुवप्रदेशेषु सर्वदातिशैत्यम् अर्थात् स्थान विशेषे सर्वदैक एव तापक्रमः परन्तु वस्तुतो नैवम्। ध्रुवयोर्लग्नं सूत्रं (अर्थात् अक्षः) क्रान्तिवृत्ततलस्योर्ध्वाधरात् 23°3°'मितं प्रवणतां भजते। अक्षोऽयं भूकक्षायां सर्वदा समानान्तर एकबिन्द्वभिमुखश्च अर्थाद् महाकाशे अक्षस्य दिक् न परिवर्तते। अक्ष एवं स्थितोऽस्ति यद् ग्रीष्मर्तौ पृथिव्या उत्तरार्धः सूर्याभिमुखः शिशिरर्तौ दक्षिणार्धश्च सूर्याभिमुखो भवति।[2]

अक्षस्य प्रवणत्वात् सूर्यस्य क्रान्त्यंशा विभिन्नाः। मकरसंक्रान्तौ सूर्यः सुदूरदक्षिणे वर्तते तस्य क्रान्त्यंशाश्च 23°3°'मिताः। वसन्तशरदसंपातयोः सूर्यो नाडीवृत्ते दृश्यते। कर्कसंक्रान्तौ सूर्यः सुदूरोत्तरे भवति तत्र तस्य क्रान्त्यंशाश्च 23°3°'मिताः।[3]

भौगोलिकदृशा खगोलीयदृशा च सूर्य-चन्द्र-पृथ्वीनां परस्पर स्थित्या सञ्चलनरूपेण च ऋतूनां प्रादुर्भावोऽभवत्। राशिचक्रेऽर्कस्यभ्रमणवशादेवर्तवो जायन्ते। यदाऽर्कः सायनमीनादिद्वादशराशिषु भ्रमति तदा क्रमेण वसन्तग्रीष्मवर्षाशरद्धेहमन्तशिशिराख्यषडर्तवो भवन्ति। व्यवहारे निरयणमानेना-प्यर्तूनान्निर्धारणं दृश्यते परन्तु तन्न समीचीनम्। वैदिककालादेवास्मिन् विषये सायनप्रयोगो दृश्यते। वेदेषु कुत्रचित् पञ्च कुत्रचित् त्रयः कुत्रचिच्च षडर्तूनां वर्णनं मिलति। परन्त्वधिकतरस्थानेषु षण्णामृतूनामेव वर्णनं दृश्यते।[4] यथा शतपथब्राह्मणे ''वसन्तो ग्रीष्मो वर्षाः। **ते देवा ऋतवः शरद्धेमन्तः शिशिरस्ते पितरो....... स (सूर्यः) यत्रोदगा वर्तते**''।[5] परन्त्वत्रैव माधवाचार्यानुसारन्त्रयाणामृतूनामेव व्यवहारो दृश्यते।[6] बहुषु स्थानेषु हेमन्तशिशिरयोः समासेन पञ्चानामेवर्तूनां विवेचनमुपलभ्यते। यथा- **पञ्च**

1. उद्धृतम् अर्वाचीनं ज्योतिर्विज्ञानम्, पृ. 23
2. उद्धृतम् अर्वाचीनं ज्योतिर्विज्ञानम्, पृ. 24
3. तत्रैव
4. तैत्तिरीयसंहिता 4.3.2 , 5.6.23
5. शतपथ ब्राह्मण 2.1.3
6. भारतीय ज्योतिष पृ. 49

शारदीयेन यजेत। .... पञ्च वा ऋतवः संवत्सरः।[1] पुनश्च – **द्वादशमासाः पञ्चर्तवो हेमन्तशिशिरयोः समासेन इत्यादयः।**[2]

यजुर्वेदे द्वादशमासानां वैदिकनामानि षड्ऋतूनामानि चोल्लिखितानि सन्ति। चैत्रादिमासानां मधुमाधवेति नामानि वैदिककाले प्रसिद्धा आसन्। द्वयोः द्वयोः मासयो एकर्तुर्भवति। **मधुमाधवयोः (चैत्रवैशाखयोः) वसन्तर्तुः।**[3] **शुक्रशुच्योः (ज्येष्ठाषाढयोः) ग्रीष्मर्तुः।**[4] **नभस्नभस्योः (श्रावणभद्रपदयोः) वर्षर्तुः।**[5] **इषोर्जयोः (आश्विनकार्तिकयोः) शरदर्तुः।**[6] **सहस्सहस्योः (मार्गशीर्षपौषयोः) हेमन्तर्तुः।**[7] **तपस्तपस्यो (माघफाल्गुनयोः) शिशिर ऋतुः**[8] भवतीति।

ऋतूनामारम्भो वसन्तादेव भवति। अस्मिन् क्रमे न कश्चन विवादो दृश्यते। यथा – **मुखं वा एतदृतुनां यद्वसन्तः।**[9] **पुनश्च तस्य ते (संवत्सरस्य) वसन्तः शिरः ग्रीष्मो दक्षिणः पक्षः, वर्षा पुच्छम्, शरदुत्तरः पक्षः हेमन्तो मध्यम्।**[10] अत्र पक्षिरूपेणर्तूनां समवायः कल्पितः। शास्त्रमिदं पुराकाले भारते सुविकसितमासीदिति वर्णनं वराहमिहिरस्य बृहत्संहितायांमिलति। यथा **दैवमिदविहतचितो द्युनिशं यो गर्भलक्षणे भवति। तस्य मुनेरिव वाणी भवति मिथ्याऽम्बुनिर्देशे।**[11] ऋतुविज्ञानं हिकृषि-शिल्प-वाणिज्य-प्रभृतीनांव्यवसायानामत्यन्तमुपकारिशास्त्रंवर्तते। कृषिव्यवसायस्य महदुपकारित्वाच्छास्त्रमिदं कृषिशास्त्रस्यापरिहार्यमङ्गमिति मन्यते। ऋतुज्ञानविरहितः कृषकः कृष्यां कदापि सफलो न भविष्यतीति। न चर्तुज्ञानं विनाऽपि सरित्कूपकुल्यादीनां साहाय्येन कृषिः सफला भवितुरमर्हतीति वक्तुं शक्यते यतो हि कृषिर्न केवलं जलाभावात् परमनवसरे वर्षणादतिवर्षणादपि च विनश्यति। अत एव महर्षिणा पराशरेणोक्तम् –

वृष्टिमूला कृषिः सर्वा वृष्टिमूलञ्च जीवनम्।
तस्मादादौ प्रयत्नेन वृष्टिज्ञानं समाचरेत्॥[12]

कृषिप्रधानेऽस्मिन् भारतवर्षे वैदिककालादेवार्तवानुसारं कृषेः वर्णनं समुपलभ्यते। आर्तवानुसारंकृषि-

---

1. तैत्तिरीय ब्राह्मण 2.7.10
2. एत. ब्राह्मण 1.1
3. मधुश्च माधवश्च वासन्तिकावृतूकृ यजु.13.25
4. शुक्रश्च शुचिश्च गेष्मावृतू ---यजु.14.6
5. नभश्च नभस्यश्च वार्षिकावृतू---यजु.14.15
6. इषश्चोर्जश्च शारदावृतू---यजु.14.16
7. सहस्सहस्यश्च हैमान्तिकावृतूद्द यजु.14.27
8. तपश्च तपस्यश्च शैशिरावृतू--- यजु.14.57
9. तैत्तिरीय ब्राह्मण 1.1.2.6-7
10. तै.ब्रा. 3-10-4-1
11. बृहत्संहिता गर्भलक्षणाध्याय श्लोक 3
12. कृषिपाराशर 2/01

विधेराविष्कारः वस्तुतस्तु सम्पूर्णमानवेतिहासे मानवस्य प्रथमा महत्युपलब्धिरस्तीति मन्यते सर्वैरितिहासज्ञैः। वैदिकर्षिभि ऋग्वेदे **अक्षैर्मादीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहुमन्यमानः।**[1] यजुर्वेदे **अन्नपतेऽन्नस्य नो देहि**[2] अथर्वसंहितायां नो राजा निकृषिं तनोतु[3] इति पदे-पदे कृषेर्महत्वं दरीदृश्यते। वेदोत्तरसाहित्येष्व-प्यार्तवानुसारङ्कृषेः वर्णनं दृश्यते। कृषेः महत्वं प्रदर्शयत् वेदव्यासस्तु कथयति यत् केवलं कृषिकर्ता एवोच्चसभायाः संसदः वा सभासदः भवितुर्महति, यथा - **न नः समितं गच्छेत् यश्च नो निर्वचेत्** कृषिम्।[4] शुक्रनीतावपि कृषेः महत्वं स्पष्टतया प्रतिपादितमस्ति। यथा - **कृषिस्तु चोत्तमावृतिः।**[5]

वेदादिष्वार्तव[6]-वर्णनम्-

भारतवर्षस्य जलवायोः तदृतवोऽपि स्पष्टतया ज्ञायन्ते तथापि तासां स्वरूपस्य प्रभावस्य च पृथग् विवेचनमावश्यकं भवति। **ऋतूनामधिष्ठाता सूर्योऽस्ति**[7] यस्य तेजसा पृथिव्याः प्राणिनाङ्कृते **ऋतुविभाजनं भवति। ऋग्वेदेऽनेकेषु स्थलेष्वृतूनामुल्लेखः कृतोऽस्ति।**[8] येन तासां स्वरूपस्य प्रभावस्य च ज्ञानं भवति। प्रायश एकस्मिन् वर्षे तिस्र ऋतवोऽभिमन्यन्ते विद्वद्भिः।[9] किन्तु तासां नामानि सामान्यतया नैव विनिश्चितीकृतानि। ग्रीष्म-शीत-ऋतवो एकस्मिन् वर्षे विभाजनमृग्वेदे स्पष्टतया न प्राप्यते। ऋग्वेदे वर्षस्य विभागद्वयं केवलमौपचारिकरूपेण प्राप्यते। तत्र कृतो विभागः ऋतुरूपेषु प्रचलितः स्वीकार्यश्च नास्ति। ऋग्वेदस्य एकस्मिन् स्थले **वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः**[10] इत्यत्र वसन्त-ग्रीष्म-शरदृतूनामुल्लेखोऽस्ति। तथा च **शतं जीव शरद वर्धमानः शतं हेमन्तान्छतम, वसन्तान्**[11] इत्यत्र शरद्-हेमन्त-वसन्त ऋतूनां विवरणमस्ति। प्रायशः सम्पूर्णे वैदिकसाहित्ये[12] वर्षा-शीत ऋत्वोः प्ररिचयः प्राप्यते। अतएव प्राचीनोऽस्माकं सप्तसैन्धवप्रदेशस्य तिसृणामृतूनां विभाजनमत्यन्तं संगतं प्रतीयते। कालान्तरे ऋतुविभाजनमवलम्ब्य ऋतुप्रभावविषयको विकासः जातः। अनेन ऋतूनां संख्या पञ्चतः षड्यावत्जाता। वैदिकविद्वांसः ऋग्वेदस्याग्रलिखितायां

1. ऋग्वेद -10//34/13
2. यजुर्वेद 11.82
3. अ.वेद 3/12/4
4. महाभारत उद्योगपर्व 36/13
5. शुक्रनीतिः 3/264
6. (ऋतुरस्य प्राप्तः - अण) ऋत्वनुरूपम् ऋतुसम्बन्धी वा। आप्टेकोषः , पृ. 159
7. ऋग्वेदः 1.95.03, पूर्वामनु प्रदिशं पार्थिवानामृतून्प्रशासत, 2.38.4 उत्संहायास्थाद्यतूर ररमतिः सविता देव आवाप्त।
8. ऋग्वेदः 1.15.2, 2.37.1,2,3, , 3.20.4 (ऋतुपा ऋतापा), 9.66.3
9. ऋग्वेदः 5.47.4, त्रिधातव परमा अ गातो, 7.10.2 स त्रिधातु , 1.164.2 त्रिनाभि, 48 त्रीणिनभ्यानि।
10. ऋग्वेदः 10.90.6
11. ऋग्वेदः 10.161.4
12. ऋक्. 2.33.2, 5.83.4, 6.4.8, 10.7, 12.6, 24.10 इत्यादिः। अथर्व. 8.2.22, 9.15, 13.1.18, तैत्तिरीयसंहिता 1.6.2-3 इत्यादिः। मैत्रायणीसंहिता 1.7.3, 3.4.8, काठकसंहिता 4.14, 9.16, बाजसनेहीसंहिता 10.10.14, शतपथब्राह्मणः 1.3.5.11, 6.2.2.3।

ऋचामृतूनामेतासां सङ्केतं स्पष्टरूपेण स्वीकृतवन्तः।

पंचपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम्।
अथेमे अन्य उपरे विचक्षणं सप्त चक्रे षडरे आहुरपितम्।।[1]

अत्र पञ्च पादं षडरे चेत्यत्र क्रमशः दशमासानां द्वादशमासानाञ्च वर्षमेकं मत्वा परञ्चसंख्याकाः षट्संख्यकाश्च ऋतवोऽभिमताः सन्ति।[2] ऋग्वेदस्यानुसारं सामान्यतया एकस्मिन् संवत्सरे वसन्तादयः षड्ऋतव एव गृहयन्ते। इत्थमेकस्मिन् वर्षे द्वयोर्वयोः मासयोः षड् ऋतूनां विभाजनं परवर्तिवैदिकसाहित्येऽपि प्राप्यते –

वसन्तो ग्रीष्मो वर्षा। ते देवा ऋतवः **शरद्धेमन्तः शिशिरस्ते पितरो य एवापूर्यतेऽर्धमासः।**[3]
अत्रवसन्त–ग्रीष्म–वर्षा ऋतवः देवऋतुरूपेण शरदृतुः हेमन्तर्तुरूपेण शिशिर–ऋतुश्च पितृ–ऋतुरूपेणाभिमताः सन्ति। पञ्चर्तुविभाजने वर्षाशरदृतुरेकरूपेणाभिमते स्तः।[4] यत्र च षड् ऋतूनां कल्पना कृता तत्र हेमन्त–शिशिरऋत्वोः पृथक्करणं कृतमस्ति।[5] एकस्मिन् कृत्रिमविभाजने सप्तऋतव अभिमताः सन्ति।[6] संभवतः तत्र मलमासोऽपि एकर्तुरूपेण गृहीतोऽस्ति। पाश्चात्यविदुषामपि एषैव धारणाऽस्ति।[7] किन्तु राथमहोदयस्य[8] मतानुसारं पूर्वानुरागत्वादिदं विभाजनं कृतम्। यच्च तार्किकं नास्ति। यद्यपि षडर्तूनां विकसितं विभाजनं वैदिकसाहित्ये उल्लिखितमस्ति। तथापि प्रधानतया ऋतुत्रयाणां (ग्रीष्म–वर्षा–शीतेत्याख्यानां) स्वभावप्रभावयोः स्पष्टं ज्ञानं प्राप्यते।[9] सप्तसैन्धवप्रदेशस्य अर्थादस्माकं भारतराष्ट्रस्य पशु–पक्षि–मनुष्यान्नतिरिच्य तद्गतवनस्पतिषु अपि एतासा ऋतूनां प्रभावस्य स्पष्टोल्लेख ऋग्वेदे प्राप्यते। ग्रीष्मर्तौ प्रचण्डसूर्यस्य तापं शान्तं सुखदञ्च निर्मातुं कामना विहिताऽस्ति।[10] वर्षर्तौ वनस्पतीनां पशूनाञ्च जननं प्रसवं भवतीत्यर्थः।[11] शीतर्तौ वनवृक्षाणां पर्णनाशः[12] गवां रक्षणार्थमुष्णगोष्ठे आनयनञ्चेत्[13]

---

1. ऋग्वेदः 1.164.12
2. ऋक्.3.56.2, षड् भारा एको अचरत्विभर्त्यृतं वर्षिष्ठमुप जाव आगुः।, 1.23.15 उतो स मह्यमिन्दुभिः षड्युक्ताम् अनुसेषित्। गोभिर्यवं न चर्दृषत्।
3. शत.ब्राह्मण 2.1.3.1
4. शत.ब्राह्मण 13.6.1.10-11
5. अथर्ववेद 6.55.2, 12.1.36, तैत्ति.संहिता 5.1.5.2, 7.3, मैत्रायिणी संहिता 1.7.3
6. ऋक्.1.164.1, 15 अथर्ववेद 6.61.2, 8.9.18, शत.ब्रा.8.5.1.15
7. बेवर–इण्डिशे स्टूडियन 18,44 त्सिमर–आल्टिण्डिशे, लेबेन 374। उद्धृतं ऋग्वैदिक भूगोल, पृ.52।
8. सेंटपीटर्सवर्ग कोश, व. स्था. ऋतु तुलनीय हॉपकिन्स–रिलीजन्स ऑफ इंडिया, 18, 33 (उद्धृतं तत्रैव–. भूगोल, पृ.52)
9. ऋक्.3.56.3
10. ऋक्.7.35.8
11. ऋक्,7.102.2
12. ऋक्.10.68.10
13. ऋक्.10.4.2

यदिकानि तथ्यानि ऋतुप्रभावं प्रकटीकुर्वन्ति।

भारतस्यैतासामृतूनां प्रभावो घनिष्ठसम्बन्धश्च कृषिकार्ये दृश्येते। शरत्कालात् प्राक् अर्थात् वर्षा-ऋतोः प्रारम्भकाले सूर्यः पृथिव्यामन्नं गर्भरूपेण धारयति।[1] वर्षाऋतौ[2] मेघा अन्नवतीं पृथिवीं पोषयन्ति। शस्यसंग्रहकालत्वाद् शरदृतु अस्माकं कृषकबन्धूनां कृते अतीवमहत्वपूर्णकालोऽस्ति। अतः पाश्चात्यविदुषां[3] मते शरदृतुः वर्षरूपेणाधिक्येन प्रयुक्ताऽस्ति। एतत्प्रतीयते यद्वर्षस्य प्रारम्भो ग्रीष्मर्तुना अवसानञ्च शीतर्तोः भवति स्म। ऋग्वेदस्य परवर्तिवैदिक साहित्ये हेमन्तर्तु अन्तिमृतुरूपेण उल्लिखिता अस्ति।[4] एतयोः द्वयोः ऋत्वोः मध्ये वर्षर्तुः सप्तसैन्धवप्रदेशं नाधिकं प्रभावयति। त्रि-चतुर्मासपर्यन्तम् अशीति सैंटीमीटरज्यावदधिकं नैरन्तर्येण वृष्ट्या सप्तसैन्धवप्रदेशस्य मध्यपूर्व-दक्षिणभागाः तृप्ताः भवन्ति। अनया वृष्ट्या मरुस्थलान्यपि शिष्टानि न भवन्ति स्म।[5] अस्मिन् प्रदेशे कदाचिद वर्षर्तौ अतिवृष्टिरपि जायते स्म।[6] अनेन अस्य प्रदेशस्य नद्यः जलपरिपूर्णाः भवन्त स्म।[7] इत्थमस्माभिर्दृश्यते यत्सप्तसैन्धवप्रदेशस्य ऋतूनां प्रकृतिः परिवर्तनशीला अस्ति।[8] अनेन जन्तवः पशवः पक्षिणः मानवाः प्राकृतिकवनस्पतयश्चेत्यादिकाः सर्वे आधिक्येन प्रभाविताः सन्ति।

वस्तुतः पौराणिककालेऽपि ज्योतिषशास्त्रीयाः बहवः विषयाः दरीदृश्यन्ते, यथा- ग्रहः गतिस्थितिः सूर्यस्य सहस्ररश्मित्वं भूमेरचलत्वं ध्रुवस्थानस्य वैशिष्ट्यमित्यादयः। अतोऽत्र विशेषेणास्माकं कर्त्तव्यं भवति प्राच्यविद्यायाः संरक्षणं नूतनान्वेषणस्य प्रोत्साहनं येन पुनः सर्वेषां विज्ञानभूतविद्यानां जननी स्वरूपमिदं ज्योतिर्विज्ञानं सर्वेष्वपि विज्ञानेषु मूर्ध्निस्थितं भवेदिति।[9]

षट्सु ऋतुषु विशेषोपयोगिनं वर्षाऋतुं विज्ञायात्र वर्षाया वर्णनं शोधपत्रेऽस्मिन् स्थापितम्। वस्तुतः ऋतुविज्ञानस्य प्रयोगशालायां सर्वकारैः नियुक्ता वैज्ञानिकाः सततमाकाशमधीत्य वृष्टिसम्बन्धि पूर्वसूचनां प्रसारयन्ति परं ते भारतीयसिद्धान्तानामनुसरणं न कुर्वन्ति। अतस्तेऽपि पूर्णरूपेण सफला न भवन्ति। यदि तैः भारतीयमृतुविज्ञानमपि अङ्गीक्रियते तदा लोककल्याणदृष्ट्या वैज्ञानिकदृष्ट्या च तेऽधिकाः सफलाः भविष्यन्तीति मे मतिः।

---

1. ऋक्.1.173.3 नक्षद्धोता परिसंघ ....।
2. ऋक्. 4.57.8 शुनःपर्जन्योमधुना पयोभिः, 8.21.8 पर्जन्य इव तत नद्धि वृष्ट्या।
3. हापकिन्स, अमेरिका जर्नल आफ फिलोलोजी 25,159,160, बेबर-इण्डिसे स्टूडियन 17,232 (उद्धृतं ऋग्वैदिकभूगोल, पृ. 53)
4. शत. ब्राह्मणः 1.5.3.13
5. ऋग्वेदः 5.83.10 अवर्षीवर्षमुदुषू......।
6. ऋक्. 1.33.11, 13, 15
7. ऋक्. 5.41.14
8. ऋक्. 1.73.2
9. यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद् वेदाङ्गशास्त्राणां ज्यौतिषं मूर्ध्नि स्थितम्।। उद्धृतं वृहत्संहिता भट्टो. टीका भूमिकायाम्, पृ. 9

संस्कृत-गीतिकाव्य की अर्वाचीन परम्परा

डॉ. राजमंगल यादव

संस्कृत काव्यशास्त्र के आचार्यों ने श्रव्य काव्य के दो प्रमुख प्रकार बतलाए हैं–निबद्ध तथा अनिबद्ध। इनमें निबद्ध को प्रबन्ध काव्य कहा जाता है। महाकाव्य इस का मुख्य प्रकार है। अनिबद्ध काव्य में काव्य के ऐसे अन्य भेद आते हैं जो महाकाव्य या निबद्ध काव्य के समान विस्तीर्ण नहीं होते हैं। आचार्य रूद्रट ने काव्य के ऐसे प्रकारों को लघुकाव्य कहा है। लघुकाव्य में महाकाव्य के समान समस्त रस नहीं होते अपितु एक रस तथा एक पुरुषार्थ (प्रधान) होता है। काव्यशास्त्र के आधुनिक पण्डित प्रो. राजेन्द्र मिश्र का कथन है–

कस्यचित्पुरुषार्थस्य वर्णनन्तु यदांशिकम्।
जीवनस्याथवा नेतुः खण्डकाव्य तदुच्यते॥
खण्डकाव्यमिदञ्चैव स्वेतिवृत्तानुरोधतः।
विविधान्यभिधानानि पृथगर्थानि गच्छति॥

किसी पुरुषार्थ (धर्मार्थकाम) का जिसमें आंशिक किंवा नायक के जीवन का खण्डशः वर्णन होता है, उसे खण्डकाव्य कहा जाता है। यही खण्डकाव्य अपने इतिवृत्त के अनुरोधवाश, पृथक् अर्थ वाले विविध नामों (संज्ञाओं) को धारण करता है। अतः अन्योक्तिकाव्य (गीतिकाव्य), स्तोत्र, काव्य, नीतिकाव्य, सन्देशकाव्य, यात्राकाव्य, नर्मकाव्य, तथा राग काव्यादि लघुकाव्य (खण्डकाव्य) के विभिन्न भेद हैं।

मुक्तक या गीति इन काव्य कोटिओं में प्रथम रचना है। इसका प्रमाण वैदिक साहित्य में प्राप्त होता है। वैदिक काल में गाथा समाज में अत्यन्त लोकप्रिय रही है। गाथा मूलतः एक प्रकार का लोकगीत है। काठकसंहिता-(24/1) तथा मैत्रायणीसंहिता-(3/7/3) में गाथाओं के गायन का उल्लेख मिलता है। मैत्रयाणीसंहिता के अनुसार विवाह के अवसर पर गाथायें गाई जाती हैं तथा गाथाओं के गायक स्त्रियों को प्रिय होते हैं। रामायण एवं महाभारत कालीन साहित्य में भी विभिन्न प्रकार के मुक्तक राजसभा या जनसमाज में सुनाए जाते थे। इसी प्रकार संस्कृत गीतिकाव्य की परम्परा प्रवर्तित होती हुई वर्तमान समय तक अपने नवीन स्वरूप के साथ विद्यमान है। प्रो. राजेन्द्र मिश्र ने गीतिकाव्य का लक्षण निर्देश करते हुए कहा है–

1. अभिराजयशोभूषणम्-4/81-82

अन्यापदेशकाव्यं तत्प्रवृत्त्याऽन्योक्तिनिष्ठया।
गीतिकाव्यं तदेवोक्तं गीततत्त्वप्रयोगतः।।

अर्थात् खण्डकाव्य की प्रवृत्ति अन्योक्ति वर्णन-निष्ठ होने के कारण अन्यापदेशकाव्य (अन्योक्ति-काव्य) के रूप में कही जाती है। गीतितत्त्व का प्रयोग होने के कारण उस को गीतिकाव्य भी कहते हैं।[1]

प्रो. रहस विहारी द्विवेदी ने गीतिकाव्य का लक्षण करते हुए कहा है-

रागलंक्षणसंयुक्तं गेय गीतं ध्रुवान्वितम्।
एकस्मिन विषये रागे गीतानां तु समुच्चयः।।
किन्तु गीतं भवेन्मुक्तं स्वयं पूर्णं स्वकथ्यतः।
प्रायशः कविगोष्ठीषु गीतमेव प्रशस्यते।।

अर्थात् राग के लक्षण से संयुक्त, ध्रुवा (टेक) अन्वित गेय गीत होता है। यह एक ही विषय और राग के गीतों का समुच्चय होता है। किन्तु गीत स्वयं में स्वकथ्य से परिपूर्ण होता है। प्रायः कवि-गोष्ठियों में गीतिकाव्य ही प्रशंसित होता है।[2]

प्रो. राधा वल्लभ त्रिपाठी ने भी गीतिकाव्य और राग-काव्य में भेद प्रदर्शित किया है। गीतिकाव्य का लक्षण करते हुए उन्होंने कहा है-**तदेवान्त्यानुप्रासध्रुवकान्वितं गीतम्।** अर्थात् अन्त्यानुप्रास और ध्रूवक से अन्वित गीतिकाव्य होता है। यथा-श्रीनिवासरथ द्वारा विरचित "तदेव गगनं सैव धरा" इत्यादि। रागकाव्य का लक्षण निर्धारित करते हुए उन्होंने कहा है-**विविधै रागैर्गेयं ध्रुवकान्वितगीतिसंयुतं रागकाव्यम्।**[3] प्रो. त्रिपाठी का मत है कि रागकाव्य वास्तव में उपरूपक का भेद है। ऐसा काव्य जिसमें अलग-अलग विभिन्न रागों में निबद्ध गीत हों, जिनमें गायन के साथ-साथ उन पर नृत्य व अभिनय भी किया जा सके, वह रागकाव्य है। जयदेव कृत गीतगोविन्दम् तथा उसकी परम्परा पर विराचित अन्य काव्य इसके उदाहरणस्वरूप हैं। परन्तु वर्तमान में मुक्तक एवं रागकाव्य दोनों की गणना गीति परम्परा में ही आचार्यों द्वारा की जा रही है। आधुनिक समीक्षा में मुक्तक या गीतिकाव्य ये दोनों शब्द अंग्रेजी के लिरिक) (Lyric) शब्द के अनुवाद के रूप में प्रयुक्त हो रहे हैं। लिरिक अपने आपमें पूर्ण, कवि की अंतरंग मनोभावनाओं की अभिव्यक्ति करने वाला गेय छन्द या पद्य है। प्रो. अभिराजराजेन्द्र मिश्र ने अपने अर्वाचीन काव्यशास्त्रीय ग्रन्थ अभिराजयशोभूषणम् में गीतिसन्दर्भ का सविस्तार निरूपण किया है। अधोलिखित कारिकाओं में प्रो. मिश्र का कथन है-

---

1. अभिराजयशोभूषणम् 4/85
2. दूर्वा-पत्रिका-जून-2005
3. अभिनवकाव्यालङ्कार-सूत्र-पृ. 148

यच्च गीतिषु सामाख्येत्युक्तमासीत्पुरातनैः।
तेनैव गीतितत्त्वस्य महत्वं धुरि संस्थितम्।।
देवानपि समर्थं यत्प्रीणितुं लयमूर्च्छनैः।
गीतमेव तदेकं यन्नृत्यवाद्यसमन्वितम्।।
मद्भक्ता यत्र गायन्ति तत्राऽहमिति नारदम्।
सान्त्वयत्येव गीतायां भगवान्नन्दनन्दनः।।
न तथा व्यञ्जनैस्तृप्तिर्यथा हि चषकाम्भसा।
ननु घर्माभितप्तस्य पथिकस्याभिजायते।।
तथैव रसिकस्यापि महाकाव्यानुशीलनात्।
जायते न तथाऽऽनन्दो यथा गीतेन तत्क्षणम्।।[1]

अर्थात् प्राचीन आचार्यों के द्वारा जो यह कहा गया कि 'गीतियों की ही सामसंज्ञा है' उसी से गीतितत्त्व का महत्व शिखारूढ सिद्ध होता है। जो अपनी लयों तथा मूर्च्छनाओं से देवताओं तक को वशीभूत कर लेने में समर्थ है वह एकमात्र नृत्य एवं वाद्य से समन्वित गीत तत्त्व ही है। मेरे भक्तगण जहाँ मेरा गुणानुवाद करते हैं मैं वहीं रहता हूँ' इस प्रकार श्रीमद्भगवद्गीता में भगवान् नन्दनन्दन देवर्षि नारद को सान्त्वना देते हैं। घाम (धूप) से जले-भुने बटोही (राहगीर) को व्यञ्जनों (पकवानों) से भी वैसी तृप्ति प्राप्त नहीं होती जैसी कि एक गिलास पानी से प्राप्त होती है। ठीक उसी प्रकार, सहृदय पाठक को भी (वृहत्कलेवर वाले) महाकाव्य के अनुशीलन से वैसी आनन्दानुभूति नहीं हो पाती जैसी कि तत्क्षण ही गीतश्रवण से प्राप्त होती है। इस प्रकार प्रो. मिश्र गीति तत्त्व की महत्ता का प्रतिपादन करते हुए पुनः अग्रिम कारिकाओं में कहते हैं कि काव्य के आत्म तत्त्व के रूप में प्रतिष्ठित रस, अलंकार, ध्वनि, रीति, वक्रोक्ति तथा औचित्यादि सब व्यर्थ हैं; क्योंकि गीत ही काव्य की आत्मा है। प्रो. मिश्र का कथन है-

अलङ्काररसौचित्य ध्वनिवक्रोक्तिरीतिभिः।
तस्मादलं यतोगीतं काव्यस्यात्मेति निश्चितम्।।
अलङ्कारादयस्सर्वे कल्लोला इव चञ्चलाः।
उद्भवन्ति विलीयन्ते सन्ततं गीतसागरे।।
तस्मादद्यतने काव्ये गीतमेव महीयते।
अमन्दानन्दसन्दोहस्त्रोतस्त्वादधिसंस्कृतम्।।
गीतिर्गीतञ्च गेयञ्च गानमेतन्मिथस्समम्।
प्रत्ययाच्छब्दवैभिन्न्यं न पुनर्धातुयोगतः।।[2]

1. अभिराजयशोभूषणम्-पञ्चम अंश-प्रकीर्णतत्त्वोन्मेष-कारिका-1-5
2. तत्रैव-पञ्चम अंश-प्रकीर्णतत्त्वोन्मेष-कारिका-6-9

अर्थात् इसलिए काव्यगत अलङ्कार, रस, औचित्य, ध्वनि, वक्रोक्ति एवं रीति की चर्चा व्यर्थ है; क्योंकि यह निश्चित है कि गीत ही काव्य की आत्मा है। अलङ्कारादि सारे के सारे काव्यतत्त्व गीत में उसी प्रकार उठते-गिरते रहते हैं, जिस प्रकार महासागर में चञ्चल लहरें बनती-बिगड़ती रहती हैं। इसलिए संस्कृत वाङ्मय में, आज की कविता में, अमन्द आनन्द सन्दोह का स्रोत होने के कारण गीति-तत्त्व ही महिमामय सिद्ध होता है। गीति, गीत, गेय और गान-ये समस्त परस्पर एक जैसे हैं। मात्र प्रत्यय की भिन्नता से इन शब्दों के आकार-प्रकार में भेद है न कि धातु की दृष्टि से, क्योंकि धातु तो सब में एक ही है-गै-धातु। अतः धातु दृष्ट्य इनमें कोई अन्तर नहीं है। गीति, गीत और गेय का क्या स्वरूप है? प्रो. मिश्र अग्रिम कारिकाओं में प्राचीन कवियों के सन्दर्भों को उपस्थापित करते हुए बतलाते हैं-

गीतिर्भवति रागस्य सन्ततं परिवाहिणी।
रागहारि च गीतं स्यात्कालिदासमतेन वै॥
गेयं विरचितपदं गोत्राङ्कञ्च भवेत्पुनः।
वक्ति विद्योत्तमाजानिरिव्यपि क्वचिदन्यतः॥
रक्तं स्फुटं समञ्चैव मधुरञ्च मनोहरम्।
भावान्वितं भवेद्गीतं ललितञ्चेति शूद्रकः॥[1]

अर्थात् राग का निरन्तर प्रवाह धारण करने वाली-'गीति' होती है। इसी प्रकार राग से चित्त को बरबस आकृष्ट करने वाला-'गीत होता है; ऐसा महाकवि कालिदास का मत है। 'गीत' रागयुक्त, स्फुट (स्पष्टाक्षर वाला) सम, मधुर, मनोहर, भाव-संवेदना से अन्वित तथा ललित होता है; ऐसा नाटककार शूद्रक का अभिमत है। गीत तत्त्व का स्वरूप निर्धारण करने वाली उपर्युक्त कारिकाओं पर विरचित वृत्ति में प्रो. मिश्र गीति सन्दर्भ का विस्तृत विवेचन करते हुए कहते हैं-

गीतिषु समाख्येति राजशेखरः। सामयति तोषयति देवानिति साम। साम्नां वेदस्सामवेदः। साम्नि यद्देवतोषकरं तत्त्वं तद्गीतमेव। किञ्च, गीतं न केवलं देवानां मानवानामेव तोषकरमपितु पशुपक्षिमृगादीनामपि चेतोहरं तत्त्वम्। आहितुण्डिकस्तु मधुकरीवाद्यलयैः फणिनं भृशं नर्तयन् स्ववशीकरोति। वन्यगजा वीणानादसम्मोहिता निगृह्यन्ते। किरातगीतवाद्यवशीकृतचेतना मृगा वितता वागुरामपि न पश्यन्ति।

नृत्यवाद्यसमन्वितं तदेव गीतं सङ्गीतं तौर्यत्रिकं वाऽप्युच्यते। नृत्यं गीतञ्च वाद्यञ्च त्रिभिस्सङ्गीतमुच्यते। यथा वा तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिति त्रयमित्यमरः।

गीतं गानमिमे समे इत्यमरः। तद्वदेव गीतिर्गेयं वाऽपि गीत-साम्यं विभर्ति। कविकुलगुरुकालिदास विरचितेऽभिज्ञानशाकुन्तलनाम्नि-नाटके पञ्चमाङ्के हंसपदिकाया

1. तत्रैव-कारिका 10-12

गीतमाकर्ण्य दुष्यन्तः सप्रशंसं कथयति-अहो रागपरिवाहिणी गीतिरिति। तेन रागपरिवाहित्वमेव गीतवैशिष्ट्यं प्रतिभाति।[1] अर्थात् गीतियों की ही संज्ञा साम है; ऐसा आचार्य राजशेखर का मत है। जो देवताओं को भी सान्त्वना दे, परितोष दे, वही सामन है। साम मन्त्रों के सङ्कलनभूत वेद को ही सामवेद कहते हैं। साममन्त्रों में भी जो देवताओं को सन्तुष्ट करने वाला तत्त्व है—वह गीत ही है। पुनश्च गीत केवल देवताओं तथा मनुष्यों का ही तोषकर नहीं होता है अपितु पशुओं, पक्षियों तथा मृगादिकों का भी हृदय चुराने वाला तत्त्व होता है अपितु पशुओं, पक्षियों तथा मृगादिकों का भी हृदय चुराने वाला तत्त्व होता है। संपेरा महुअर-वाद्य (वीन) के लयों से फणी (सर्प) को जीभर नचाता हुआ स्ववशीभूत कर लेता है। वनचारी हाथी भी वीणा के नाद से सम्मोहित होकर पकडे जाते हैं। किरातों (कील-भीलों) के गायन-वादन से वशीकृत चेतना वाले बेचारे हिरन फैली हुई जाल की रस्सी को भी नहीं देखते हैं।

नृत्य और वाद्य से समन्वित वही गीत सङ्गीत अथवा तौर्यत्रिक भी कहा जाता है। नृत्य, गीत एवं वाद्य-इन तीनों के समन्वय को सङ्गीत कहा जाता है। नृत्य, गीत, वाद्य एवं नाट्य इन तीनों को अमरकोषकार तौर्यत्रिक कहते हैं। गीत एवं गान-ये दोनों एक समान हैं—ऐसा अमर कोष में कहा गया है।[2] ठीक उसी प्रकार गीति अथवा गेय भी गीत से पूर्णतः साम्य रखता है। कविकुल-गुरु कालिदास प्रणीत अभिज्ञानशाकुन्तलम् नाटक के पञ्चम अङ्क में रानी हंसपदिका के गीत को सुनकर राजा दुष्यन्त, प्रशंसा करते हुए कहते हैं—अहो! यह गीति तो राग को प्रवाहित करने वाली है। इस कथन से राग का परिवाहित्व ही गीत का वैशिष्ट्य सिद्ध होता है। अभिज्ञानशाकुन्तलम् नाटक के प्रारम्भ में सूत्रधार नटी से कहता है—

तवास्मि गीतरागेण हारिणा प्रसभंहृतः।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा॥[3]

अर्थात् हृदय को बरबस आकृष्ट कर लेने वाले तुम्हारे गीत के राग से मैं यूँ ही झटिति वशीभूत कर लिया गया हूँ, जैसे अत्यन्त वेगगामी इस सारंग (मृग) द्वारा यह राजा दुश्यन्त!

महाकवि कालिदास के प्रस्तुत पद्य में बतलाए गए गीत के वैशिष्टय का विवेचन करते हुए वृत्ति के अग्रिमभाग में कवि कालिदास कृत मेघदूत में प्रतिपादित गीत के वैशिष्टय को बतलाते हुए प्रो. मिश्र कहते हैं—

अत्रापि गीतरागस्य वैशिष्ट्यं प्रसह्य चित्तहारित्वमेव प्रोक्तम्!। तस्माद् गीतम्महीयते स्वेन चेतोहरेण गीतरागेणैवेति स्पष्टम्। किञ्च, मेघदूतेऽपि यक्षिणीवीणावादन प्रसङ्गे कालिदासो गेयवैशिष्टयं प्रतिपादयति—

1. तत्रैव पृ. 249-50
2. अमरकोष-प्रथमकाण्ड शब्दादिवर्ग-6
3. अभिज्ञानशाकुन्तलम्-प्रथम अङ्क-श्लोक-5

उत्सङ्गे वा मलिनवसने सौम्यः निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चि-
द्भूयोभूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती॥[1]

आलोके ते निपतति पुरा सेति शेषः। तदारम्भादेवाध्याहार्यम्। अथाऽत्र गेयसमीक्षा। तत्र वैशिष्ट्यद्वयम्-गोत्राङ्कं विरचित पदञ्चेति। मम गोत्रं नामेति मद्गोत्रं तदेवाङ्कश्चिह्नं वैशिष्ट्यं यस्य तद्गेयं मद्गोत्राङ्कं। वस्तुतो नायकं प्रति नायिकया नायिकां प्रति नायकेन च गीयमाने गेये गोत्राङ्केन स्वाभिप्रायप्रकाशनेनावश्यमेव भवतिव्यम्। यथा दुष्यन्तं प्रति लिखिते गेयात्मके स्वमदनलेखे शकुन्तलाऽत्माभिप्रायं प्रकाशयति–

तव न जाने हृदयं मम पुनः कामो दिवाऽपि रात्रावपि।
निघृण! तपति बलीयस्त्वयि वृत्तमनोरथाया अङ्गनि॥[2] इति। (अभि. 3/13)

अर्थात् गीत के राग का वैशिष्ट्य बरबस चित्त को चुरा लेना ही बताया गया है। इसलिए अपने चित्तावर्जक गीतराग से ही गीत प्रतिष्ठित होता है, यह स्पष्ट हो गया। पुनश्च मेघदूत काव्य में भी यक्षिणी के वीणावादन प्रसङ्ग में महाकवि कालिदास गेय का वैशिष्ट्य प्रतिपादित करते हैं–हे सौम्य! मलिन वस्त्रों वाली, गोद में वीणा को स्थापित कर, मेरे गोत्राङ्क (नामोल्लेख) से युक्त तथा विशेष रूप से रचित (अर्थात् मर्मस्पर्शी) पदों वाले किसी गेय को गाने की आकांक्षा करती (परन्तु भावावेश के कारण गिरते) नयनाश्रुओं के कारण गीली हो जाने वाली वीणा की तन्त्री यथाकथञ्चित् सुखा कर, अपने ही द्वारा बनाई गई गीत की मूर्च्छना (आरोह तथा अवरोह) को बार-बार भूलती-बिसरती (मेरी प्रिया संभवतः तुम्हारी दृष्टि में आ पड़ेगी)। 'वह (मेरी प्रिया यक्षिणी) तुम्हारे दृष्टिपथ में समक्ष ही आ पड़ेगी' ऐसा श्लोक में कहना शेष है। उसे प्रारम्भ में ही अध्याकृत कर लेना चाहिए। अब इस श्लोक में प्रयुक्त गेय शब्द की समीक्षा यह है कि गेय के यहाँ दो वैशिष्ट्य दिए गए हैं–गोत्राङ्क और विरचित पदत्व। मेरा गोत्र अर्थात् नाम है मद्गोत्र। वही अङ्क या चिह्न अर्थात् वैशिष्ट्य; जिसका ऐसा गेय (गीत) मद्गोत्राङ्क कहा जाएगा।

वस्तुतः नायक के प्रति नायिका द्वारा अथवा नायिका के प्रति नायक द्वारा गाये जाने वाले (विरहोद्दीपक) गेय में गोत्राङ्क अर्थात् स्वाभिप्राय का प्रकाशन अवश्य ही होना चाहिए। जैसे कि दुष्यन्त के प्रति लिखे गए गेयात्मक अपने मदन लेख (प्रेमपत्र) में शकुन्तला आत्माभिप्राय (गोत्राङ्कता) को प्रकाशित करती है कि–'मैं तुम्हारा हृदय तो नहीं जानती (कि उसमें मेरे प्रति क्या भाव है?) परन्तु तुम्हीं को लक्ष्य बनाकर अपने मनोरथों का वरण करने वाली मेरे

1. मेघदूत-उत्तरमेघ-पद्य संख्या-26
2. अभिराजयशोभूषणम् पृ. 251

अङ्ग-प्रत्यङ्ग को तो कामदेव दिन में और रात में भी हे निष्ठुर! अतिशय सन्तप्त कर रहा है।

पुनश्च प्रो. मिश्र अभिज्ञानशाकुन्तल और मृच्छकटिक में उल्लिखित गीत वैशिष्ट्य की व्याख्या करते हुए अग्रिम वृत्तिभाग में कहते हैं–

अत्र शकुन्तलायाः स्वाभिप्रायनिवेदनमेव तद्गोत्राङ्कत्वम्। किञ्च, गेयं भवति विरचितपदम्। विशेषेण रचितानि स्वसमीहितार्थ-सम्पादन-क्षमाणि पदानि यस्मिंस्तत्। अनेनैतदुक्तं भवति यद्गेयप्रयुक्तैः पदैर्मम-स्पर्शिभिरेव भवितव्यम्। तदिदं विरचित पदत्वं राजमहिष्या हंसपदिकाया गीताक्षरेषु द्रष्टव्यम्–

अभिनवमधुलोलुपस्त्वं तथा परिचुम्ब्य चूतमञ्जरीम्।
कमलवसतिमात्रनिर्वृतो मधुकर! विस्मृतोऽस्येनां कथम्??

अत्र शकुन्तलासक्तहृदयं पूर्वोपभुक्तनिजयौवनमाधुरीकं दुष्यन्तं प्रत्यभिव्यक्तो हंसपदि-कोपालम्भः निश्चप्रचमतीव मार्मिको विरचितपद्त्वात्। तत्र सहृदया एव प्रमाणम्। अलं भूयः प्रतननेन।

मृच्छकाटिकप्रकरणेऽपि रेभिलगीतं प्रशंसन् नायकश्चारुदत्तो गीतवैशिष्ट्यान्याख्याति।[1] तद्यथा–

रक्तञ्च नाम मधुरं च समं स्फुटञ्च
भावान्वितञ्च ललितञ्च मनोहरञ्च।
किं वा प्रशस्तवचनैर्बहुभिर्मदुक्तै-
रन्तर्हिता यदि भवेद् वनितेतिमन्ये।।[2]

अर्थात् पूर्वोक्त पद में शकुन्तला का (दुष्यन्त के प्रति) अपने मनोभावों का निवेदन ही उसकी गोत्राङ्कता है।

पुनश्च गेय होता है–विरचित पद! विशिष्ट-रूप से (खूब सोच-समझ कर विन्यस्त किए गए हों, अपने समीहित मनोभाव को सम्पादित कर पाने में समर्थ पद-समूह जिसमें, उसे कहेंगे विरचितपद! इसका यह अर्थ हुआ कि उस गेय में प्रयुक्त पदों को मर्मस्पर्शी होना चाहिए। (गेय अथवा गीत की) यह विरचितपदता राजमहिसी हंसपदिका के गीताक्षरों में देखी जा सकती है–'हे मधुकर! नूतन मधु के लोभी हो तुम जो कि आम्रमञ्जरी का उस आसक्ति के साथ परिचुम्बन (रसपान) कर अब (बिना मधुपान के) कमलवन में निवासमात्र से सन्तुष्ट होकर इसे भला क्यों भूल बैठे हो?' यहाँ शकुन्तला में आसक्त हृदय वाले तथा उससे पूर्व अपनी

1. तत्रैव-पञ्चम अंश-प्रकीर्णतत्त्वोन्मेष-वृत्तिभाग
2. मृच्छकटिकम्-3/4

यौवन-माधुरी का उपभोग करने वाले दुष्यन्त के प्रति हंसपदिकी का उलाहना प्रकट हुई है जो कि निश्चित रूप से अत्यन्त मार्मिक है—मर्मस्पर्शी पदों का प्रयोग होने के कारण। इस सन्दर्भ में सहृदयजन ही प्रमाण हैं। इसी प्रकार मृच्छकटिक प्रकरण में भी रेभिल के गायन की प्रशंसा करते हुए नायक चारुदत्त गीत की विशेषताओं को गिनाता है। उदाहरणार्थ—(रेभिल का गायन) रक्त (सुरीला) मधुर (मिठास भरा) सम (कर्णसुखद) स्फुट (स्पष्ट आशय वाला) संवेदनाओं से ओत-प्रोत, ललित एवं हृदयावर्जक था। अब मेरे द्वारा कहे गए अतिशय प्रशंसा-वचनों से क्या लाभ? मैं तो ऐसा मानता हूँ मानो उसके कण्ठ में कोई वनिता (गायिका) ही प्रतिष्ठित हो गई थी।

इस प्रकार प्रो. अभिराज राजेन्द्र मिश्र ने ससन्दर्भ गीत के स्वरूप एवं वैशिष्ट्ये का विवेचन अपने अर्वाचीन काव्यशास्त्रीय ग्रन्थ अभिराजयशोभूषण में किया है। शास्त्रीय-गीत और लोकगीत के भेद से यह गीत दो प्रकार का होता है। इन दोनों के तात्त्विक भेदों का निरूपण करते हुए प्रो. मिश्र का कथन है—

धातुमातुसमायुक्तं यद्धि नादाऽक्षरात्मकम्।
कर्णामृतं विभक्तञ्चं द्विधा गीतं प्रशस्यते॥
धातुजं वेणुवीणादियन्त्रसञ्चयनिस्सृतम्।
मातुजं मुखजं प्रोक्तं गानरूपेण संस्थितम्॥
गीतमेतद्यदा रागैर्गीयते शास्त्रसम्मतैः।
काव्यं तादृशगीतानां रागकाव्यं समुच्यते॥
यत्पुनर्गीयते स्वैरं यथाकण्ठं यथासुखम्।
यथाजनपदग्रामकुलजातियपरम्परम्॥[1]

अर्थात् कर्ण-कुहरों के लिए जो गीत अमृततुल्य होता है, वह धातु एवं मातु से समन्वित होकर नादात्मक एवं अक्षरात्मक इन दो रूपों में विभक्त है। धातुज गीत उसे कहते हैं जो वेणु तथा वीणा आदि यन्त्र समूह से प्रस्फुटित होता है। मातुज गीत को मुखज अर्थात् मुँह से कढने वाला भी कहते हैं जो कि गायन के रूप में विद्यमान हैं। यही गीत जब शास्त्र-सम्मत रागों (भैरवी, केदार, धनाश्री आदि) के माध्यम से गाया जाता है तो उस प्रकार के गीतों का काव्य 'रागकाव्य' कहा जाता है। और जो गीत स्वतन्त्र रीति से सम्प्राप्त कण्ठध्वनि के अनुसार सुखपूर्वक तथा जनपद, ग्राम, कुल, जाति की परम्परा के अनुसार गाया जाता है तो 'लोकगीत' कहा जाता है। लोकगीत के स्वरूप का विवेचन करते हुए प्रो. मिश्र का कथन है

तच्च सद्योरसानन्ददायकं गतबन्धनम्।
शास्त्रनियमनिर्मुक्तं लोकगीतं समुच्यते॥

1. अभिराजयशोभूषणम्-पञ्चम अंश-प्रकीर्णतत्त्वोन्मेष-कारिका-13-16

रागकाव्यगता रागा यथा गान्धर्वसम्मताः।
तथैव लोकगीतानां रागा लोकानुमोदिताः॥
लोकगीतमपि स्वैरं शास्त्ररागेण गीयते।
शास्त्ररागाश्रितं गीतं लोकरागैस्तथैव च॥
सर्वमेतद्धि गान्धर्वविद्याकुशलकौशलम्।
लोकशास्त्रोभयोत्तीर्णो यद्यसौ भवति ध्रुवम्॥
प्रमाणं लोकगीतानां लोक एव हि केवलम्।
यथावदङ्गीकर्तव्यं ततस्तद्धि यथास्थितम्॥[1]

अर्थात् सङ्गीत शास्त्रीय नियमों से विनिर्मुक्त, किसी भी प्रकार के बन्धन (वन्दिश) से परे, तत्क्षण रस एवं आनन्द से सराबोर कर देने वाला 'लोकगीत' कहा जाता है। लोकगीत को भी स्वेच्छापूर्वक किसी शास्त्रीय-राग पर गाया जा सकता है और उसी प्रकार शास्त्रीय-रागाश्रित किसी गीत को लोकरागों पर भी गाया जा सकता है। यह सबका सब सङ्गीतशास्त्र में प्रवीण (गायक) का कौशल मात्र है, बशर्ते कि वह निश्चित रूप से लोकगीतों तथा शास्त्रीय गीतों की परम्परा में समानरूप से उत्तीर्ण हो। लोकगीतों का प्रमाण इसलिए एकमात्र लोक (Folk) को ही यथावत् स्वीकार किया जाना चाहिए जिस किसी भी रूप में वह विद्यमान हो। इस प्रकार प्रो. मिश्र ने शास्त्रीय गीतों एवं लोकगीतों के स्वरूप का तात्त्विक विवेचन किया है। प्रो. मिश्र द्वारा विवेचित गीतों के यह स्वरूप शास्त्रीय गीतों एवं लोकगीतों के ज्ञान के निमित्त अत्यन्त उपादेय हैं। प्रो. मिश्र द्वारा निर्धारित लक्षणों के अनुरूप ही आधुनिक संस्कृत कवियों ने विभिन्न शास्त्रीय एवं लोकगीतों की रचनाएं की हैं जो सहृदय-हृदय को ब्रह्मानन्दसहोदर की स्थिति में सद्यः पहुंचाने की क्षमता सम्पन्न हैं। अर्वाचीन संस्कृत गीतिकाव्य की परम्परा को परिपुष्ट करने वाली कृतियों में करुणाकटाक्षलहरी, कतमाकविता, धीवरगीति, गीतभारतम्, गीतिवाणी, गीताञ्जलिः, गीतिकादम्बरी, गीतिगङ्गा, गीतरामायणम्, गीतगैर्वाणम्, गीति-गिरीशम्, गीति गौराङ्गम्, संस्कृत गीत माला, गीत कन्दलिका, वाग्वधूटी, मृद्वीका, श्रुतिम्भरा, मत्तवारिणी, मधुपर्णी, कनीनिका, हविर्धानी, शालभञ्जिका, अग्निशिखा, मातृगीतिकाञ्जलिः तथा निस्यन्दिनी आदि गीतिकाव्य के प्रमुख उदाहरण स्वरूप हैं। इनमें से कतिपय के गीतों को उदाहरणस्वरूप प्रस्तुत किया जा रहा है। करूणाकटाक्षलहरी प्रो. रसिक बिहारी जोशी विरचित लहरी-काव्य है जो आधुनिक आचार्यों द्वारा स्वीकृत लहरी-काव्यविधा के अन्तर्गत आता है। लहरीकाव्य का लक्षण प्रो. रहस विहारी द्विवेदी ने अपने आर्वाचीन काव्यशास्त्रीय ग्रन्थ में इस प्रकार किया है–

देवे देशे निसर्गे वा प्रिये वस्तुनिभक्तिमान्।
कविर्यत्कुरुते काव्यं लहरीत्यभिधीयते॥

---

1. तत्रैव-पञ्चम अंश-प्रकीर्णतत्त्वोन्मेष-कारिका-17-21

स्वतोऽपि पूर्णपद्यानि चैकस्मिन् विषयेऽन्वितम्।
दधते तानि काव्येऽस्मिन् कल्लोला इव वारिधौ॥[1]

प्रो. राधावल्लभ त्रिपाठी ने लहरीकाव्य का लक्षण इस प्रकार किया है–

पारावरे चेतसि उद्गच्छन्ति च मुहुः संघट्टन्ति।
भावतरङ्गास्तेषां व्यक्तीकरणं भवेल्लहरी॥[2]

प्रो. अभिराज राजेन्द्र मिश्र लहरीकाव्य का लक्षण बतलाते हुए कहते हैं–

परस्पर समासक्ता लहर्यो जलधौ यथा।
भङ्गिव्रजं जनयन्त्यो यान्त्यद्वैतस्वरूपताम्॥
भक्ति शृङ्गारसन्दर्भाः काव्यऽन्येऽपि तथा यदा।
भिन्नाःसन्तोऽपि पुष्णन्ति मूलभावं पुनः पुनः॥
लहरीसन्निभा भाषाविच्छितं जनयन्ति च।
नयनासेचनं भूरि वितन्वन्ति निरन्तरम्॥
तदा तल्लहरीकाव्यं कोविदैर्विनिगद्यते।
अभिराजमतञ्चैतन्निश्चितं बुधतोषणम्॥[3]

प्रो. रसिक विहारी जोशी विरचित करुणाकटाक्षलहरी उपर्युक्त आधुनिक आचार्यों द्वारा निर्धारित लक्षणों के अनुरूप रचित गीतिकाव्य है। इसमें प्रो. जोशी ने कृष्ण प्रिया (साक्षात् लक्ष्मीविग्रह) राधा को अपना इष्टदेव मानकर उनकी कृपाकटाक्ष की प्राप्ति के निमित्त आराधना की है। इसके रसात्मक गीतिकाव्य अत्यन्तश्लाघनीय हैं जो सहृदय के हृदयों को अपनी ओर बरबस आकृष्ट कर लेते हैं। प्रस्तुत गीतिकाव्य (लहरीकाव्य) का अधोलिखित पद्य श्लाघ्य है जिसमें कवि का कथन है–

तीक्ष्णा सा बडिशी तवास्ति नयनं मीनाननच्छेदने
राधे! कामशरानुविद्धहृदयो मत्स्यो यथा बध्यते।
श्रीकृष्णस्य मनोझषः स्मरजलस्पन्दी यथाऽऽकृष्यते।
तद्वन्मे स्मरतन्त्रचित्तशफरः शीघ्रं तयाकृष्यताम्॥[4]

अर्थात् हे राधे! तुम्हारा नेत्र मछली के मुख को छेदने वाला एक तीखा कांटा है, जिससे काम-बाण से विद्ध हृदय मत्स्य बाँधा जाता है। जैसे कामजल में तैरता हुआ श्रीकृष्ण का

1. दूर्वा-द्वितीयोन्मेष-अप्रैल-मई-जून-2005 (नव्यकाव्यतत्वमीमांसा)।
2. अभिनवकाव्यालङ्कारसूत्र-तृतीय अधिकरण
3. अभिराजयशोभूषणम्-चतुर्थ अंश-निर्मितितत्त्वोन्मेष-कारिका-91-94
4. करूणाकटाक्षलहरी-10

मनोमत्स्य (उस नेत्र-वंशी से) खींच लिया जाता है, वैसे ही मेरे काम-परतन्त्र चित्तमत्स्य को भी खींच लो। प्रस्तुत पद्य में देवविषयिणी रति का पल्लवन हुआ है। इस पद्य को प्रो. अभिराज राजेन्द्र मिश्र ने अपने नूतनोद्भूत काव्यभेद सहृदयास्वाद्य, के उदाहरण के रूप में प्रस्तुत किया है। इसी प्रकार इस काव्य के अन्य पद्य भी सहृदयास्वाद्य स्वरूप ही हैं।

प्रो. श्री निवास रथ विरचित 'तदेवगगनं सैवधरा' एवं 'कतमा कविता' भी गीतिकाव्य के उत्कृष्ट उदाहरण हैं। तदेवगगनं सैवधरा काव्य की प्रस्तुत गीति दर्शनीय है जिसमें कवि का कथन है–

जनताकृतिः शान्ति सुखहीना
संस्कृति दशाऽतिमलिना दीना।
केवल निजहित साधन लीना
राजनीतिरचना स्वाधीना।।
न तुलसी दलं
न गङ्गाजलं
स्वदते यथा सुरा। तदेव गगनं सैवधरा।।[1]

प्रस्तुत पद्य में आधुनिक भारत की अधोगामी सभ्यता और संस्कृति का कवि ने वर्णन किया है। इसी प्रकार कवि प्रो. रथ की द्वितीय 'कतमा कविता' भी द्रष्टव्य है जिसमें कवि का कथन है–

अविवेकहता बहुसाधनता
जननीतिपदे विपदे भविता
यदि मानवता भयभारनता
सकलापि समाजकथाऽवसिता।।
विलयं यदि संस्कृतिरेव गता
कियदात्मसुखं जनता लभताम्।। वद रे! तिमिरे।
तव नेत्र पथं।
कतमा कविता, विततं कुरुताम्।।[2]

प्रस्तुत गीतिकाव्य में कवि ने सन् 1975 ई. की आपातकालीन स्थिति का दर्दनाक वर्णन किया है। कवि का कथन है कि तस्कालीन समय में अविवेक सम्पन्न जनों द्वारा जननीति के निर्धारक होने पर भी उत्याचार किये गये।

1. तदेव गगनं सैव धरा
2. तत्रैव-कतमा कविता

कवयित्री डॉ. पुष्पादीक्षित विरचित अग्निशिखा की अधोलिखित कविता दर्शनीय है, जिसमें उनका कथन है–

क्षीणदुग्धा विवत्सा वुभुक्षाकुलाः
साश्रुनेत्रा गवाशैर्विकृष्टा मुहुः।
गा नदन्तीः समुत्प्रेक्ष्य शृङ्गाटके
बन्धनच्छेदनैः को नु गोपायते॥[1]

प्रस्तुत गीतिमय पद्य में कवयित्री ने आधुनिक भारत में गोधन दुर्दशा का करुणामय वर्णन किया है।

प्रो. राधावल्लभ त्रिपाठी विरचित रागकाव्य गीतधीवरम् भी अर्वाचीन संस्कृत गीतिकाव्य की परम्परा में उत्कृष्टतम काव्य है। रागकाव्य का लक्षण प्रो. रहस विहारी द्विवेदी ने इस प्रकार किया है–

लोकोत्तराह्लादमयं प्रसन्नं सङ्गेयतालध्रुवकानुबद्धम्।
रागात्मकं नाट्यकृतेऽपि युक्तं नृत्यत्पदाङ्कं किल रागकाव्यम्॥[2]

स्वयं प्रो. राधावल्लभ त्रिपाठी ने रागकाव्य का लक्षण करते हुए कहा है–

विविधै रागैर्गेयं ध्रुवकान्वितगीतिसंयुतं रागकाव्यम्॥[3]

प्रो. राधावल्लभ त्रिपाठी द्वारा विरचित अधोलिखित रागकाव्य द्रष्टव्य है, जिसमें प्रो. त्रिपाठी का कथन है–

सरति समस्तः संसारः
प्रोद्वेल्लति पारावारः
पारावारे नौका
नौकायां गतिसञ्चारः।
नौकामिह सारं सारम्
गन्तास्मि कदाचित् पारम्॥[4]

प्रस्तुत गीतिकाव्य में बिम्ब प्रतिबिम्ब भाव है। प्रस्तुत रूप में समुद्र में नौका चलाने वाले धीवरों की मनःस्थिति का वर्णन है तथा अप्रस्तुत रूप से संसार-सागररूपी नौका को अग्रसरित

1. अग्निशिखा-ब्रूहि कोऽस्मिन् युगे कालिदासायते।
2. दूर्वा-द्वितीयोन्मेष-अप्रैल-मई-जून-2005 (नव्यकाव्यतत्त्वमीमांसा)।
3. अभिनवकाव्यालङ्कारसूत्र-तृतीय अधिकरण-सूत्र 3.1.6
4. गीतधीवरम्-अष्टम सर्ग-गीति-28

करने वाले मनुष्यों का वर्णन किया गया है। प्रस्तुत गीतियाँ अत्यन्त सागरगर्भित गीतियाँ हैं जो आधुनिक गीतिकाव्य की परम्परा में काव्यत्व की अनुभूति के साथ दर्शन की भी अनुभूति कराती हैं।

संस्कृतगीतिकाव्य की अर्वाचीन परम्परा में गलज्जलिका ने भी विपुल ख्याति प्राप्त की है। भट्टमथुरा नाथशास्त्री, बच्चू लाल अवस्थी, प्रो. जगन्नाथ पाठक एवं प्रो. अभिराजराजेन्द्र मिश्र की गजलें संस्कृत की अर्वाचीन कविता के गौरव को और अधिक गौरवान्वित करती हैं। गजल (गलज्जलिका) गीति का लक्षण प्रस्तुत करते हुए प्रो. राधावल्लभ त्रिपाठी का कथन है—द्विपदिकाभिर्निबद्धा गीतिर्गजलमुच्यते।।[1] अर्थात् दो पादों (द्विपदिका=पादयुगल) में निबद्ध गीति को गजल कहा जाता है। इसके प्रत्येक पाद युगल को शेर कहा जाता है। अथवा इसे मतला भी कहते हैं और दो पद्यों के एक चरण को मिसरा भी कहते हैं। गजल में पाँच या पाँच से अधिक पाद युगल होते हैं। इनमें अन्त्यश्रुति को रदीफ तथा उपान्त्यश्रुति को काफिया कहा जाता है। अन्तिम पाद युगल को मक्ता कहा जाता है। प्रो. अभिराज राजेन्द्र मिश्र ने गजल के संविधानक का विस्तार से निरूपण किया है। सर्वप्रथम गजल को संस्कृत भाषा में गलज्जलिका के रूप में प्रतिष्ठित करने वाले प्रो. मिश्र ही हैं।[2] गलज्जलिका के स्वरूप का निरूपण करते हुए प्रो. मिश्र का कथन है—

विविधो बन्धविस्तारो दृष्यतेऽत्र हि गीतके।
बन्धदैर्ध्यपरस्सोऽयं फारस्यां बहरो मतः।।
लघीयान बहरः क्वापि द्राघीयानथवा क्वचित्।
प्रयोगक्षमतादर्शी सत्कवेश्चात्र दृश्यते।।
संस्कृतेऽक्षरविस्तारे गणानां यादृशी स्थितिः।
बहरेऽपि तथैवास्ते कश्चिद्रम्यो गणक्रमः।।
'मुत्कारबे मुसम्मन सालिमेति' क्वचिद्धि सः।
क्वापि 'बहरे कामिल मुसम्मन इतीर्यते।।
मफऊल-फऊलून फाइलुन्निति संज्ञकाः।
गणश्चापि प्रसिद्धास्ते बहरेष्वेषु सम्मताः।।
कस्मिन्नु बहरे को वा गणक्रमः प्रयोऽयते।
फारसीच्छन्दोविचितौ सर्वमेतत्सुनिश्चितम्।।

---

1. अभिनवकाव्यालङ्कारसूत्र-तृतीय अधिकरण-सूत्र 3.1.9
2. गजल के लिए गलज्जलिका (संस्कृत) नाम प्रो. मिश्र ने सर्वप्रथम 1972 ई. में प्रकाशित अपनी गीतसंकलपना वाग्वधूटी में दिया था इस-व्याख्या के साथ ; गलन्ति जलानि नयनाश्रूणि यस्यां सा मार्मिकगीतिः गलज्जलिका।

गजलस्य त्रयो भागस्तद्विद्भिः परिभाषिताः।
मतला-शेर-मक्ताख्यास्तदिदानीं प्रतन्यते।।
गजलारम्भि यद्वाक्यं मूलभाव प्रकाशकम्।
तदेव फारसी वाचि मतलेति समुच्यते।।
अन्तिमश्चापि यो बन्धः कविनामाङ्कितः खलु।
सोऽपि गजल तत्त्वज्ञैर्मकतेति निगद्यते।।
मतलामक्तयोर्मध्ये मूलभावैकपोषिणः।
बन्धा भिन्नाशया वापि कथिताः शेरसंज्ञकाः।।
फारसीसंविधानेन सर्वेणैतेन चाप्यलम्।
गजलेन च कस्तोषो देववाणीविपश्चिताम्।।
तस्माद्गलज्जलेत्ख्या स्याद्गलज्जलिकाऽथवा।
रोचतां संस्कृतज्ञेभ्य इति प्रस्तूयते मया।।
अन्त्यिका च तथैवास्तु मकतेति मतम्मम।।[1]

